
राजेन्द्र-चन्द्रोदय-चम्पूः



— डा० रुद्रदेवत्रिपाठी

संस्कृत-विद्यापीठ-ग्रन्थमालायाः ४६ तमं पुष्पम्

राजेन्द्र-चन्द्रोदय-चम्पूः

[महामहिम-डॉ० राजेन्द्रप्रसादस्य जीवनचरित्राञ्चिता]

प्रधान-सम्पादकः —

डा० मण्डनमिश्रः, प्राचार्यः

लेखकः सम्पादकश्च —

डा० रुद्रदेवत्रिपाठी, आचार्यः

एम० ए० (संस्कृत-हिन्दी), पी-एच० डी०, डी० लिट्०,

[अनुसन्धान-सङ्कायस्य प्राध्यापकोऽध्यक्षश्च]

प्रकाशनस्थलम् —

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्

शहीदजीतसिंहमार्गः, नई दिल्ली-११००१६

प्रकाशक :—
डा० मण्डनमिश्रः, प्राचार्यः
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-विद्यापीठम्
शहीदजीतसिंहमार्गः, कटवारिया सराय, नई दिल्ली-११००१६
दूरभाषाङ्कः ६५०८३१

☐ प्रकाशन-वर्षम् १९८५ ई०

☐ प्रथमं संस्करणम्

☐ ६०० पुस्तकानि

☐ मूल्यम्—२२-००   द्वाविंशतिरूप्यकाणि

मुद्रक—पङ्कज प्रिण्टर्स, मौजपुर, दिल्ली-५३

१८

अनुक्रमणिका

प्रधान-सम्पादकीयम्

श्रद्धेया डा० राजेन्द्रप्रसादमहाभागा अस्य राष्ट्रस्य बहुविध-विकासानां कर्णधारा आसन् । उत्तमस्नातकोच्चकोटिक-विद्वन्-मनीषि-चिन्तक-विचारक-विधिशास्त्रि-स्वतन्त्रतासङ्ग्रामसेनानी-राष्ट्रिय-काङ्ग्रेस-संविधानसभाध्यक्ष - केन्द्रीयमन्त्रि-राष्ट्रपतीनां रूपेण तेषां योगदानं स्वर्णाक्षरेषूल्लेखनीयं विद्यते ।

एतेषां महिम्नामतिरिक्तं तेषामेकं विशिष्टं व्यक्तित्वमासीत्—यत् समस्तं संसारं प्राभावयत् । तदियद्विशालमगाधञ्चाविद्यत यत् तस्य शब्देष्वङ्कनं सर्वथाऽसम्भवमस्ति । 'श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठं' तेषां जन्मशताब्दसमारोहावसरे **'राजेन्द्र-चन्द्रोदय-चम्पू'**मिमां तदीय-चारु-चरित्र-निचितां **डॉ० रुद्रदेवत्रिपाठि**-विरचितां प्रकाश्य स्वस्य श्रद्धाप्रसूनाञ्जलिं समर्पयदात्मानं धन्यं भावयति । समग्रमपि राष्ट्रमेतच्छताब्दवर्षं सहर्षं मानयति । केन्द्रस्तरेणैकोच्चस्तरीया समितिरस्मै समायोजनाय नेतृत्वं प्रददाति । एवं सत्यप्यस्माकमियं संक्षिप्तः प्रयासः कैश्चिद् विशिष्टैः कारणैरस्ति । तानि च—डॉ० राजेन्द्रप्रसादा उपर्युक्ताभ्यो विशिष्टताभ्योऽपि विशिष्य भारतीय-संस्कृतेः प्रतीका आसन् । ते राष्ट्रपतिभवनायैकमाश्रमरूपमदुः सर्वां सत्ताञ्च सेवायाः समक्षमनामयन् । त्याग-तपसी तेषु साकारे अभूताम् । तेषां जीवनं संस्कृत-भारतीय-संस्कृत्योरनुयायिभ्यः शक्तेः स्रोतोऽविद्यत । यतस्तेषु तदेव सर्वं मूर्तिमदासीद् यत् सहस्रं वर्षाणां साधनाया अनन्तरमस्माकम् ऋषिभिर्मुनिभिः प्रतिदिनमाचरितमासीत्—अतस्ते विशिष्य प्रणम्याः सन्ति ।

भारतीयराजनीतौ राष्ट्रपितुर्महात्मगान्धिनोऽनन्तरं नैतिकमूल्येभ्यः सर्वाधिकमाश्रयदातारः श्रीराजेन्द्रप्रसादा अभूवन् । ते संस्कृताय भारतीय-संस्कृतये च परमं संरक्षणं प्रादुः । **'संस्कृत और संस्कृति'** इति नाम्ना तेषां व्याख्यान-संग्रहः संस्कृतस्य विषये शक्तिसम्पन्ना प्रभावपूर्णाऽधिकृता च रचना विद्यते—यस्या अध्ययनेन विश्वसाहित्ये मानवजीवने च संस्कृतेर्महत्त्वपूर्णं स्थानं स्पष्टं भवति । तस्य प्रत्येकं शब्दः प्रेरणाया मननस्य च विषयोऽस्ति । 'संस्कृत-विश्वपरिषदोऽध्यक्षस्य तथा **'अखिलभारतीय-संस्कृत-साहित्य-सम्मेलन'**स्य कलकत्ताऽधिवेशनस्य मुख्यातिथे रूपेण तेषामुद्घाटनभाषणे संस्कृतवाङ्मयस्यामूल्यौ निधी विद्यते । इयदेव नहि, पारस्परिकसंलापे तथा प्रत्येकं व्यवहारे भारतीयतां प्रति तेषां निष्ठयाऽस्माकं मस्तकं गौरवान्वितं भवति स्म, अतस्तेऽस्मभ्यमधिकं पूजनीयाः सन्ति ।

वस्तुतः संस्कृतस्य क्षेत्रे स्वातन्त्र्योत्तरकाले यत्किञ्चिदद्य दृष्टिगोचरं भवति—डॉ० राजेन्द्रप्रसादमहाभागास्तस्य जन्मदातारोऽभूवन् । **'संस्कृतविश्वपरिषदो'**ऽध्यक्षरूपेण प्रदत्ताः प्रेरणाः श्रद्धेय डॉ० **सम्पूर्णानन्दमहोदयेभ्यो** वाराणस्यां **'संस्कृतविश्वविद्यालय'**-स्य स्थापनायां सम्बलमदुः । दरभङ्गानगरे तेषामेवानुरोधाद् **'मिथिला-संस्कृतविद्यापीठ'**-स्य ततः परं दरभङ्गानरेशानां सहयोगेन **'कामेश्वरसिंह-दरभङ्गासंस्कृतविश्वविद्यालय**स्य शुभारम्भोऽभवत् । भारतसर्वकारस्य संस्कृत-विकास-प्रयासानां पृष्ठभूमौ तेषामेव

सङ्केता आधारस्तम्भाः सन्ति । देहल्यां तेषां प्रथमदर्शनस्य सौभाग्यं मई १९६२ ई० वर्षे मया स्वर्गीय-**पूज्य श्रीनरहरिविष्णुगाडगिल-श्रीबलवन्तनागेशदातार**-महाभागाभ्यां सह प्राप्तं यदा तान् जुलाईमासे कलकत्तानगर्यामामन्त्रितस्याखिल-भारतीय-संस्कृत-साहित्यसम्मेलनस्योद्घाटनाय निवेदयितुं वयं गता आस्म । तेऽत्यन्तं स्नेहेनास्माकं निमन्त्रणं स्वीकृत्य नवमतारिकायां कलकत्ता-महानगर्यां तदानीन्तने सर्वतो विशाले **'महाजाति सदन'**-नाम्नि सभागारेऽखिलभारतीय-संस्कृतसाहित्यसम्मेलनमुदघाटयन् । सम्मेलनस्याध्यक्ष्यं श्रीबलवन्तनागेशदातारा अकुर्वन् । प्रसिद्धा उद्योगपतयः **स्व० श्री-साहूशान्तिप्रसादजैनाः** सम्मेलनस्य स्वागताध्यक्षास्तथा **श्रीपट्टाभिरामशास्त्रिणः श्री-वेणीशङ्करशर्माणश्च** स्वागतमन्त्रिण आसन् । सम्मेलनं **श्रीअनन्तशयनमयङ्गार-श्रीनर-हरिविष्णुगाडगिल**-प्रभृतयो महानुभावा अलमकार्षुः । डॉ० राजेन्द्रप्रसादमहोदया यदा सभामञ्चमुपागतास्तदा सर्वतः प्रथमं कार्यं ते महामहोपाध्याय-श्रीगिरिधरशर्मचतुर्वेद-श्रीशशिनाथझा-विद्यावाचस्पतिसदृशां विदुषामासननिकटमुपस्थाय प्रणन्तुं प्रयति-तवन्तो यद्यपि स्वास्थ्यदृष्ट्या सुरक्षाधिकारिणस्तदर्थं सम्मता नासन् । स्वीये भाषणे तथा वैयक्तिक्यां चर्चायां तैर्देहल्यां राजधान्याः शोभानुरूपमेकस्य 'संस्कृतविद्यापीठ'-स्य स्थापनाय दानं दातुं प्रतिवेदनं कृतं तस्यैव परिणामस्वरूपेण दिल्लीनगर्यां संस्कृत-विद्यापीठं प्रतिष्ठितं यच्चाधुना 'श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठ'रूपे-णान्ताराष्ट्रियख्यातेः स्वरूपं बिभर्ति तथा तस्यैव विकासस्योत्तम-प्रतिफलनरूपेण राष्ट्रिय-संस्कृतसंस्थानं तदन्तर्गतानि चान्यानि केन्द्रीयसंस्कृतविद्यापीठानि वयं पश्यामः। यदि श्रीराजेन्द्रप्रसादमहाभागानां प्रेरणा नाभविष्यत् तर्हि न तु दिल्ली-विद्यापीठस्य स्थापना-ऽभविष्यन्न वा ततोऽग्र इमा विकसिताः संस्था दृष्टिगोचरा अभविष्यन् । कुरुक्षेत्रविश्व-विद्यालयोऽपि तैः संस्कृतायैव संस्थापितः—भवतु नामाग्रे गत्वा तस्य स्वरूपं परि-वर्तितम् ।

कलकत्ताधिवेशने ते पञ्चाशत्तोऽप्यधिकान् वेदविदुषो राजभवने समाहूय स्वपक्षतस्तेषां सम्मानमकुर्वन् । इयदेव न, अपि तु ते यदा राष्ट्रपतिरूपेण प्रथमवारं वाराणस्यां गतास्तदा विदुषां सम्मानाय एकस्याः 'पण्डित-सभा'या आयोजनमकार्षुस्तथा तत्र शतशः पण्डितानां सम्माननेन सहैव विदुषां प्रतिनिधित्वेन महामहोपाध्यायश्रीगिरि-धरशर्मचतुर्वेदानां चरणौ प्रक्षाल्याशीर्वादान् प्राप्नुवन् । सर्वोच्चसत्ताया विद्यायाः समक्षं प्रणतिं तथा भारतीयेतिहासस्यादर्शस्य पुनः प्रतिष्ठां विधाय तेऽस्य राष्ट्रस्याधुनिकानां शासकानां मार्गदर्शनमकुर्वन् ।

अधिवेशनस्य सम्पन्नताऽनन्तरं यदा त एकेन विशेषेण रैलयानेन कलकत्तातो दिल्लीं प्रस्थातुं सज्जा आसन् किञ्च विश्रमस्थलेऽनेके राज्यपाला न्यायाधीशा मन्त्रिणोऽर्बुदपतयश्चोपस्थिता अभूवन् । यानस्य प्रस्थानसमयो निकटमायातस्तदा ते श्रीगाडगिलमहानुभावमपृच्छन् क्व सन्ति 'मण्डनमिश्राः ?' अहं गवेषित स्तेषां समक्षञ्च प्रस्तुतः ते सम्मेलनस्य साफल्यमुपलक्ष्य मम पृष्ठं साधुवादैः परामृशन्, तथाऽकथयन् यद् 'इयान् विपुलः कार्यक्रमो जयपुरात् कथं चलिष्यति ?' (तदानीमहमासं, 'महाराज-संस्कृत-महाविद्यालये-जयपुरे प्राध्यापकस्तथा तत्रत्येष्ववकाशदिवसेषु गत्वा संस्कृत-सम्मेलनस्य कार्यमद्राक्षम् ।), तच्छ्रुत्वा श्रीगाडगिलमहाभागास्तथा श्रीदातारमहाभागा वचनमदुर्यद् वयं डॉ० मण्डनमिश्रं राजस्थानादाकारयिष्यामः। तत आगत्य शीघ्रमेव दातारमहाभागैस्तथा तेषामनन्तरं स्व० श्रीलालबहादुरशास्त्रिमहानुभावै राजस्थान-

सर्वकारतः संस्कृतभाषायाः सेवार्थं मदीयाः सेवाः सम्प्राप्तास्तथा दिल्ल्यां विद्यापीठ-स्थापनादारभ्याद्यावधिकानि कार्याणि सम्पन्नानि। एको महान् राष्ट्रपतिरेवेयतां महनीयपुरुषाणां मध्ये प्रस्थानसमये मादृशं साधारणं कार्यकर्तारं प्रष्टुं शक्नोति। एको महान् मनीष्येवेदृशीं चिन्तां कर्तुं शक्नोति यद् जयपुरे स्थित्वेयन्महत्कार्यमहं कर्तुं न प्रभविष्यामि—मम देहल्यां निवास आवश्यकः। ततः परमपि देहलीतः प्रस्थानानन्तरं सदाकत-आश्रमं यावत् ते विद्यापीठस्य तथा मम विषये तैर्विशिष्टजनैः स्थितिं समाचारांश्च पृच्छन्ति स्म।

इयं सर्वा घटना साम्प्रतमितिहासस्य सम्पत्त्वं प्राप्ता तथापि संस्कृत-विकासस्यायं विशालो वटवृक्षोऽद्य श्रीराजेन्द्रप्रसादमहाभागानामनुग्रहस्य साक्षी विद्यते। वयं सर्वे तेषां स्मृतौ श्रद्धा-सुमनोऽञ्जलिं समर्प्यात्मन एव गौरवं वर्धयामः। ते तु स्वीये जीवने मुक्तात्मान आसंस्तथा सम्प्रति सर्वथा देवरूपेण वन्दनीयाः सन्ति।

ईदृशानां वन्दनीयानां महापुरुषाणां प्रेरणा-प्रदेन कमनीयेन जीवनचरित्रेण संस्कृतज्ञा अपि प्रेरिता भवेयुस्तथा तदीयानामादर्शाणां पौनःपुन्येन स्मरणं विदधानाः संस्कृतभारतीरसिका आनन्दमनुविन्देयुरिति मनसि निधाय डॉ० रुद्रदेवत्रिपाठी **'राजेन्द्र-चन्द्रोदय-चम्पू'** रिति नाम्ना गद्य-पद्य-मिश्रामिमामभिनवां स्वीयां रचनां प्रस्तौति-इति परम-हर्ष-प्रकर्षस्य विषयः।

श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य प्रायोऽष्टादश-वर्षाणां दीर्घकालिक्यां सेवायां शिक्षा-साहित्य-दर्शन-पौरोहित्यादि-विभागेष्वध्यापनपूर्वकम्-अनुसन्धान-प्रकाशन-सङ्कायस्याध्यक्ष्यं निर्वहतः प्राध्यापकस्य डॉ० रुद्रदेवत्रिपाठिनः प्रारम्भादेव संस्कृतसेवायां निष्ठा सुदृढं सञ्जाता वर्तते। जन्मन एकविंशे वयसि संस्कृत-मासिकं पत्रं **'मालव-मयूर'**-नामकं सुसम्पाद्य प्रकाशयन्नयं संस्कृतभाषायां गद्य-पद्य-गीतिमयीनां रचनानां प्रणयने क्रमशः प्रौढिं प्राप्नोत्। शब्दालङ्कारानाश्रित्य गवेषणा-प्रवृत्त्या **पी-एच० डी०-डी० लिट्०** उपाधिभ्यां लिखितयोः शोधप्रबन्धयोस्तथा दूतकाव्य-लहरीकाव्य-गीतिकाव्य-विनोदकाव्यानां निर्मित्या स्वलेखिनीं परिष्कुर्वन् संस्कृतसेवा-ऽध्यवसायं च सम्पादयन् संलग्नमानसोऽस्माकं विद्यापीठेऽपि विंशति-पुस्तकानां विरचन-सम्पादनानुवादनानि व्यधात् तथा च **'शोध-प्रभा'**यास्त्रैमासिक्या अनुसन्धानविभागीयायाः पत्रिकायाः सम्पादनेन योगदानं कृतवान्।

'डॉ० **श्रीराजेन्द्रप्रसाद-जन्म-शताब्द-स्मृति'**-वर्षे निर्मितं प्रकाशितञ्चेदं 'राजेन्द्र-चन्द्रोदय-चम्पू'-काव्यं प्रचीनाचार्य-कविविरचितानां चम्पूनां सरणिमनुसरदपि कामपि नवीनां सरणिं श्रयति, यतो ह्यस्मिन् नास्ति तादृशः कोऽपि भाषाऽलङ्कारादीनां दुराग्रह-मिश्र आग्रहः। अत्र तु सरसया सरलया शैल्या भाव-प्रवाह-संश्लिष्टया भाषया चरित्रग्रथनं कृतम्। मध्ये मध्ये यानि पद्यानि विद्यन्ते तान्यपि प्रायेण सुभाषित-रूपाण्येव सन्ति। काङ्ग्रेसस्योदयकालादारभ्य स्वातन्त्र्योपलब्धिकालं यावद् घटितमितिहासं चरित्रेण साकमेव सङ्कलय्य 'एका क्रिया द्व्यर्थकरी' सम्पादिताऽस्ति। इत्थमस्यै महत्त्पूर्णायै राष्ट्रिय-रचनायै डॉ० त्रिपाठिनं धन्यवादवचोभिरभिनन्दयामि तथा पाठकानां हस्तयोः पुस्तकं समर्प्यास्या रचनायाः सौष्ठवमास्वादयितुमाजिघृक्षामि।

नवदेहली,
दि० ३-१२-८४

—**डा० मण्डनमिश्रः**
प्रधानसम्पादकः

आद्यं नैवेद्यम्

अयं संवत्सरः सर्वात्मना राष्ट्रसेवार्थं समर्पित-सर्वस्वस्य सकलगुणगण-निलयस्य परममान्यस्य धन्यस्य स्वतन्त्रभारतस्य प्रथमस्य राष्ट्रपतेः श्रीमतो **राजेन्द्रप्रसाद-महोदयस्य** जन्मशताब्दपूर्तेः स्मारकः। समस्तेऽपि भारते महापुरुषाय तस्मै स्वीयान् कृतज्ञता-सौरभ-संवलितान् स्मृति-सुधासंसिक्तान् विनम्रान् श्रद्धाञ्जलीनर्पयितुं भारतीया नितान्तमुत्सुकाः सन्तो विलोक्यन्ते यावच्छक्यञ्च प्रयस्य स्व-स्व-सामर्थ्यानुरूपं किमपि नवीनं कलयितुं बद्धादराः सन्ति।

नवदेहलीस्थितं **'श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठं'** वस्तुतस्तस्यैव महामहिम्नः संस्कृत-संस्कृति-सेवा-हेवाकिनः परमोदारायाः कृपाया एव परिणतं फलम्। संस्कृतं प्रति महतीं श्रद्धां धारयन् स नितान्तमेवाकामयत सुप्रचारं प्रसारं च तदीयम्। तस्यैव महात्मनः प्रेरणया कलकत्ता-महानगर्यां सम्पन्नस्याखिलभारतीयसंस्कृतसाहित्य-सम्मेलनस्याधिवेशने समवेतैः पुण्य-पुरुषैर्विद्यापीठ-स्थापनायाः पवित्रः सङ्कल्पः कृत इत्यस्ति नातितिरोहितं विपश्चिदपश्चिमानाम्।

संस्कृत-जगतो दीप्तिमति नक्षत्रेऽस्याः शोधप्रभायाः प्रधान-सम्पादके प्रारम्भा-देवासीत् तदीयो निर्व्याजः स्नेहः। यथाकालं संस्कृतभाषायाः समुन्नयनाय विधीयमानां प्रगतिं परिचेतुं तथा तद्विषयेऽपेक्षितानां साधनानां पूर्तये **डा० मण्डनमिश्रमहाभाग**माकार्य ते पृच्छन्ति स्म निर्दिशन्ति स्म च। एवंविधस्य सर्वात्मना संरक्षकस्य तस्य संस्कृतानुरागिणः स्मृतौ विद्यापीठात् प्रकाशमायान्त्यास्त्रैमासिक्याः **'शोध-प्रभा'**-पत्रिकाया 'विशेषाङ्क-प्रकाशन-योजना' निर्मिता सा सर्वथा समुचितैवावर्तत। तस्यामेव योजनायां श्रीमतां राजेन्द्रप्रसादमहानुभावानां जीवनचरित्रं प्रचिकाशिषया डा० मण्डनमिश्रमहाभागैरहं प्रेरितः। अहं तादृशां महनीयानां चरित्रं पाठं पाठं बहोः कालाद् बद्धश्रद्ध आसमेव। अवसरमिमं च सम्प्राप्य द्विगुणितेनोत्साहेन सहित्य-संग्रहपूर्वकं **'चम्पू'**काव्यमयं चरित्रं विरचयितुं प्रवृत्तोऽभूवम्। यतो हि—

गीतायां भगवता कृष्णेन सात्त्विकस्य कर्त्तुः। कार्यकर्तुर्वा व्याख्यैकाऽर्जुनायोपदिष्टा ऽस्ति। यथा—

मुक्तसङ्गोऽनहङ्कारी धृत्युत्साह-समन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते॥१८।२६॥

अस्मिन् पद्ये दर्शितानां सात्त्विकस्य कर्त्तुर्गुणानां लक्षणानां वा सामस्त्येन निदर्शनं यदि भारतीय-नेतृषु कस्मिंश्चित् परिलक्षितुमभिलषामस्तर्हि सहसैव स्वर्गीये श्रीमति महामहिमनि राजेन्द्रप्रसाद-महानुभावे दृष्टिः स्थिरतां भजते। वार्तमानिके युगे वास्तविकं सात्त्विक-कर्मसाधकरूपेणावतीर्णस्य श्रीराजेन्द्रप्रसादस्य सकलमपि जीवन-वनं सात्त्विककर्मरूप-पादप क्षुप-लतिकादिततिभिर्विलसितं शाखा-प्रशाखाभिरू-र्जस्वलं पत्र-पत्रिकादिभिर्हरितं भरितं नानाविधैः सुमनोभिः सुरभितं तथा नैकविध-रस-सम्पत्-सम्भृत-फलैः फलितमेवाभवत्। नन्दनवनवन्नित्यं सहृदय-हृदयानन्दकरं

तदीयं जीवनं सर्वतः सात्त्विकतां बिभ्रदासीदिति यतः कुतोऽपि वीक्षामहे ततस्ततः सत्यमेव प्रतीयते ।

जन्मनः प्रभृत्येवार्योचितान् समृद्धान् संस्कारान् सम्प्राप्य विद्याध्ययन-समाजसेवा-राष्ट्रसेवा-कर्तव्यपालन-दायित्वनिर्वाह-नेतृत्वसम्पादनादि-कर्मसु निरन्तरं वर्धमानेन तेन यानि यान्यनवद्यानि कर्माणि दीर्घकालं यावद् विहितानि तान्यद्य न केवलं भारतीयेभ्य एवापि तु विश्वस्मिन् विश्वे निवसद्भ्यो राजनीतिक-सामाजिक-कार्यकर्तृभ्यो मार्गदर्शकानि विद्यन्ते। महात्मगान्धिनामेकान्तिको भक्तः श्रीराजेन्द्रप्रसाद-महानुभावो गान्धिवादस्य गान्धिदर्शनस्य वा साकारमूर्तिरासीत् । तदीया कर्तव्यदृष्टिर्गान्धिदर्शनमयी व्यराजत। ततश्च सः —

अहिंसा-सम्पृक्तामसहयुत-सत्याग्रह-धुरां,
दधानो राजेन्द्रो भरतभुवि जागर्तिमकरोत् ।
समाजे स्थायित्वं विविधकृतिभिर्निर्भयतया,
सुसम्पाद्योद्देश्यं प्रति समनयद् देशजनताम् ॥ (रा०च०च०)

राष्ट्रसेवाव्रतिनो देशरत्नस्य तस्य महात्मनो दृढा निष्ठाऽऽसीत् कर्मयोगे। '**कर्मण्येवाधिकारस्ते मा फलेषु कदाचने**'ति गीतोक्तिस्तस्मिन् सर्वात्मना फलिताभूत्। स वाञ्छति स्म यत् —

यस्मिन् कर्मणि कापि नैव नियता वृत्तिः स्वदेशोन्नते—
र्नो वा देशनिवासिनां हितकरी काचित् प्रवृत्तिः स्थिरा ।
किं वा यत्र न विद्यते परिणतेर्ध्रौव्यं क्रिया-पद्धतौ,
सा व्यर्थेति विचार्य कुर्युरनिशं विज्ञाः स्वकीयाः कृतीः ॥ इति ॥ (तत्रैव)

ईदृशस्य तपोधनस्य रचनात्मककार्य-साधकस्य जीवनेन पुरोवर्तिनः प्रेरणाः प्राप्नुयुः, स्वं जीवनं समुन्नमयेयुः, कर्तव्यपथं परिचिनुयुः, स्वदेशसेवाः सम्पादयेयुस्तथा विनम्र-भावेन कृतकृत्यातामनुभवेयुरिति शुभाशया स्मृति-पर्वाभिलक्ष्य मम मनसि कश्च-नोत्साह-ज्वार उद्वेल्लनं प्राप्नोत् । 'संस्कृतभाषाया आश्रयेण महनीयस्यास्य स्वर्गत-राष्ट्रपतेः श्लाघनीयं चरित्रं लिखेय'मिति धिया च '**राजेन्द्र-चन्द्रोदय-चम्पू**'काव्यं निर्मातुं सन्नद्धोऽभूवम् । परेशकृपया चरित्रात्मकं चम्पूकाव्यमिदं सम्मुद्र्येदानीं पाठकानां करकम-लेषु प्रस्तूयते ।

प्राक्तना आचार्याश्चम्पू-निर्मितौ परमं प्रावीण्यं प्राचीकटन् । 'प्रौढगद्येन सहैव सुश्लिष्टानां समासाढ्यानां पद्यानां संयोजना' तेषां दृष्टौ चम्प्वाः प्राणा आसन् । अपा-रस्य शब्दराशेरुन्मुक्तप्रयोगेण रचितानि चम्पूकाव्यानि संस्कृत-सहित्ये भूयांसि लभ्यन्ते, तथापि रूढिभूतस्य चम्पू-काव्य-रचना-विधानस्य कामपि सरलां पद्धतिं प्रस्तोतुकामेन मयाऽत्र कल्पना-विलासापेक्षया वास्तविकस्य निदर्शनायैव प्रयतितम् । साम्प्रतिकाः पाठकाः किल शब्दाडम्बरं न बहु मन्वते, याथार्थ्यं वेत्तुकामाः कल्पनाटव्यां भ्रमितुं नेहन्ते, अस्तु तत्र तेषां रुचेर्ज्ञानस्य वाऽल्पत्वम् ?

इयमप्येकोत्कण्ठा मामित्थं कर्तुं प्रैरयद् यत् संस्कृते राष्ट्रिय-चेतनोद्बोधकानां चरि-त्राणां न्यूनतैवास्ति किञ्च यानि चरित्राणि काव्यानि वा सन्ति तानि काठिन्यभियाऽऽधु-निकाः पठितुं न चेष्टन्ते । अतः सितशर्करासाधीयस्या नीत्याऽप्यत्र 'राजेन्द्र-चन्द्रोदय-

चम्पू'-प्रबन्धे नातिदीर्घसमासाढ्यानां नातिगूढार्थानां न चातिकल्पनाविजृम्भितानां पदानां प्रयोगा विहिताः। अथ चात्र पद्यान्यपि तादृंशि विनयोजितानि सन्ति येषां पृथक् पृथक् पठने सति सुभाषित-पद्यावलीवानन्दानुभवोऽपि भवेत्। राष्ट्रियेतिहासस्य वर्णने बहवः शब्दास्त एव समादृता ये वैदेश्यभाषायाः सन्तोऽपि लोकभाषायां प्रयुज्यन्ते।

चन्द्रमसः षोडश कलाः प्रसिद्धाः। तासां कलानां नामभिरेव षोडश-भागेषु चम्पूरियं सङ्ग्रथ्य प्रतिभागं प्रसङ्गोचितेन भावसंवलितेन वैदिक-मन्त्रेणापि मण्डिता।

अत्र चरित्रसङ्ग्रहणेऽपि माधुकरी वृत्तिरेवाश्रिता विद्यते। हिन्दीभाषायां स्वयं श्रीराजेन्द्रप्रसादमहानुभावैर्लिखिता आत्मकथा' भारतशासनद्वारा मुद्रिता 'डॉ० **राजेन्द्र-प्रसाद**'-**चित्रावली, भाषण-सङ्ग्रहादयश्च** श्रीकालीशङ्करदत्तरचितं **'राजेन्द्रप्रसाद'**-पुस्तकं च ममास्मिन् कर्मणि साहाय्यमकार्षुः। **'डॉ० ज्ञानवतीदरबार'**-महाभागाभिः सङ्कलितं 'स्वतन्त्र भारत की झलक' पुस्तकं तथा ताभिरेव प्राप्तः परामर्शोऽपि मदीयोत्साहवर्धनेऽतीव सहायकोऽभूत्। इत्थमेतेषां चरित्रलेखकानां परामर्शदात्रीणाञ्चाभारं सधन्यवाद-मूरीकरोमि।

मम श्रेयसीषु साहित्यसाधनात्मिकासु प्रवृत्तिषु मूलतः प्रेरकाणां राष्ट्रपति-सम्मानित— 'राष्ट्रिय-संस्कृत-संस्थान-निदेशकानां 'विद्यापीठस्य प्राचार्याणां शोधप्रभायाः प्रधानसम्पादकानां' — डॉ० **मण्डनमिश्रमहाभागानां** परमोऽनुराग एवात्र **'राजेन्द्र-चन्द्रोदय-चम्पू'**-निर्मितौ तत्प्रकाशने च साहाय्यमचीचरदिति पौरोभाग्य-सौभाग्यं कृतज्ञताज्ञापनेनाल्पं न भवेदिति भियाऽन्तरेवान्तरुपकृतिभरं बरीभरीमि।

विदुषामाश्रवः
डा० रुद्रदेवत्रिपाठी
लेखकः सम्पादकश्च

राजेन्द्र-चन्द्रोदय-चम्पूः

[महामहिम-डॉ० राजेन्द्रप्रसादस्य जीवनचरित्राञ्चिता]

***

सत्य-त्याग-तपः-समत्व-शुचिता-निर्भीकताः शिक्षयन्,
कर्तव्यं प्रतिबोधयन् स्वचरितैरन्तर्बहिः स्पष्टयन्।
राष्ट्र-व्याप्त-तमस्तर्तिं च तिरयन् दीनान् समाह्लादयन्,
स्वच्छे व्योम्नि सुधांशुभिर्लसदभूद् 'राजेन्द्र'-चन्द्रोदयः'॥

***

डा० रुद्रदेवत्रिपाठी

स्वातन्त्र्य-मङ्गलम्

गरीयसी गुरोर्मूर्तिः पूर्तिर्मङ्गलकर्मणाम् ।
आविरस्तु स्वात्मतन्त्रा दीपयन्ती ममान्तरम् ।।१।।

समेधित-समृद्धिमान् सकल-सिद्धि-सम्पत्प्रदः,
सुरासुर-समर्चितः श्रुत-सरस्वती-संस्तुतः ।
स सिन्धुर-समाननः श्रित-समुच्च-सिंहासनः,
सदा सुमतिदोऽस्तु नः सुखकरः 'स्वतन्त्रः' सताम् ।।२।।

सर्वज्ञा ब्रह्मरूपा निखिल-सुरगणैरीडिता नित्यतृप्ता,
विष्णवात्माऽनादिबोधाऽरुणवसनधरा रुद्ररूपाऽतिरक्ता ।
नित्यं या चास्त्यनन्ता शिवमयवपुषा सर्वरूपा ह्यनन्ता,
काचित् सा चित्स्वरूपा कलयतु कुशलानीश्वरात्मा 'स्वतन्त्रा' ।।३।।

यत्रान्तः शान्तिवातः प्रवहति विमलं व्योम छत्रं तनोति,
नीरं क्षीरं च पीत्वा प्रमदमनुभवन्त्यञ्जसा यत्र लोकाः ।
तेजस्तिग्मं दधाना, सुखयति सकलान् सर्वतः शोभमाना,
मातुर्मृद्वङ्करूपा जयति जगति सा भारती-मातृभूमिः ।।४।।

आद्यं मानव-संस्कृतेः प्रथमतः स्रोतो यतः प्रावहद्,
यस्या विश्वजनीन-विस्तृतिविधौ यत्नश्च सम्पादितः ।
रक्षायामपि नित्यशः प्रहरिवज्जागर्तिरासादिता,
तत्त्वज्ञान-विसारि भातु भुवि तच्छोभारतं भारतम् ।।५।।

ज्ञानं शौर्यं मनोवाक्तनुभिरनुदिनं पौरुषप्राप्ति-यत्नं,
विज्ञानं यत्र चित्रं प्रथितमतियुतं वीर्य-तेजोऽभिवृद्धिम् ।
ब्रह्म-क्षत्रार्य-तुर्याः प्रगति-धिषणया संवसन्तो निषादा,
अध्वन्याः पाञ्चजन्या विदधति नितरां तद्धि धन्यं स्वराष्ट्रम् ।।६।।

साम्यं सौम्यं समेषां सुषमितमखिलं साधु संसाधयन्ती,
सध्रीचीनान् सजोषं समिति-सृति-दिशाऽऽशंसमानाऽसमाना ।
सत्ये संयोजयन्ती जयति जगति या साम्मनस्येन सम्यक्,
सा नो भूमिः समन्तात् सृजतु सुखततिं सर्वतन्त्र-स्वतन्त्रा ।।७।।

—डा० रुद्रदेवत्रिपाठी

अमृता-कला

माता भूमिः

यत्ते॒ मध्यं॑ पृथिवि॒ यच्च॒ नभ्यं॒ यास्त ऊर्ज॑स्त॒न्वः सम्बभू॒वुः।
तासु नो धेह्य॒भि नः॑ पवस्व मा॒ता भूमिः॑ पु॒त्रो अ॒हं पृ॑थि॒व्याः॥

(अथर्ववेदे भूमिसूक्तं-१२।१।१२)

**

हिमवद्भूषितमुकुटा, शाद्वल-वलयितमध्यभागरम्या।
जलधिक्षालितचरणा, शरणा भारतावनिर्भवतु ॥१॥

भारतीयानां स्वान्तानि मातृभूमेर्यस्याः प्रतिमायाः कल्पनाः सज्जयन्ति संस्कुर्वन्ति समायोजयन्ति समाकलयन्ति प्रारम्भादेव सदम्भं प्रकटयन्ति[१] च वरीवृतन्ति तासु नदा नद्यो ह्रदाः समुद्राः पर्वताः पादपाः पन्थानः प्रान्तराणि रजःकणान्येव च न भवन्ति, प्रत्युत तस्यां विहितवसतयो वसुन्धरातनयाः, श्रमशिल्पिनः, सांस्कृतिक-चेतनावन्तः सारस्वत-साधना-सम्पन्ना, विज्ञान-वित्तिमन्तो विपश्चिदपश्चिमाः, स्वराष्ट्रस्य शाश्वतिकीं शान्तिं समृद्धिं च साधयितुं श्रमनिष्ठा-सहकार-सहजीवन-सद्व्यवहार-सदाचारादिभिश्च समुन्नतये सामञ्जस्यसमन्वितां सन्तुलितां दृष्टिमुद्घाटयन्तोऽपि समुल्लसन्ति।

दृष्टिष्वपि वैविध्यं तु विराजत एव, तथापि 'यादृशी दृष्टिस्तादृशी सृष्टि'रिति किंवदन्ती किमपि वदन्ती सती सत्यमेव साक्षात्कारयति। धर्मानुरागिभिरस्या भूमेर्मानचित्रं भौगोलिक्या कल्पनया वैदिककालिके पारम्परिके विवेचने— 'सप्तसिन्धु-सप्तनदी-सप्तपर्वत-सप्तपुरी-सप्तप्रदेशा'-दिभिरतीव स्पष्टतया पुरस्कृतम्। भाषा-भूषा-संस्कार-संस्कृति-प्रथा-परम्पराऽऽचार-विचारादि-वैविध्यं वैषम्यं च नानावर्णपुटी-चित्रपटी केनाप्यद्भुतेन साम्येन भरतभुवस्तनूं भूषयति। सह्याङ्ग-बङ्ग-कलिङ्ग-कोशल-विदेह-प्राग्ज्योतिषोत्कल-केरल-मरु-सुराष्ट्रादि-जनपदानां लोकाचार-लोक-संस्कृति-लोकगाथाश्च यथावत् परिपालनेन सम्भागीयमाञ्चलिकञ्च विभाजनं भजन्त्योऽपि भुवो मानदण्डस्य कार्मुकवद्गुणयुक्तस्य हिमाद्रेः

---

१. स्वान्तानीत्यस्य विशेषणानीमानि।

संरक्षणे परःसहस्त्राणां वर्षाणां द्वन्द्वात्मकमतीतं तद्गतमूहापोहं च परिशील्य मातृत्वमुल्लासयन्ति। अत एव—

नानाविधेषु बहुधा परिवर्तनेषु, राज्येषु भूरि-नृपवंशजशासनेषु।
पार्थक्यकारिषु च विप्लववत्सु सत्सु, कर्मस्वपोह विकृता नहि मातृभूमिः ॥२॥

भौगोलिकं भवति भेद-विधानमूनं, नूनं समृद्धसहकारविचारकेभ्यः।
धृत्वान्तरं विशदमानसमैक्यभावं, संसेविता सृजति शं मम मातृभूमिः ॥३॥

इयं भूमिरेका महादर्शभूमिर्विधातुः कृतिः कापि चित्राऽद्वितीया।
जलस्याथ वायोः स्थितिश्चापि दिव्या, निसर्गेण रम्या द्विषामस्त्यगम्या ॥४॥

अत्र हि प्राकृतिकानि दृश्यानि नितान्तं रमणीयानि वर्तन्ते। अस्यां वहन्तीनां नदीनां नीराणि सुधासमानानि सुमधुराणि सन्ति। नदीनां तटेषु महान्ति नगराणि शोभन्ते। धनधान्यानां वैपुल्यं पुरातनकालादेव सुस्थिरं मन्यते। अरण्यानां हरिततृणसङ्कुलानि कुलानि स्वीयानि सौभाग्यानि स्वयमेव व्यञ्जयन्ति। समतला चतुरस्रा सैकतिला शाद्वतिला च पृथिवी पृथक् पृथक् स्वकीयां सुषमां बिभर्ति। हरितानि भरितानि क्षेत्राणि स्वच्छन्दं प्रसरन् समीरणश्च स्वातन्त्र्येण स्वं स्वं रूपमुपस्थापयन्ति।

जीवा जन्तवो भाषा भूषाः सर्वेऽपि विस्मयतां वर्धयन्ति तथा परम-वीराः साम्राज्यसंस्थापका राष्ट्ररक्षादक्षा नेतृमणयो हुतात्मनो धर्मप्रवर्तका आचार्या अपि भारतवसुन्धरामिमां विभूषयन्ति। किञ्च—

धरातलेऽस्मिन् किल भारतीयाः,
किमस्ति वस्तु प्रथितं च तादृक्।
यदाप्तये कृच्छ्रतरं विधाय,
प्रयत्नमारान्न चिराल्लभन्ते ? ॥५॥

एशियामहाद्वीपस्य दक्षिणस्यां दिशि स्थितेषु त्रिषु प्रायोद्वीपेषु मध्य-वर्तिप्रायोद्वीपोऽस्ति भारतदेशः। अस्य विस्तारः खलु यूरोपस्य महाद्वीपवद् विद्यते। हिमालयस्य पर्वतीय-प्रदेशेनोत्तरभारतस्य समतलेन भूभागेन दक्षिणस्योन्नतभूविभागेन च भारतभूमिस्त्रिभिः प्राकृतिक-विभागैरञ्चिता भवति।

आसीद् वैदिककालानन्तरमत्रोत्तरवैदिककाले राज्यमार्याणाम्। युद्धप्रिया उत्साहशालिनो राज्यसंस्थापका आर्यवीराः क्रमेण (१) कुरुक्षेत्र[१]-

---

१. मेरठ-दिल्ल्योर्निकटस्थः प्रदेशः।

(२) पाञ्चाल[१]- (३) मत्स्य[२]- (४) कोशल[३]- (५) काशी[४]- (६) विदेह[५]- (७) चेदि[६]- (८) मगध[७]- (९) विदर्भ[८]- (१०) शूरसेन[९]-नामभिःस्वीयानि राज्यानि विभज्य शासति स्म । ततोऽग्रे बौद्धानां तथा जैनानां काले राज्यानीमानि षोडश राज्येषु विभक्तान्यासन् । एतेषु १-वृजीराज्य[१०]- २-मल्लराज्य[११]- ३-अश्मकराज्य[१२]- ४-अवन्ति[१३]राज्यानि च विशिष्टान्यभूवन् । एषा राज्यपरम्परा क्रमशो वर्धमाना षोडशत्वं प्राप्यापि न व्यरमत । अत एव तदानीं शाक्य-भर्ग-बुलि-कालाय-कोलिमल्ल-मौर्य-विदेह-लिच्छवीनां प्रजातन्त्रात्मकानि राज्यान्यपि विस्तृतिं प्राप्तान्यासन् ।

'यथा-यथा शासकानां बाहुल्यमुपजायते तथा-तथा राज्यपद्धतयोऽपि नवीनानि रूपाणि धारयन्ति ।' भारतभूमौ भूयांसो राजानो युधिष्ठिरादग्रे शासनं चक्रुः । कालान्तरेणात्र वैदेशिकानामाक्रमणानि समजायन्त तेषु सिकन्दरस्याक्रमणं प्रथममभूत् । आसीत् स काल ईसातः ३२६ वार्षिकः पूर्वतनः । ततः स्वदेशीयैर्विदेशीयैश्च शासनानि सञ्चालितानि । चन्द्रगुप्त-मौर्य-सम्राज् अशोक-पुष्यमित्र- शुङ्ग-वसुदेव-काण्वानां शासनानि प्रावर्तन्त । मौर्यसाम्राज्यस्यास्तङ्गत्या यूनानवासिनः सीथियनाः शकाश्च शासका अभूवन् । एवमेव पार्थियन-कुशाण-कनिष्क-भारशिव-वाकाटक-गुप्तहूणराज-कुल-वंश्यानां राज्यान्यवर्तन्त ।

ततः परं ७१२ तमेशवीयवत्सरे **'मुहम्मद बिन कासिम'**—नामकेन यवनेन स्वीयानुयायिभिः सह सिन्धुप्रान्तमाक्रान्तम्, किन्तु तेष्वेव दिवसेषु 'राजपुत्रैः' स्वदेशस्य रक्षायै बहु प्रयस्तम् । राजपुत्रवंश्यानामिवैव पाल-प्रतीहारप्रभृतिवंशीया अपि राजानो यवनैः सह युद्ध्वा भारतभुवमाक्रान्तृहस्तेभ्योऽरक्षन् ।

नैरन्तर्येण यवनैर्विहितान्याक्रमणानि भारतस्य पारतन्त्र्ये हेतुभूतान्यभूवन् । तदानीं यावदागतानामाक्रान्तॄणां मनःसु मूलतः शासनेच्छैव बलीयस्यवर्तत । सा तैः साधिता । परं भारतीयानां दयादाक्षिण्यमूला संस्कृतिस्तेभ्य आश्वासयित्री सती तानात्मसात्कर्तुमपि नाशङ्कत । अत एव बहवो वैदेश्याः

---

१. फर्रुखाबाद-कन्नौजयोः समीपस्थो भागः । २. जयपुर(राजस्थान)स्य समीपवर्ती, ३. अवधस्याधिकांशः । ४. वाराणसी । ५. उत्तरीबिहारप्रदेशः । ६. वर्तमानबुन्देलखण्डः । ७. दक्षिणी-विहारस्य-प्रदेशः । ८. बरारनाम्ना ख्यातः । ९. मथुराजनपदीयो भागः । १०. लिच्छिविविदेहराजकुलानां प्राधान्ये वैशाल्याम् । ११. कुशीनगर पावास्थ-मल्लानां स्वतन्त्रम् । १२. गोदावर्यास्तटे । १३. उज्जयिन्याम्-माहिष्मत्यां च ।

शासका अत्रागत्यात्रत्या एवाभवन्। नामभिरेव न, अपितु वर्तनेनापि ते भारतीया एव संवृत्ताः। अद्यापि तेषु केचन भारतीयसंस्कृतौ श्रद्दधाना अत्रैव वसन्ति भारतीयताञ्च भजन्ते। तानेवालोक्य केचन चिन्तयन्ति, यद्—

अस्तीदृशं किमपि भारतभूमिभागे,
तत्त्वं यतो विहितभूरितरापराधाः।
वैदेशिका अपि रिपुत्वमपास्य भक्त्या,
लब्ध्वाऽऽश्रयं ससुखमत्र पुनर्न यान्ति ॥५॥

वयञ्चैवमाकलयामः —

साम्मनस्यमिदमेव विश्वतो, विश्वमाश्वसिति नित्यमुन्मुखम्।
बन्धुतां च विदधाति भारतं, निर्वहत्यपि च तां प्रयत्नतः ॥६॥

अपि च—

भारतीयजनताऽपि सदैवं, वाञ्छतीह सकलैरपि तद्वत्।
दुष्ट-दृष्टिरिह नैव निधेया, प्रीतिरेव सुदृशाऽत्र विधेया ॥७॥

परं मानवेषु मानवत्वेन सह दानवत्वमपि क्वचिद् निगूढं तिष्ठति यच्च सति समये स्फुरितं सत् स्फारयति कलुषितान् विचारान् स्फोरयति च कुत्सितान् विकारान्। कर्बुरयन्ति सुकुमारां प्रतिकृतिं बर्बराः खर्वयन्ति विशालां प्रतिमां प्राप्तगर्वाः प्रदूषयन्ति च सौमनस्यं सौरभं स्वार्थदूषिताः। विस्मरन्ति च —

अनुराग-विजृम्भितानि मौनं, सहते साधुजनः प्रपीडनानि।
न पुनः प्रतिरागजानि नूनं, सहते किन्तु मनागपीक्षितानि ॥८॥

तथापि —

कर्मक्षेत्रे धृतपदा भारतीया दयालवः।
सर्वेषामपि हितं कर्तुं तत्परा एव सर्वदा ॥९॥

***

पराधीनतान्धकार-प्रसारः

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ॥
ततो भूय इव ते तमो य उ विद्यायां रताः ।
(शुक्लयजुर्वेदसंहिता, ४०/१२)

दुर्नीतेः सहन-प्रवृत्तिरलसा वृत्तिर्निवृत्तिः कृतौ,
दुर्वृत्तिः स्वजनेषु सन्ततमथ व्यावृत्तिरात्मोन्नतौ ।
आवृत्तिर्व्यतिरोपणे समुदयेऽसंवृत्तिरुद्वेगजा,
स्वीयानामपवृत्तिरुद्गमयते नित्यं पराधीनताम् ॥१॥

अस्तं गतवति गभस्तिमालिनि शनैः-शनैः सायं सन्ध्या प्रवर्तते। स्वच्छः प्रकाशोऽप्याकाशादवनीतलं यावत् पाटलिमानं गच्छति। नैशं तमः स्तारयति तरसा स्वीया असिता असिततरा असिततमाः क्रमशः पक्षतीः। अञ्जन-लिप्ते इव दृश्येते द्यावाभूमी। बाह्येन कालुष्येण सह दुर्जनानाम-न्तरङ्गमपि कालुष्यमात्मसात् करोति। एवं सर्वत्र प्रसरति साम्राज्य-मन्धकारस्य।

विशालान्धकारस्य साम्राज्ये प्रभवन्ति तामसा भावाः। उद्भवन्ति क्षीणक्षीणा अपि। पराभवन्ति पराक्रमशालिनोऽपि। सम्भवन्ति कर्माणि दुःशकान्यपि। विभवन्ति दुर्दैवदलिता दरिद्रा अपि। गौरा अपि कृष्णतां व्रजन्ति। परित्यजन्ति सुधियोऽपि कुधियामिव विवेक-विचार-सञ्चारान्। अयमेवान्धकारो यदा शासने प्रवर्तते, शासकेषु प्रवर्धते तदा प्रजाजनानां पीडा प्राबल्यं भजते। स्वार्थान्धानां वैदेशिकानां शासनमपि तादृशमेव तमस्ततिसङ्कुलमभूत्। भारतीया अन्तरेवान्तः खिन्न-खिन्नास्तुन्न-तुन्ना अवर्तन्त। आक्रान्तॄणां वैदेशिकानामाक्रमणैरुत्क्रान्ता सस्य-श्यामला भारत-वसुन्धरा क्रमशः पददलिता सती म्लानम्लाना दिनान्यत्यवाहयत्। विस्था-पिताः प्रवासिन आक्रान्तारो वा— ये केचनात्रोपायाता— अत्रैव स्थिरावासा अभवन्।

यवनानां शासनकाले सप्तदश्यां शत्यां पुर्तगाल-डचाङ्ग्रेज-फ्रान्सीया व्यापारिणो भारतस्य वैभवकथाभ्यः समाकृष्टान्तःकरणा व्यापार-माध्यमेन धनान्यर्जयितुमुत्का विशेषतोऽत्र प्रविष्टाः। तेषामाकर्षणस्य कारणं तु **'वर्नियर'**-नाम्नः फ्रान्सवासिनः पर्यटकस्य कथनानुसारमिदमासीत् —

अभूद् भारतं कूपमीदृग् गभीरं, समन्तात् समेति स्म यस्मिन् हिरण्यम्।
परं कोऽपि नापारयत् तद् ग्रहीतुं, ततो विश्वमाकृष्टमासीत् तदानीम् ॥२॥

स्वर्णचटकिका भारत-वसुन्धरेति सन्धारयन्तस्ते धैर्येण धरामिमामुपेत्य धीरया धियाऽऽत्मसात्कर्तुकामाः कामं कमनीयया कलया कौशलेन च प्रतिकोणं प्रसृताः। न केवलं प्रसृता एवापि तु भारतीयानां जीवन-पद्धतिं विचार-सरणिं सदाचार-प्रकृतिं च विकर्तुमेव प्रवृत्ताः। परमासीत् तदानीमष्टादशशत्यां भारते मुगल-शासकानां समृद्धि-शक्ति-गौरव-गरिम्णां समुन्नतः शासनकालः। अत एव ते देशस्य राजनीति-प्रक्रियायां कथमपि हस्तक्षेपं कर्तुं नापारयन्।

३१ दिसम्बर १६०० तमेशवीयवत्सरे ब्रिटेन-महाराज्ञ्या एलिजाबेथ-प्रथमायाः प्राप्तेनैकेनादेश-पत्रेणाङ्ग्लव्यापारिणां दलमेकं भूयो भारतमुपेतम्। क्रमेणैतदेव दलम्—**'ईस्ट इण्डिया-कम्पनी'** नाम्ना घोषितम्। स्वस्याधिकार-व्यापाराणां क्षेत्रं क्रमेण वर्धयद्भिरस्य दलस्याधिकारिभिः शीघ्रमेव भ्रष्टाचारस्य वागुरा विस्तारिता मुगल-शास्तारोऽमात्याः कर्मकराश्चोत्कोच-प्रलोभनादानैर्वशीकृताः। १७०७ ई० वर्षेऽवरजङ्गस्य मृत्योरनन्तरमाङ्ग्लैः परस्परं विद्वेष-वासनाः समुत्पाद्य क्षुद्रराज्यशासकान् विरोध्य केन्द्रस्य शासनं च क्षीण-क्षीणं विधाय स्वार्थसाधनं विहितम्। तदानीन्तनीं स्थितिं विवेचन्त इतिहासकारा एवं विशदयन्ति —

शवं दृष्ट्वा गृध्रा भुवि निपतितं त्रातृरहितं,
यथोत्प्लुत्योत्प्लुत्य प्रसभमभिकृन्तन्ति नितराम्।
तथा यूरोपीया अपि गतघृणा भारतभुवं,
वशीकर्तुं सक्ताः प्रखरनखरास्ते समभवन् ॥३॥

कृतमतिशिथिलत्वं हन्त! तैर्भारतीयैः,
स्मृतिपथमपि यातं पीडयत्यन्तरङ्गम्।
परिणतिरपि सैवाद्यावधिः प्राघुणानां,
प्रभवति बहुधाऽस्मत्संस्कृतावप्यजस्रम् ॥४॥

ईशवीये १७५७ तमे वर्षे प्लासी-युद्धे वैदेशिकैरेतैर्वञ्चनोत्कोचनच्छलनाभिः शासकः **'सिराजुद्दौलाः'** पराजितः। तदा प्रभृत्येवाङ्ग्लानां भारते साम्राज्यस्याधारशिला न्यस्ता। ततः परं तु नैकशः शास्तारः परस्परं विद्वेष्य बलिपदवीमानीताः। मुगलाधिशास्ताऽपि तादृशीं स्थितिमुपनीतो यया स केवलं केषाञ्चिदेव प्रशासन-विधानां सञ्चालकः सन् नानाविधशुल्कप्रदानेनाधमर्णः समवर्तत। आङ्ग्ल-मुगलयोर्द्वैधं प्रशासनमिदं सन् १७६५ तः १७७२ ई० यावदस्थात् तदन्तरालमेव देशवासिनां यादृशं भीषणं शोषणमभूत् तद्वर्णनं **'गौरडन-सैण्डसन'** महोदयस्य शब्देषु—

"आसीत् तदानीं बङ्गभूमिः संसृतौ धनधान्य-सम्पदा समृद्धिमती।

सत्यमेव तत्र सर्वतो विसारि सौख्यं समाजस्याङ्गणे नृत्यति स्म। परःशतं शतीभ्यस्समृद्धिं धारयन्ती बङ्गीया प्रजा माघवनी वनीव सस्यश्यामलायां भूमौ निवसन्ती वैश्रणोपमेन हिरण्मयेन विलासेन व्यराजत्। परन्त्वाङ्ग्ला-नामागमनात् परं तत् साम्राज्यवादेन त्रस्ता दैन्य-स्तैन्याभ्यां ग्रस्ता दुर्भिक्ष-दुराचार-लुण्ठन-दारण-मारणादिभिर्भृशं पीडिता सती बङ्गभूमिः कान्दि-शीकतामन्वभवत्। केवलं त्रिष्वेव वत्सरेषु पञ्चाशल्लक्षरूप्यकाणां मूल्या-दप्यधिकं सुवर्णं रजतं च विदेशेषु हृतम्।"

ब्रिटिशसाम्राज्यवाद-प्रभावेण त्रयोदशवर्षाणामन्तराले समस्तेऽपि बङ्गप्रदेशे सङ्कटस्य दैन्यस्य दुर्भिक्षस्य मृत्योश्च साम्राज्यमेव संस्थापितम्। कम्पन्याः कर्मकराः स्वीयान् व्यापारान् सञ्चाल्य भ्रष्टाचारेण धनान्यर्जयन्तो-ऽन्यायानत्याचारांश्चाचरन्ति स्म। १७६९-७० तमेशवीयवर्षे यदा दुष्कालः सञ्जातस्तदा बङ्गप्रदेशवासिनो बिहारवासिनश्चानेके जनाः क्षुत्पीडिता रोगाक्रान्ताः सन्तो दिवं गताः। तदानीं केषाञ्चित् तु तादृश्यपि स्थितिरायाता यदा तैः शवानां भक्षणेनापि मृत्युना सह युद्धाय प्रयतितम्। **'लार्ड मैकाले'**-महोदयेन तदानीन्तनं चित्रमुपस्थापयता लिखितम्—

पूर्वं याः कोमलाङ्ग्यो बहिरपि सदनान्नर्पिपन्नात्मनोऽङ्घ्रीन्,
नो वा द्रष्टुं मयूखा अपि दिनकरजा याः कदाप्यत्र शेकुः।
संस्तार्य स्वाञ्चलान् वै कतिपयकणकान् दूनदूना हताशा-
स्ता एव क्षुत्प्रवृद्ध्या पथि-पथि पथिकान् बभ्रमुर्याचमानाः ॥५॥

तत्र कलकत्तामहानगर्यां मार्गेषु निपतिताः कुणपाः सर्वत्र व्याप्ता बभूवुः। ये मृता ये च मरणासन्नास्तेषां सङ्ख्या नैकसहस्रमप्यतिक्रान्ता बभूव। किञ्च —

विजेतृणां तेषां विततभवनानां निकटत-
स्तथोद्यानानां च क्षितितलविभागस्य निकषा।
शवानामावल्यः सुबहु हुगली-नीर-निवहे,
वहन्त्योऽगच्छँस्ताः सरिदधिपतिं क्षुत्कवलिताः ॥६॥

अत एव—

हन्त ! दुःस्थितिरेषैव क्रान्तेरुद्भाविकाऽभवत्।
अन्तस्तेजः प्रदीप्तं सद् ज्वालनाय विजृम्भितम् ॥७॥

***

स्वाधीनता-सङ्गरारम्भः

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥

(शुक्लयजुर्वेदसंहिता १७/४६)

***

अतिघर्षणतो वह्निः, प्रादुर्भवति यथा तथैव देशेऽपि।
स्वाधीनतोपलब्ध्यै, त्वरितभूत् सङ्गरारम्भः ॥१॥

सप्तपञ्चादशदुत्तराष्टादशेशवीयसंवत्सरात् पूर्वं **'शाह आलम'स्य** शासनं यावदाङ्ग्लशासका आत्मानं दिल्लीसम्राजो विशेषसेवकत्वेन घोषयन्तः सम्राजो महासभायां च तस्मै सादरमुपहारं समर्पयन्तोऽवर्तन्त । क्रमेण स्वीयया जिह्मवृत्त्या भावि-सम्राजामधिकरान् न्यूनयन्तस्त एव पूर्वं मैत्रीभावं दर्शयित्वा स्वेच्छाचारं प्रावर्तयन् ।

मुगल-शासकैः सह विहितदुर्व्यवहारास्तान् दिल्ल्याः शोणदुर्गान्निष्कास्य ते शनैः-शनैर्भारतीयनरेशान् प्रत्यपि क्रूरताऽऽविष्करणे सावधाना अभवन् । उत्तराधिकारिणां नियोजने निर्धारणे च कूटाचारं साधयन्त आङ्ग्लशासका अस्य देशस्यार्थिकशोषणायैव सर्वाः प्रवृत्तीः पर्यचालयन् । बहुधा नियमान् निर्धार्य राजानो राज्यक्षेत्रात् प्रच्याविताः । प्रवर्त्तिता उद्योगा निरुद्धाः । ग्रामाणामर्थव्यवस्थाधारा गृहोद्योगा विनाशिताः । भारतस्य द्रव्येण वैदेशिका उद्योगाः प्रवृद्धिं नीतास्तथा स्वदेशीयाः पारम्परिकोद्योगा विलयं प्रापिताः । हस्तकला गलहस्तिता । यन्त्राणां मन्त्रस्तन्त्रितः । किमधिकम्—

भूस्वामित्वमपाहृतं कृषिमतां बुद्धिर्हृता धीमतां,
व्यापारा विकृतास्तथा श्रमवतां कर्मावरोधाः कृताः ।
आङ्ग्लाः कूटधियैवमत्र भरतक्षोणी-प्रजाभ्योऽनिशं,
दुर्नीत्या परिहृत्य कृत्यमुचितं स्पष्टानि कष्टान्यदुः ॥२॥

नेयदेव, प्रतिपदं धार्मिकेषु प्रवर्तनेषु हस्तक्षेपं विदधानाः स्वीयाधिकारिवर्गमाध्यमेन दीनानां हिन्दूनां यवनानां च धर्मपरिवर्तनमादधानाः श्रेष्ठानामपि भारतीयानां पदोन्नतौ वर्णभेदनीतिं निदधानाः सैनिकानामस्त्रोपकरणेषु गवां वराहाणां मज्जाप्रयोगे सत्यपि तेषां मुखादपाकरणायैवादेशान् ददानाः सर्वत्रात्मनः स्वार्थसाधने प्रधाना उच्चैः पदं दधाना

आङ्ग्लशासकाः क्रमेण क्रूरता-व्यवहरणेन भारतीयानां कोपपथातिथयो भवितुं प्रवृत्ताः। सत्यमेवोच्यते यत् —

अनादरस्तर्जन-भर्त्सनानि, क्रूरत्वमुग्रव्यवहारवृत्तिः।
आक्षेप-विक्षेप-विलक्ष्य-पक्ष्योपेक्षाश्च विक्षोभमुपाश्रयन्ते॥३॥

एतदर्थमेव विक्षुब्धा भारतीया मनस्येव मनसि किमपि निराकरणं चिन्तयन्त आसंस्तदानीमेव राष्ट्राधिपतिना (वायसरायेन) **लार्डकेनिंगा-**भिधेन नवीनावादेशौ प्रसारितौ ययोः सेनायां नवीनप्रविष्टानां पारेसमुद्रमाङ्ग्लक्षेत्रे सेवादानस्यानिवार्यत्वं गुटिकास्त्रप्रयोगार्थं निर्मितानां गोवराहयोर्मज्जासंवलितानां गुटिकानां मुखद्वारा कर्तनावश्यकत्वेनापतिते अभूताम्। 'वर्ज्यायां समुद्रयात्रायां बलान्नियोगस्तथा धार्मिक्यां भावनायां वज्रपात' इत्युभयमपि वह्निकणिकानां प्रद्योतनायालमभूत्। किञ्च—

शौर्यं वीर्यं स्वकीयं सकलमपि जवादाशु विस्मृत्य नित्यं,
दासा भूत्वाऽस्मदाज्ञापितवचनपरा भारतीया वसेयुः।
एतत् तैः कांक्षितं यत् कथमपि नहि तत् स्वीकृतं भारतीयै-
रासीद् विद्रोहमूलं तदिह परमतः कारणं नान्यदासीत्॥४॥

कस्या अपि पराधीन-देशाय भवति ध्रुवम्।
पराधीनत्वमेवैकं, विद्रोहस्यादिकारणम्॥५॥

अत इतस्ततो भारतीयानां हृदयेषु वैदेशिकाङ्ग्लान् प्रति कदाचिद् द्वेष. कदाचिद् रोषः कदाचन घृणा कदापि तिरस्कारः क्वचित् तेषां प्रतिशोधश्च बलवत्तया प्रबुद्धाः। नियता अनियताः सुघटिता दुर्घटिताः सुविचारिता अविचारिताः सुनियोजिता विनियोजिताश्च कार्यक्रमा निर्धारिताः। पर्याप्तेन सङ्घटनेन सज्जया च १८५७ ई० वर्षस्य ३१ मई-दिनं सङ्गरारम्भाय निर्णीतम्। सर्वत्र सैन्यशिबिरेषु रहःसूचनाः प्रापिताः। परं दुर्भाग्यवशाद् विद्रोहोऽयं निश्चितकालात् प्रागेव प्रस्फुटितः। मेरठ-शिबिरे स्थितैरारक्षिभिर्मज्जावतां गुटिकानां दन्तेभ्यः कर्तनं निषिद्धं यतः क्रुद्धैराङ्ग्लशासकैस्तेभ्यः शस्त्राणि प्रतिगृहीतानि बहुशोऽपमानपुरस्सरं न्यायालयेऽधिकरणानि चालितानि। पूर्वं तु ते कालं प्रतीक्षमाणाः शान्तिमभजन् परं नगरे महिलानां भर्त्सन-तर्जन-निन्दनैरुत्प्रेरिताः सैनिकाः समयात् पूर्वमेव स्वाधीनतासङ्गरमारभन्त। अयमासीद् १८५७ई० तम वर्षीयो मई-मासस्य दशमो दिवसः। इतः पूर्वं २९ मार्च १८५७ई० दिने कालिकात्ता-तोऽष्टक्रोशमिते दूरवर्तिनि वैरकपुरे वैदेशिकशासनविरुद्धं **मङ्गल पाण्डे-**महोदयेन भारतीयाः सैनिकाः शस्त्र-प्रहरणायाकारिताः स्वयं च शस्त्रेण

प्रहर्तुं प्रवृत्तस्तदा स स्वसहयोगिभिः सह गलपाशदानेन मारितः, आसीत् स स्वाधीनता-सङ्घर्षस्य प्राथमिकः शङ्खनादः। मन्ये स शङ्खनाद एव मेरठस्थान् सैनिकान् प्रैरयत्।

मेरठ-नगरस्थैः सैनिकैरनेके वैदेश्या आङ्ग्लाधिकारिणो व्यापादिताः, नैके पराभूता विद्रुताश्च। ततः परं नागरिकाः सैनिकाश्च सम्भूय देहलीं प्रति प्रस्थिताः। केवलं द्वयोर्दिवसयोरेव स्वाधीनता सैनिकैर्दिल्ली स्वाधीनतां नीता। मुगलसम्राड् बहादुरशाहो जफरः पुनरपि भारतस्य सम्राड् घोषितः। सत्वरमेव दिल्ली-विजयस्य वार्ता समग्रेऽपि भारते प्रसृता। मईमासस्यान्तं यावत् प्रायः समस्तेऽप्युत्तरे भारते विद्रोहो व्याप्तः, सर्वेष्वपि क्षेत्रेषु स्वाधीनताया उद्घोषाः प्रकटिताः। प्रायः पञ्चमासावधि दिल्ल्यां भारतीयं स्वाधीनं शासनमस्थात्।

अस्य सङ्घर्षस्य प्रमुखाः कर्णधारा आसन्— **राजा तुलराम,-तात्या टोपे-नाना साहेब पेशवा-मौलवी अहमद शाह-बेगम हजरतमहल-महारानी-झांसी-राजा कुबेरसिंह-अमरसिंह**-प्रभृतयः। क्रान्तिकारिणां मुख्यं रङ्गस्थल-मुत्तरभारतमभूत्। प्रान्ते सर्वेऽपि कर्णधारा इमे बहुशः पीडिता मारिता-श्छलेन निगृहीताश्च। एतेषु केचन १८५९ई० वत्सरं यावत् कथञ्चिदपि सङ्घर्षरता अभवन् किन्त्वन्ते शनैश्शनैर्विलीनाः। तदा —

आङ्ग्लरस्मात् तत्त्वमेतद् गृहीतं, शस्त्रैः स्वीयं शासनं नैव युक्तम्।
अन्योन्यामर्षबोधोत्थनीत्या, दुर्गो भेद्यो भेदनीत्यैव नित्यम्॥६॥

आमूलं परिवर्तनं कृतमतो नीतौ ब्रिटेनोद्भवै-
र्हिन्दू-मुस्लिमयोः परस्परमथ प्रोद्भाविता भिन्नता।
सेनानामपि जातिपङ्क्तिविषजोद्देश्येन संज्ञाः कृता,
ऐक्यं खण्डयितुं च हन्त! विविधा यत्नास्तदैवाहिताः॥७॥

* * *

चन्द्रोदयस्य पूर्वाभासः

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः ॥

(ऋ० मं० १०, अष्ट० ८, अ० ३, वर्ग० २०)

***

नाना दुःखैः परवशभवैर्ग्लानि-हानि-प्रजातै-
र्नित्यं दुष्टैः कृत-परिभवैः खिन्न-खिन्नाननाम् ।
स्वातन्त्र्यार्थं विमल-गगने कोऽप्यपूर्वोऽत्र पूर्वः,
पूर्वाभासः प्रसृतिमगमत् पूर्ण-चन्द्रोदयस्य ॥१॥

पराधीनताऽन्धकारान्धीकृतचक्षुषां भारतीयानां पुनर्नयनोन्मीलनाय स्वाधीनता-सङ्गरारम्भः १७८५ ई० त एव प्रावर्तत । यथा कस्यापि राज्ञ आगमनात् पूर्वं तदीयाः सहचराः सेनाधिकारिणः स्वयमेवानुशासन-प्रतिष्ठापनाय प्रयतन्ते तथैव श्रीमतो राजेन्द्रप्रसादस्य वस्तुतो राजेन्द्रस्य समागमनात् पूर्वं भारतीयैः सैनिकप्रवरैः स्वतन्त्रताप्राप्ति-पन्थाः परिष्कृतः । जनानां हृदयेषु वर्तमानायाः कान्दिशीकवृत्तेरौदासीन्यस्य च समुत्पाटनाय भूयोऽपि निर्भीकवृत्त्या केसरिवत्स्वातन्त्र्येण जीवनयापनाय स्वदेशरक्षार्थं बलिदानाय च सर्वथा सर्वदा सन्नद्धानां पूर्णेन प्रयासेन स्वाधीनता-प्राप्ते-राजमार्गः स्वच्छतां प्रापितस्तत्समकालेव च राजेन्द्र-चन्द्रोदयस्य पूर्वाभासो जनैः परिलक्षितः ।

भारतस्य भूमिरखण्डाऽपि व्यवस्थावशात् कतिपयेषु खण्डेषु सम्भवता विराजते । शासन-सौविध्याय प्रान्तानां जनपदानां नगराणां ग्रामाणां विभाजनेन साम्प्रतं य '**उत्तरप्रदेश**' इत्यभिधीयते स एव तदानीं **संयुक्तप्रान्त'**-नाम्ना सम्बोध्यते स्म । पर्वत-नदी-मन्दिर-तीर्थोद्योगादिभूषितेऽस्मिन् विशाले प्रदेशे सर्वत्र सामञ्जस्यं सुखं शान्तिश्च प्रावर्तन्त । यथाऽस्य नगराणि गौरववन्ति सन्ति तथैवास्य पुर्योऽपि प्रथिताः । अस्यैकस्मिन् भागे '**अमोढा**'नाम्नी पुरी व्यलसत् । अमोढायां नानाजातीयानि कुलानि निवसन्ति स्म तेष्वभूदेकं धन्यं मान्यं च कायस्थकुलम् । जात्यैव नैपुण्य-पुण्य-मण्डिताः कायस्थाः स्वकीय-विद्या-बुद्धिवैभवेन पण्डिता अभूवन् । श्रीमतो राजेन्द्रप्रसादस्य पूर्वजा अपि लब्धप्रतिष्ठा अत्र न्यवसन् । अतिप्राचीनकाले परिस्थितिपरवश एकः कायस्थपरिवार इतो विनिर्गत्य पूर्वस्यां **बलिया'**-

नगरीमागच्छत्। तत्र बहुकालं यावदुषित्वा तदनन्तरं तस्यैवैका शाखा पुनरुत्तरस्यां साम्प्रतिकस्य 'सारन'-जनपदस्य **'जीरादेई'**-ग्रामे वसतिमकरोत्। द्वितीया च शाखा 'जया'नगरीं श्रितवती। प्रथमशाखाया एव परिवारोऽस्माकं चरित्रनायकस्य महामहिमशालिनो देशरत्नस्य 'श्रीराजेन्द्रप्रसाद'स्य पूर्व-पुरुषतागौरवमधारयत्। परिवारस्यास्य जना आसन् प्रायेण सप्तमाष्टमाः श्रीराजेन्द्रात् पूर्वतनाः। अभूवंस्ते निर्धनाः कस्या अप्युत्तमाया जीविकाया गवेषणायैवात्रोपयाताः। ग्रामे शिक्षितानामभाव आसीत्। तेषु वासरेष्वपि कायस्थाः शिक्षितास्तु भवन्ति स्मैव। कारणादस्मादेव ग्रामवासिभिस्ते तत्रैव निवासाय प्रार्थिताः सुखेन वसतिमकार्षुः। यतः —

नीरं समीरश्च यदा भवेतां, पुंसः प्रकृत्या बलिनौ हि यत्र।
तत्रैव तस्य स्थितिमामनन्ति, प्राज्ञाः शुभोदर्कमयीं नितान्तम् ॥२॥इति।

भारतं किल ग्रामाणामेवैको महाग्रामः। अत्र नवतिप्रतिशतं ग्रामा एव सन्ति। ग्रामजीवनमेव वास्तविकं जीवनमिति मन्वाना वैदिका महर्षयोऽपि **विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्** (यजुः०) इति सदैव घोषयन्ति स्म। ग्रामेषु नैरोग्यं वर्धते। प्रकृतिसौन्दर्यं स्पर्धते, अपूर्वा शान्तिश्चित्तं गर्धते। ग्रामीणेषु नैसर्गिकं सौजन्यं, सौहार्दमौदार्यञ्च तिष्ठति। नियतेः शीतलः करस्पर्शः सकलानि दुःखानि विस्मारयति। समन्तात् प्रसृताः श्यामलाः पादपाः सरसाः सरितः स्वच्छन्दो मारुतश्च स्वातन्त्र्याय प्रेरयन्ति।

'जीरादेई'-ग्रामो जमापुर-ग्रामेणातितरां संसक्त आसीत्। एतयोः पारस्परिकं सम्मिश्रणमीदृगभूद् यस्य पार्थक्यनिर्धारणं कयाऽपि रीत्या कर्तुं न पार्यते स्म। प्रायो द्विसहस्रमिता वसतिर्जनानामत्रावर्तत। सर्वासामपि जातीनां जना अस्यां वसन्तः स्वीयां स्वीयां जीवनलीलामुल्लासयन्ति स्म। नैसर्गिकी सुषमा मन्ये सीमानमतिक्रम्य क्रमशः क्रान्तमहीतला सुजला सुफला सस्यश्यामलाऽपि निर्मला सर्वत्र व्यराजत। आसन्नासन्नान्येव जीवननिर्वाहोचितानि सकलान्यपि वस्तुजातानि निराडम्बराणि सुलभान्यभूवन्। कृषकाः कर्मकराः काष्ठशिल्पिनः शिल्पिनः सौचिका अयस्कारास्ताम्बूल-पूग-तमालपत्र-वस्त्र-धान्यादिविक्रेतारो विपणीः सज्जयित्वा वस्तूनि विक्रीणन्ति स्म तथैव ग्रामीणा अपि ग्रामाद् ग्राममिममागत्यापि वस्तूनि क्रीणन्ति स्म। विशिष्टेषु दिनेषु मेलकान्यप्यायुज्यन्ते स्म येषु नैकटिका व्यापारिणो वैकटिकानामिव ग्रामवासिनामाकाङ्क्षितान्याकलय्य

तत्र विक्रेतृकामनयाऽऽयान्ति स्म । यतो हि—

सानन्दं सुषमाश्रयेषु वसति साधारणं जीवनं,
शुद्धं नीर-समीर-संश्रित-शुचि-श्यामाञ्चलं चञ्चलम् ।
अन्नं वस्त्रमथोपयोगि विमलं प्रेम प्रसादोदयं,
ग्रामश्रीः श्रयते सुखानि सकलान्यप्यत्र निर्व्याजतः ॥३॥

परं निसर्गत एवात्मनिर्भरतां प्राप्तस्य 'जीरादेई'ग्रामस्य सौभाग्यमितोऽपि महत्तममभूत् । को जानीते स्म यदस्मिन् सामान्ये ग्रामे कश्चनासामान्यो गुणग्रामः संयम-सत्यनिष्ठा-सेवा-सदाचारादिभिरभिरामः समुत्पत्स्यतीति ?

बिहारस्य भूमिः प्रसिद्धैः पुण्यक्षेत्रैः पवित्रयति भू-मण्डलम् । प्रसन्नतोयाः सरितो रसयन्ति स्वान्तानि । पत्र-पुष्प-फल-सस्य-सञ्चयाः पूरयन्त्यभीप्सितानि जीवनाधारभूतानि । तपस्विनां तपांसि मनस्विनां मनांसि यशस्विनां यशांसि च प्रथयन्ति कीर्तिकथाम् । ज्ञानिनां दार्शनिकानां साहित्यकाराणां विशेषतो नैयायिकानां खनिरूपेयं वस्तुतः प्राशस्त्यमर्हत्येव। जीरादेईग्रामभूमिरेतेषां समवायं दोहदमिव दधानाऽऽशान्विता प्रत्यैक्षत तं कालं यस्मिन् जनिं प्राप्तवति शिशौ सर्वान् गुणान् सकृदेव विन्यस्यात्मनः कृतकृत्यतां यायात् ।

सौभाग्यात्तत्रावात्सीदेकं महनीयं कायस्थ-कुलम् । यस्मिन् महनीय-चरित्रता महामान्यता राष्ट्रानुरागिता भगवच्चरणचञ्चरीकता सनातन-धर्म-परिपालन-तत्परता परमास्तिकता दीनबन्धुता दाक्षिण्यादि-सद्गुण-सदाचरणादिकता चेत्यादिगुणाः स्वयमेव विराजमाना आसन् । अस्य कायस्थकुलस्य सौहार्देन दानेन च जीरादेई-वासिनोऽत्यन्तं कृतज्ञतामन्व-भवन् । तस्य परिवारस्य गुणगणनिकरेणाकृष्टास्तद्ग्रामस्य निकटवर्तिनो नृपतयोऽपि परिचिता आसन् । सति समये च तेषु श्रीराजेन्द्रप्रसादस्य पूर्वपुरुषाणां जीरादेई-ग्रामवासकालादेव प्रतिभा-विशेषेण निकटस्थ 'हथुआ'-राज्येन सह सम्बन्धोऽप्यभूत् । तत्र काश्चन लेखनस्य पठनस्य वृत्तिस्तैः स्वीकृता । तदानीं हथुआराज्यं नासीदियद्विपुलं न वाऽस्यायोऽप्येतावाना-सीत् । तस्याधिपानामावासोऽपि पूर्वं तत्र नाभवद्यत्रेदानीं वर्तते । हथुआ-राज्येन सम्पन्नः स सम्बन्धो नैकानि वर्षाणि यथावत् प्राचलत् । ते पूर्वपुरुषाः कस्मिंश्चिदपि महति पदे स्थिता नासन् । जीरादेई-ग्रामे कस्यापि कायस्थस्य भूस्वामिनोऽधीनास्तत्प्रजारूपाः सामान्यस्थितिशालिनो जीवन-यात्रां साधयन्तो यथाक्रमं स्वयमपि स्वपौरुषेण द्रव्याण्यर्जयित्वा भूस्वामित्वमपि भूषितवन्तः ।

चरित्रनायकस्य पूज्याः पितामहाः **श्रीमिश्रीलाल**-महानुभावा आसन् । तेषामेक एव पुत्रः '**श्रीमहादेवसहाय**'नामाऽभवद् यश्च लघीयस्येव वयसि निर्जरनगरनिवासमभजत् । श्रीमतां मिश्रीलाल-श्रीबास्तवानां ज्येष्ठाः सहोदराः '**श्रीचौधुरलाल**'- नामानोऽवर्तन्त येषां पुत्रः '**श्रीजगदेवसहाय**' इत्याख्यातः । श्रीमिश्रीलालैः सह श्रीचौधुरलालानां भूयसोऽनुरागवशात् तषामकालमृत्युना खिद्यमानास्ते **जगदेवसहाय-महादेवसहाय**योर्लालने पालने पोषणे संरक्षणे संवर्धने च सर्वथा साहाय्यमाचरन् । जगदेवसहायस्य केवलमेकैव तनयाऽऽसीत्, साऽपि न चिरं जीविता । महादेवसहायस्य पञ्चसन्ततयोऽभूवन्, तिस्रः कन्यकाः पुत्रद्वयञ्च । कन्यकास्वेका तु बाल्य एव विलयं गता । द्वयोर्विवाहः समजायत । तयोर्द्वितीया **भगवती देवी** कियतश्चित् कालादनन्तरं वैधव्यं प्राप्ता तृतीया च ज्येष्ठाऽपि सन्ततिं विनैव दिवं गता । चतुर्थः पुत्रः **श्रीमहेन्द्रप्रसादः** पञ्चमश्चास्माकं चरित्र-नायकः **श्रीमान् राजेन्द्रप्रसादः** श्रीवास्तवकुलमभूषताम् ।

को जानाति स्म भाग्यं कुहचन सफलम्भावि तत्राभवत् तद्-
ग्रामे साधारणेऽपि प्रथित-पृथुयशा बालको जन्म लब्ध्वा ।
दास्यान्मोक्तुं स्वदेशं प्रयतितहृदयो जीवनं स्वं समर्प्य,
प्रामुख्येनात्र शस्यं पदमपि च पुनः सादरं प्राप्स्यतीति ? ॥४॥

* * *

राजेन्द्र-चन्द्रोदयः

नवो॑नवो भवति॒ जाय॑मा॒नोऽह्नां॑ के॒तुरु॒षसा॑मेत्यग्र॑म् ।
भा॒गं दे॒वेभ्यो॒ विद॑धात्या॒यन् प्र च॒न्द्रमा॑स्तिरते दी॒र्घमायु॑ः ।।

(ऋ० मं० १०, सू० ८५ मं० १९)

अलमकृत कुलं यः पावनैः स्वैश्चरित्रै-
रुदनयदथ जातेर्गौरवं जन्म लब्ध्वा ।
दिशि दिशि निजपित्रोः कीर्तिमास्तारयद् यः,
स हि जयति जगत्यां श्रील-राजेन्द्रचन्द्रः ।।१।।

श्रीचौधुरलालः श्रीमिश्रीलालश्च सहोदरावास्ताम् । अनयोर्ज्येष्ठः श्रीचौधुरलालः स्वीये कनीयसि भ्रातरि श्रीमिश्रीलाले परमं स्नेहं धारयन् हथुआ-राज्येऽत्युत्तमां ख्यातिं प्राप्य स्वनैपुण्येन क्रमशः प्रधानामात्यपदमप्यलमकार्षीत् । तेषु दिवसेषु महाराजः श्रीछत्रधारी साही सिंहासनमभूषयत् तेन च स्वपुत्राय राज्यं न दत्त्वा स्वपौत्राय श्रीराजेन्द्रप्रतापायोत्तराधिकारपत्रमाध्यमेन राज्यं प्रदत्तम् । श्रीचौधुरलालश्रीवास्तवे तस्य राज्ञ आसीत् पूर्णो विश्वासस्ततो मरणात् पूर्वमेव शिशोः पौत्रस्य सर्वोऽपि रक्षाभारः श्रीचौधुरलाल एव निक्षिप्तः । महाराजस्य मृत्योरनन्तरं बाले राजकुमारे नैका विपत्तय आगच्छन् । अधिकरण-प्रवृत्तिकाले राजेन्द्रप्रतापसाहिनो जीवने भूयांसि कष्टान्यापतितानि तथा तस्य संरक्षणं किमपि साधारणं कार्यं नासीत्, तथापि श्रीचौधुरलालेन स प्राणपणेन रक्षितः । स्वयं रात्रौ तस्य शय्याया निकट एव स्वीयां शय्यां निधाय रक्षति स्म भोजनं च विषभयात् पूर्वं स्वयमास्वाद्य पश्चात् तं भोजयति स्म । न केवलं तेन राजकुमारस्य रक्षैव विहिता, अपि तु राज्यस्य संवर्धनायापि भूयान् प्रयास आहितः । नैतावदेव, तेन स्वबुद्धिवैभवेन स्वस्य कुटुम्बस्याप्युन्नतिः कृता तथा सप्ताष्टसहस्रमुद्राणां वार्षिकस्यायस्य भूस्वामित्वमपि साधितम् ।

श्रीमिश्रीलालस्य मृत्युः स्वल्पीयस्यायुष्येवाभूत् तदा तस्यैक एव पुत्रः श्रीमहादेवसहाय आसीत्। सौहार्दातिरेकात् खिद्यमानेन श्रीचौधुरलालेन स्वीयस्य पुत्रस्य श्रीजगदेवसहायस्य तथा भ्रातृजस्य श्रीमहादेवसहायस्य पोषणाय शिक्षणाय च समानैव व्यवस्थाऽक्रियत। परं तौ पारसीकभाषाऽध्ययनादग्रे नावर्धताम्। श्रीराजेन्द्रप्रताप-महाराजस्य मरणानन्तरं तदुत्तरजैः किमपि न्यूनं पदं श्रीचौधुरलालाय दातुं प्रयस्तं परं तत् तेन नाङ्गीकृतम्। उचितमप्यभूदिदं, यतः —

विकचकमलजालैरञ्चिते निर्मलाम्भः—
श्रित-सरसि विहारं प्राप्य पूतान्तरात्मा।
विधिवशमुपयातो दुर्दिनेष्वप्यशक्तो,
नहि भजति मरालः पङ्कपूर्णं हि गर्तम् ॥२॥

अनयैव दृष्ट्या स्वाभिमानेन जीवनं यापयितुं श्रीचौधुरलालः स्वपरिवारस्यावासभूमौ जीरादेईग्रामे तत आगच्छत् परं कियत्कालानन्तरं भूयोऽपि स गोरक्षपुरस्य तमकुही-राज्येऽमात्यपदं प्राप्नोत्। तत्र नीरसमीरयोरानुकूल्याभावेन कियन्तं कालं व्यतिगमय्य प्रान्ते पुनः स्वस्थानं सम्प्राप्तस्तत्रैव सुखेन दिवसानत्यवाहयत्।

श्रीमतां महादेवसहायानां निवासः किल जीरादेईग्राम एवावर्तत। भूस्वामित्वेन नासीत्तेषामनुरागः, किन्तूद्याननिर्मितेरभिरुचिरवश्यमभूत्। भूयान् कालस्तेषामुद्यानविधान एव व्यत्यगच्छत्। तैरारोपितानामाम्रवृक्षाणां फलानि बहुकालं यावत् सम्प्राप्य पारिवारिका मोदमाप्नुवन्। पारसीकभाषायास्ते पण्डिता आसन् किञ्च व्यावहारिकं संस्कृतभाषाज्ञानं धारयन्तस्ते यूनानीचिकित्साशास्त्रे भारतीयायुर्वेदविद्यायां च रुचिमन्तः सन्तस्तद्विषयकग्रन्थानामध्ययनं नित्यमेव कुर्वन्ति स्म। एतद्विषयकानि पुस्तकानि भूयस्तरां तैः सङ्गृहीतानि। फलतस्ते दूरदूरत आगतान् रोगिणः परीक्ष्यौषधप्रदानमकार्षुः। दीनेषु निर्मूल्यमौषधदानं तेषु विशिष्य स्पृहणीयमासीत्। तैः सहैको भृत्यः प्रत्यहं भेषजनिर्माणायावसत्। केवलं रुग्णस्य स्थितिं श्रुत्वैव समुचितभेषजप्रदानेन तस्य चारोग्यलाभेन तेषां यशः सर्वत्र सहजमेव व्याप्तम्। शरीरेण प्रपुष्टा नीरुजो मल्लक्रीडायां निपुणा अश्वारोहणे प्रवीणाश्च ते सद्धर्मनिष्ठा मधुरस्वभावा दयार्द्रहृदयाः सुजनोपकर्त्तारः परिवारे च सर्वेषां प्रीतिभाजोऽभूवन्।

श्रीमहादेवसहायस्य शीलोज्ज्वला पत्नी पातिव्रत्यपरायणा परिवारसेवाऽनुरक्ता सौम्यगुणान्विता परमसौभाग्यशालिन्यभूद् यस्याः कुक्षेर्देशरत्नं राजेन्द्रप्रसादोऽजीजनन्। चतसृणां सन्ततीनामनन्तरं श्रीमद्विक्रमपनृतेर्विधु[1]-

युग[४]-नव[९]-चन्द्रान्वित[१]-वत्सरस्य पौषशुक्लतृतीयादिने पित्रोस्तयोर्धर्मबलाभ्यां तथा स्वदेशस्य परमेण भाग्येन श्रीराजेन्द्रप्रसादस्य जन्माभवत् । तदानीं—

रत्नैः सङ्कुलितैः पलैः शरमिते दण्डे शुभेष्टक्षणे,
चन्द्रर्क्षस्य तदाद्यपाद इह, सन्दृष्टे सुरेज्येन तु ।
राज्येशेन धियः पतेः स्थितिवशात् सद्राज्ययोगोत्तमे,
श्रीभौमस्य दशान्तरे सुसमये प्रादुर्बभूवैष सः[१] ॥

ज्योतिःशास्त्रानुसारं ग्रहाणां स्थितिश्च —

धनुर्लग्ने सौम्ये बुध-धरणिजौ, तुर्यसदने,
शिखी, षष्ठे चन्द्रो, व्यलसदथ तत्कामभवने ।
सुरेज्यो भाग्यस्थो, दशमभवने राहुरपि च,
भृगुर्लाभे, रिष्फं दिनपतियुतं, जन्मसमये[२] ॥

इमां ग्रहस्थितिं निर्वर्ण्य गणक-पुङ्गवाः पितामहादीनां पारिवारिकाणां जिज्ञासाः पूरयन्तः शिशोर्भाविनो जीवनस्य फलान्येवमाकलयन्—

शिशोरस्य जन्मस्थ-खेटा विचित्राः,
किमप्यद्भुतं जीवनं सूचयन्ति ।
स्वदेशस्य राजाधिराजः स्वतन्त्रो,
भविष्यत्ययं कर्मठस्त्यागमूर्तिः ॥३॥

अजातशत्रुः परिपूतमानसः, श्रद्धालुरुद्यत्प्रतिभासमन्वितः ।
त्यागेन शीलेन गुणेन कर्मणा, सदैव सर्वान् सुखयिष्यतीति ॥४॥

एवंविधान् शुभंयोः शिशोर्भविष्णून् प्रभविष्णून् फलादेशान् निशम्य न केवलं परिजना एवापितु ग्रामवासिनोऽपि स्वानि भाग्यानि श्लाघयन्तो मनस्येव मनसि व्यचारयन् 'यदयमेवास्माकं भारतवसुन्धराया दुर्ग्रह-ग्रासान्धकारितदिगन्तराया अन्धकारसिन्धुरस्य परिहरणाय तथाऽतिप्रचण्ड-ताण्डवाडम्बरिणो ग्रीष्मस्य पराकरणाय बन्धुरः कुमुदबान्धवो भविष्यतीति ! अनुभूतं च सर्वैरपि —

सत्य-त्याग-तपः-समत्व-शुचिता-निर्भीकताः शिक्षयन्,
कर्तव्यं प्रतिबोधयन् स्वचरितैरन्तर्बहिः स्पष्टयन् ।

१-२ पद्यद्वयमिदं 'राजेन्द्रप्रशस्ति'कारस्य ।

राष्ट्रव्याप्त-तमस्ततिं च तिरयन् दीनान् समाह्लादयन्,
स्वच्छे व्योम्नि सुधांशुभिर्लसद्भूद्'' राजेन्द्रचन्द्रोदयः' ॥५॥ इति ।

लोक-लोचन-रोचनस्य क्षीरकण्ठस्य पुण्यपरायणा जननी धर्मसरणि-संस्थो जनकश्च परिजनैः सह शास्त्रानुसारिणः संस्कारान् यथाविधि सम्पाद्यास्याभिधानं '**राजेन्द्र-प्रसाद**' इति समुदघोषयताम् । किञ्च—

सौम्या मुखाकृतिरलीकमथ प्रशस्तं,
दीप्ते दृशौ श्रवणयुग्ममपि प्रशस्यम् ।
सान्द्रे भ्रुवौ स्मितमयं वदनं मनोज्ञा-
ऽतन्वन्न कस्य मुदमस्य कचावली च ॥६॥

अर्भकस्य ज्येष्ठा भगिनी भगवती देवी ज्येष्ठो भ्राता श्रीमहेन्द्र-प्रसादश्च भ्रातरं राजेन्द्रं प्राप्य मोदमानौ निरन्तरं तमेवापश्यताम् । मातुरङ्कात् स्वाङ्कयोर्बलादगृह्णताम्, स्नेहातिरेकेणालालयताम्, रुदन्तं हसन्तं जानुभ्यां चलन्तं चान्वकुरुताम् । वृद्धजनैराशिषा वर्धितः सोऽयं शिशू राजेन्द्रः शनैः शनैरेकं वर्षं वयसोऽपूरयत् ।

यत्रारविन्दसदृशानि विकस्वराणि, मन्दस्मितैर्विविधमञ्जुरवैर्लसन्ति ।
आनन्ददानि वदनानि कुमारकाणां, धन्यानि तानि सदनानि सदा भवन्ति ॥७॥

**

काङ्ग्रेस-कुमुदोद्गमः

यो नो॒ द्वेष॑त् पृथिवि॒ यः पृ॑तन्याद् योऽभि॒दासा॒न्मन॑सा॒ यो व॒धेन॑ ।
तं नो॑ भूमे रन्धय पूर्वकृत्वरि ॥
(अथ० १२।१।१४)

आङ्ग्लैर्भृशं पीडितानां, हन्त ! भारतवासिनाम् ।
कष्टानि हर्तुमभवत्, काङ्ग्रेस-कुमुदोद्गमः ॥१॥

कुमुद-बान्धवस्य श्रीमतो राजेन्द्रप्रसादस्य जन्मनः प्रथम-वर्ष-ग्रन्थि-पूरणसमकालमेव भारते गौराङ्गै राचरितानि नानाविधानि कष्टानि तर्जनानि भर्त्सनानि चानुभवद्भिर्भारतवासिभिराङ्ग्लशासनाद् मुक्ति-माप्तुं 'भारतीय-राष्ट्रिय-काङ्ग्रेस'नाम्न्याः संस्थायाः स्थापना विहिता ।

अस्याः संस्थापनया सर्वैः सम्भूय क्रान्तेः स्वरसञ्चारो भूयस्तरां प्रवर्तितः। तत्र च—

अभूदशेषेऽपि निजेऽत्र देशे, विदेशिनां न्यक्करणस्य लक्ष्यम्।
यस्याभवन् नैकविधप्रकारा, उदार-शुद्ध्युग्रविचारधाराः ॥२॥

विद्रोह-दमनयोः प्रक्रियाभ्य आङ्ग्ल-शासकान् प्रति समुद्भूतया कटुतया विदेशिशासनस्योत्पाटनभावना गाढतां गता। स्वातन्त्र्यप्राप्तये बलिभूतानां हुतात्मनां बलिदानेन भारतीयेषु निगूढस्याकर्मण्यतायुगस्यान्तं कृत्वा नवीनस्य युगस्य शुभारम्भो विहितः। ऊनविंशत्याः शत्या अन्तिमेंशे भारते राष्ट्रियतायाः अभ्युदयः पूर्णरूपेण सञ्जातः। अनेकेषां राष्ट्रिय-सङ्घटनानां निर्माणेन सर्वासु दिक्षु भारतीय-राजनीतये नवीनतया दिशो निर्धारणमेवैकं लक्ष्यमभूत्। १८८५ ई० तमे हायने '**भारतीय-राष्ट्रिय-कांग्रेस**'-स्य स्थापनायाः पन्था एतैः सङ्घटनैः प्रशस्यतां नीतः। काङ्ग्रेस एव तदानीं समस्तानां राष्ट्रवादिनीनां शक्तीनां सङ्गमस्थलीत्वं सम्प्राप्य—"**आर्यसमाज-ब्रह्मसमाज-थियोसॉफी**'—प्रभृतिसंस्थानां धार्मिकाणां समाजसुधारकाणाञ्च सेवान्दोलनमाध्यमेन प्रवृत्तिभाग् बभूव। अस्य जन्मदाताऽवकाशप्राप्त आङ्ग्लोऽधिकारी '**एलेन ओक्टेवियन ह्यूम**' आसीत्।

आङ्ग्लानामनुदारशासनकरीं दुर्नीतिमालोक्य ये,
पूर्वं तानवबोद्धुमुद्यतधियः काँश्चित् प्रयासान् व्यधुः।
तानुद्बोध्य समस्तमान्यजनतानेतॄन् पुनः स्थापिता,
सेयं राष्ट्रियभावनोद्भवकरी 'काङ्ग्रेस'-संस्थाऽचिरम् ॥३॥

अस्मिन् सङ्घटने केचनोदारवादिनः केचन संशोधनवादिनश्च सम्मिलिताः, येषु—'**सुरेन्द्रनाथबनर्जी-दादाभाईनौरोजी-गोपालकृष्णगोखले-**सदृशा नेतारः प्रामुख्यमभजन्। भारतीयराष्ट्रवादस्योद्घोषकाणामेतेषां सूत्रधाराणां महता प्रयासेन भारते राजनीतिचेतनायाः अपूर्वः स्वरसञ्चारः समुदभवत्। अनेन राजनीतावेका नवीना प्राणधाराऽपि प्रवाहिता यस्यामुग्र-वादिन उन्नताः। महाराष्ट्रे **लोकमान्यो बालगङ्गाधरतिलकः**, बङ्गालप्रदेशे **श्रीअरविन्दघोषो विपिनचन्द्रपालश्च**, पञ्चाम्बुप्रदेशे **लाला लाजपतराय-**स्तथाऽन्येऽपि कतिचन विशिष्टा नेतारोऽनवरतमुग्रभावनया स्वातन्त्र्योप-लब्धये जनान् प्राबोधयन्। एतेषु तिलकस्येयं घोषणा यत्—'**स्वतन्त्रताऽस्माकं जन्मसिद्धोऽधिकारोऽस्ती**'ति स्वदेशस्य राष्ट्रियो मूलमन्त्र एव समजायत।

स्वातन्त्र्याय प्रवर्तितस्य सङ्घर्षस्य केन्द्रबिन्दोरिव काङ्ग्रेसस्य समुदयानन्तरं प्रारम्भे तस्येदमेवोद्देश्यमाङ्ग्लाधिकारिणा तेन विचारितमा-

सीद् यद् "विदेशि-शासनं प्रति राजनीतिकार्थिकासन्तोषयोः कारणात् प्रवर्तमानो विद्रोहः कमप्युग्रं रूपं न धारयेत्। जना उदारवादिन्यां दिशि वर्धेरन्। वैदेशिकानां शासनं च यथायथं प्रचलेदिति।" एतदनुसारं काङ्ग्रेसस्य प्रारम्भिकेषु वर्षेषु तदीयसदस्यानां सञ्चालकानां याच्ञाऽपि तथैवासीत्। ते वाञ्छन्तिस्म यत्—"कानि चिद् राजनीतिकानि सांविधिकानि संशोधनानि क्रियेरन्, शासिनीषु परिषत्सु भारतीयेभ्यो नागरिकेभ्योऽपि प्रातिनिध्यं दीयेत, भारतीयाः शासकीयेषु कर्मचारिष्वपि विशिष्यावसरान् लभेरन्" इति।

भारतीयराष्ट्रवादस्य सूत्रधाराणां महता प्रयासेन महत्त्वपूर्णेषु राजनीतिक-प्रश्नेषु सार्वजनिकेन विचार-विमर्शेण च राष्ट्रिय-जीवनस्य रागिन्यां नवीनाः स्वराः पूरिताः, नवीना गतयः सञ्चारिताः, नवीना दिग् दर्शिता। याचनानां प्रार्थनानां स्थाने राष्ट्रियान्दोलनेन क्रान्तेरुद्घोषेण चाधिकृतम्। संशोधनवादिनामासीदयमेव विश्वासः—

न प्रार्थनाभिर्न नमस्क्रियाभिर्न याचनाभिर्न च कामनाभिः।
न कल्पनाभिर्न च निन्दनाभिः, स्वतन्त्रता क्वापि कदापि लभ्या॥४॥
लभ्येत सेयं स्वपराक्रमेण, निजावलम्बेन सुसम्मतेन।
ऊर्जस्विनां सङ्घटनेन नूनं, तस्मात् तथैवात्र समैर्विधेयम्॥५॥

***

संस्कारसुधाभिषेचनम्

जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम्॥

(ऋग्वेद० ३।८।४)

संस्कारै रसिता सदैव सरला नम्रा गुणग्राहिणी,
गाम्भीर्येण युता श्रमेण निचिता कर्तव्यनिष्ठावती।
नैर्मल्यादि-गुणाञ्चिता मधुमती व्यक्तित्वविद्योतिनी,
धन्या जीवन-पद्धतिः शुचितरा सर्वात्मना राजते॥१॥

भारतस्य सर्वेष्वपि भागेषु जनजीवने प्रवर्तमानं स्वातन्त्र्यप्राप्ति-कामनारूपं वातावरणं सर्वानपि प्रबुद्धान् भारतीयान् प्रेरयति स्म। इतश्च श्रीराजेन्द्रप्रसादस्य बाल्यकाले तदीया माता धार्मिकवृत्तिमती

सती राजेन्द्रं भक्तिगीतानि तथा रामायणादीनां कथानिका अश्रावयत्। भगवदवताराणां कथासु ध्रुव-प्रह्लादादीनां चरित्राणि श्रीराजेन्द्रप्रसाद-मन्यायान् प्रति योद्धुं प्रैरयन्। जीरादेईग्रामेऽपि बहुधा धार्मिकेषु पर्वसु तत्र-त्ययोर्मठयो रामायण-श्रीमद्भागवतादि-पुराणानां कथाः प्राचलन् सायङ्काले ग्रामवासिनश्च सम्भूय रामचरितमानसस्य पाठमप्याचरन्। एतैः सर्वैः श्रीराजेन्द्रस्य संस्कारा धर्मपरिषिक्ता रामभक्तिभाविताः स्थिरतां प्राप्तास्त एव चाजीवनं दृढं सङ्गताः।

यदा श्रीराजेन्द्रप्रसादः पञ्च-षड्वर्षायुष्कः समभवत् तदा तस्य द्वाभ्यां भ्रातृव्य-पुत्राभ्यां सह स एकस्य यवनाध्यापकस्य सविधेऽध्ययनायो-पनीतः। सर्वतः प्रथमं तदानीन्तनस्थितेरनुरूपं पारसीकभाषाया अध्ययनं तेन प्रारब्धं क्रमेण जन्मान्तरीणसंस्कारप्रतिभयोर्बलेन च '**करीमा-मामकीमा-खुशहाल-सीमिया-गुलिस्ताँ-बोस्ताँ**'—प्रभृतीनि पुस्तकानि पठितानि। एवं ग्रामस्याध्यनं परिसमाप्याङ्ग्लाभाषापठनायाष्टमे वर्षे तदीयाभिभावकै-श्छपरानगर्यां प्रेषितः। श्रीमहेन्द्रप्रसादा अस्य ज्येष्ठसहोदराः पूर्वमेव तत्र पठन्ति स्म। आत्म-विश्वासेन स्वभ्रातुः साहाय्येन च तत्रत्ये जनपदविद्या-लयेऽष्टम्यां कक्षायां[1] प्रविश्य तस्मिन्नेव वर्षे प्रथमश्रेण्या सा कक्षोत्तीर्णा। विद्यालयस्याचार्याः श्रीक्षीरोदचन्द्ररायचौधुरीमहोदयास्तेनेयन्तः प्रभाविता यत् तै राजेन्द्रप्रसादः कक्षाद्वयमतिक्राम्याग्रे प्रवेशितः।

श्रीराजेन्द्रप्रसादस्य छपरानगर्यां अध्ययनकाले तेषामेकोऽभिभावकः पण्डित आसीत्। तस्याभिधानं '**विक्रमादित्यमिश्र**' इत्यभूत्। स हि सुदृढः सनातनधर्मानुयायी प्रत्यहं सरयूनद्यां स्नात्वा निकटस्थायां देव-वाटिकायां पूजापाठादीन् विधायैवाशनादिकमकार्षीत्। अवकाशकाले स पण्डितवरो राजेन्द्रप्रसादं पौराणिकीभिः कथाभिस्तथा रामायणमहाभारतयोरन्येषां धर्मशास्त्राणां चोपदेशवचनैः प्रायेण प्रत्यबोधयत्। अत्रैव विद्यालये प्रधानपण्डितपदमलङ्कुर्वद्भ्यो महामहोपाध्याय-श्रीरघुनन्दनत्रिपाठिभ्यः श्रीराजेन्द्रप्रसादेन संस्कृतभाषायां लघुकौमुद्या अध्ययनं विहितं यच्च न चिराय प्रवृत्तम्। एतेन शैशवे परिवारिकीभ्यो महिलाभ्यः स्वस्या जनन्या मुखेभ्यः श्रुताः कथास्तथा प्राभातिकगीतयो व्रत-पर्वणामाचाराश्च श्रीराजेन्द्रस्य स्वभावे समुचितं प्रभावमस्थापयन्। 'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवे'दित्युक्त्यनुरूपं संस्कृतस्य मधुरस्वभावशालिनः श्रीराजेन्द्रप्रसादस्य समग्राऽपि जीवनधारा तदनुरूपैवावर्तत। अत एव बाल्यात् प्रभृति

---

१. तस्मिन् काले विद्यालयेषु कक्षासङ्ख्याऽवरोहक्रमेण सूच्यते स्म।

श्रीराजेन्द्रः कदापि कस्या अपि वस्तुन उपलब्धये हठं नाऽकरोत्, कस्यैचिदपि वार्तायै ज्येष्ठान् नारुणात् स्वाभाविकं सङ्कोचं धारयंश्च यदृच्छालाभ-सन्तुष्टो भोजने पाने च निराग्रह एव नियतानि कर्माणि समपादयत्। ग्रामीणे जीवनेऽग्रिमजीवनस्य मूलभित्ति-निर्मितिवशाद् राम-लीला-रामायणपाठ-धार्मिक-सहिष्णुता-परस्परसौहार्द-सर्वसम्प्रदाय-समादर-प्रभृति-सत्प्रवृत्तयस्तं सकलमपि जीवनं तादृशमेव व्यत्यापयितुं प्रैरयन्। यतो हि—

संस्काराणां भवति वपनं बीजरूपेण यादृक्,
तेषां सेकोऽप्यथ शुचितया साधु सम्पाद्यते यः।
तस्यैवाग्रेऽङ्कुरणमपि तैर्वीक्ष्यते तद्वदेव,
स्वच्छं नानासुम-फलयुतं जीवनं संस्कृतानाम्॥२॥

छपरायां राजेन्द्रप्रसादः श्रीमहेन्द्रप्रसादेन सह भाटकेन गृहीते लघीयसि प्रकोष्ठेऽवसत्। तत्र केवलं वर्षद्वयमेव तदीयमध्ययनं प्राचलत्। यतो हि वर्षद्वयानन्तरं श्रीमहेन्द्रप्रसाद एण्ट्रेन्सपरीक्षामुत्तीर्य पटनानगर्या महाविद्यालये पठनार्थमायातस्तदा श्रीराजेन्द्रप्रसादस्यापि पाटलिपुत्र एव पठनमुचितं मत्वा तमपि तत्र टी० के० घोष-अकादमी-नाम्नि विद्यालयेऽभि-भावकाः प्रावेशयन्। तत्र च—

निरन्तरं स्वाध्ययने प्रवृत्तः, पूर्वोपलब्धोन्नतियोग्यताञ्च।
प्रामाणयद् भूरिपरिश्रमेण, राजेन्द्र एव प्रतिभासमेतः॥३॥

रुचिं क्रीडने कूर्दनेऽपि स्वकीयां,
मनाग् वर्धयित्वाऽथ तत्र प्रवृत्तः।
परिश्रम्य दैनन्दिनं जीवनं स्वं,
सुयोग्यं प्रशस्यं व्यधान्निर्मलं च॥४॥

पाटलिपुत्रे प्रायो वर्षद्वयमतीतम्। ज्येष्ठभ्रात्रा एफ० ए० परीक्षा दत्ता श्रीराजेन्द्रप्रसादश्च षष्ठ्याः श्रेण्याः पञ्चम्यां ततश्च चतुर्थ्यां प्राप्तः। सर्वासु परीक्षासु प्राथम्यमवाप्तमेव। एतन्मध्यकालमेव प्रपितृवराणां ततः परञ्च कियता चिदन्तरेण पितामह्याश्च स्वर्गवासेन सर्वोऽपि कर्मभार-स्तदीयपितृवरेष्वेवापतितः। जन्मनस्त्रयोदशे वर्षे श्रीराजेन्द्रप्रसादस्य विवाहसंस्कारः समभवत्। वरपूजायां यौतुके च परिवारप्रतिष्ठानुरूपं धनादिकं प्राप्तम्। सौभाग्यकांक्षिण्या **श्रीराजवंशीदेव्या** पाणिग्रहणेनो-भयोरपि कुलयोरानन्दोल्लासवृद्धिरतितरामवर्धत।

विवाहः संस्कारो नहि वचनमपि नैवास्ति च भुवि,
न वा तल्लोकानामुचितरुचिचिन्ता-फलमपि।

मिथो दिव्यैर्भावैर्विरलविरलाकर्षणवशाद्,
हृदोरेतत् पूतं भवति शुभमात्मार्पणमिति ।।५।।

सौभाग्यवत्याः श्रीराजवंशीदेव्याः पितृवरा आरानगर्यां 'मुख्तार'-कार्यं सम्पादयन्ति स्म तेषामनुजश्च बलियानगरे प्राड्विवाककर्मणि रतोऽभवत् ।

यद्यपि साम्प्रतिकानामियं धारणा बलवत्यस्ति यद्-'विवाहेन निबद्धः किशोरः शिक्षायां शिथिलो भूत्वा भाविनि जीवने स्वकीया-मुन्नतिं कर्तुं न शक्नोति । शनैः शनैः सांसारिके पाशे निबध्नाति जीवनो-पयोगीनि साधनानि प्रति तस्य लिप्सा प्रसरति, यौवनारम्भकाल एव च पथभ्रष्ट इव कान्दिशीकतां प्राप्नोति।' परं श्रीमति राजेन्द्रे नाभूत् तादृशः कोऽपि दुष्प्रभावः । स हि तादृश्यामेव स्थितौ पठने स्थिरमतिः सन् निरन्तरमग्र एवाध्ययनमकरोत् । यतः —

ये वै साहसिकाः स्वकर्मनिरता लक्ष्याप्तये सर्वदा,
संलग्ना भुवि सन्ति ते विचलतां नो यान्ति कस्मादपि ।
सम्प्राप्तस्य गतिं विचिन्त्य सुधिया योग्यं विधायाग्रतो,
गच्छन्ति प्रतपन्ति संविदधति स्निह्यन्ति गृध्यन्त्यपि ।।६।।

ज्येष्ठा भ्रातर एफ० ए०परीक्षायामुत्तीर्णाः । तैरभिलषितं यत् कालि-कात्तानगर्यां पठेयमिति । तदनुसारं नानाविधैरूहापोहैर्विचार्य तत्रागन्तुकानां काठिन्यानामार्थिककष्टानां विश्लेषणानन्तरं ते तत्राध्येतुं प्रस्थिताः । श्रीमतो राजेन्द्रस्य तैः सह प्रस्थानमनुकूलं नासीदिति मत्वा स हथुआ-स्थिते विद्यालये प्रवेशितः । तत्रत्याध्यापन-परिपाटी प्राचीनपरिपाटीवावर्तत। पठितस्यांशस्याग्रिमे दिवसे कण्ठस्थीकृत्य श्रावणं तस्यां प्रमुखमासीत् । तथाकर्तुं च श्रीराजेन्द्रस्य मनोऽनुज्ञां नादात् । यदधीतं तस्य विभावनं विनैव स्मरणं सत्यमेव समुचितमपि नाभूत् । अध्यापकास्तस्य तादृक् काठिन्यमविज्ञाय यदा तदुत्साहं श्लथयन्ति स्म तदा स चिन्तया किङ्कर्तव्य-विमूढतामपि प्राप्नोति स्म । प्रान्ते राजेन्द्रप्रसादो रुग्णोऽभवत्, तत्कारणादेव वार्षिकीं परीक्षां दातुमपिनाशक्नोत् । ग्रीष्मावकाशे समागतैर्ज्यायः-सहोदरैरिदं सर्वं विज्ञाय विश्लिष्य च पुनश्छपरायामेव प्रवेष्टुं निश्चितम् । पुनस्तत्र प्रविश्य स्वस्थेन चेतसाऽध्ययनमारब्धम् । 'स्वस्थे चित्ते बुद्धयः संस्फुरन्ती'ति लोकोक्तिः सत्या सती राजेन्द्रप्रसादस्य मनोऽपि स्वतः स्फूर्तया वृत्त्याऽध्ययने प्रावर्तयत् ।

छपराविद्यालये भूयांसश्छात्रा अपठन्, तेषां त्रयो विभागा अक्रियन्त । तत्रत्येष्वध्यापकेष्वेके बङ्गीया अध्यापका 'रसिकलाल राय'- नामान आसन् ।

अतीव सौजन्यमूर्तीनां तेषामध्यापनं छात्रान् प्रति स्नेहश्चापि सुबहु श्लाघनीयावभूताम्। छात्रा अपि तानतीव सम्मानयन्ति स्म। श्रीमति राजेन्द्रप्रसादे तेषां महती कृपाऽवर्तत। तेषामेव प्रेरणयोत्साहवर्धनेन च श्रीराजेन्द्रप्रसादस्याध्ययनमुज्ज्वलं प्रभावपूर्णं च भूत्वाऽग्रे क्रमशः सर्वासु कक्ष्यासु प्राथम्यं प्रापयत्। एवमेव श्रीराजेन्द्रप्रसादाभिधाना अप्येके ऽध्यापका इतिहासमध्यापयन्ति स्म, तेषां अध्यापनेनापि चरित्रनायकस्य मनः पूर्णं प्रभावितम्। अध्यापकस्य ये गुणा भवन्ति ते सर्वेऽपि श्रीरसिक-लालरायमहानुभावे सामस्त्येन स्थिता अभूवन्। ते न केवलमध्यापनमेवा-कार्षुः परं तेन सहैव छात्राणां चारित्र्यसंरक्षणं जीवनस्योन्नतये सन्मार्ग-दर्शनं प्रत्येकं सत्कर्मणि परिश्रम्याग्रे वर्धनाय च प्रोत्साहनमपि प्रादुः।

तेष्वेव दिवसेषु महामार्याः प्रकोपेन राजेन्द्रप्रसादस्य स्वास्थ्यं विकृतम्, यथासमयं शुल्कप्रदानमपि न सम्पन्नं तथापि श्रीरसिकलाल-रायाणां मार्गदर्शनेन श्रीराजेन्द्रप्रसादस्य परीक्षायामधिकाङ्कोपलब्ध्या च साफल्यमवाप्तम्। छात्रवृत्तयोऽपि प्राप्ताः। एन्ट्रेन्स-परीक्षा च १९०२ ई० वर्षे सर्वप्रथमश्रेण्या समुत्तीर्णा। एवं गुरोर्गरीयसी कृपा फलवती सम्बलवती च सती राजेन्द्रस्य जीवनमुन्नयन्ती व्यराजत्।

गुरोः कृपा-स्पर्शमणेः प्रभावात्, कालायसोऽप्येति हिरण्मयत्वम्।
स्वयं विशुद्धाय निजप्रदीप्त्या, तदा किमुच्येत हिरण्मयाय ॥७॥

***

राष्ट्रियता-रस-सञ्चारः

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते।
तयोर्यत् सत्यं यतरदृजीयस्तदित् सोमोऽवति हन्त्यासत् ॥

(ऋग्वेद ७।१०४।१२)

यस्या भुवो नीर-समीर-योगादन्नेन भूम्ना फलितैः फलैश्च।
पुष्णन्ति वर्ष्माणि तदीय-रक्षा-सज्जादिवस्तून्यपि सन्तु तज्जाः ॥१॥

श्रीमतो राजेन्द्रप्रसादस्य जीवन-पद्धतौ राष्ट्रियभावना-बीजस्य प्राथमिकमङ्कुरणं तदीय-सहोदरस्य श्रीमहेन्द्रप्रसादस्य प्रेरणयैवाभवत्। इलाहाबादस्य 'म्योरकालेज'तो बी० ए०-परीक्षामुत्तीर्य कलकत्तास्थे 'डफ-कालेजे' एम० ए० कक्ष्यायां तथा 'रिपन-कालेजे' बी० एल०-कक्ष्यायां प्रविष्टः श्रीमहेन्द्रप्रसादो यदा-यदा ग्रीष्मावकाशं यापयितुमायाति स्म तदा तदा

श्रीराजेन्द्रप्रसादेन सह तदानीं प्रवृत्तानां घटनानां चर्चाऽपि भवति स्म। एकदा १८९९ ई० वत्सरे ज्यायसा सहोदरेण स्वदेश्यान्दोलनस्य चर्चा विहिता तथा स्वेन सह कानिचित् स्वदेशिवस्त्राण्यपि सआनयत्। तदाकर्णनेन श्रीराजेन्द्रस्य राष्ट्रियत्वाङ्कुरोद्गमेन साकमेव विदेशिवस्त्रत्यागनिर्णयोऽपि दृढतां गतः। तदा प्रभृत्येव स्वदेशिवाससामाजीवनं व्यवहरणं श्रीराजेन्द्रप्रसादेनाङ्गीकृतं निर्व्यूढं च। महात्मगान्धिनः खादीधारणान्दोलनावसरात्तु तदेव समादृतम्।

अन्तर्बाह्यं सकलमपि यत्तत्र सर्वत्र साम्यं,
स्वच्छः स्पष्टो व्यवहरणजः स्वीयदेशानुरागः।
यस्मिन् निष्ठा सततमुचिताचारवृत्तिस्तथैव,
प्रेष्ठो भावो लसति मनुजे तत्र तद् राष्ट्रियत्वम् ॥२॥

इयं निष्ठा क्रमेण पोषं प्राप्य निरन्तरं जीवनस्य सर्वासूपयोगिनीषु सामग्रीषु स्वदेशानुरागितामेवास्थिरयत्। भ्रातृवरस्य श्रीमहेन्द्रप्रसादस्य दृढव्रतत्वं सत्यवादित्वं दीन-हीनानामुपकर्तृत्वं मूकसेवित्वञ्च श्रीमते राजेन्द्रप्रसादायादर्शरूपाणि भूत्वा तस्यान्तर्हितानां बीजानामङ्कुरणे पल्लवने च प्रारम्भादेव सहयोगीन्यभूवन्। देशस्य स्वातन्त्र्याय सर्वदा प्रयतमानयोरनेकरूपेण च स्वदेशं सेवमानयोरनयो रामलक्ष्मणयोश्चरित्रं सर्वेभ्योऽनुकरणीयतामेवासादयत्।

'कलकत्तायां गत्वाऽहमप्यग्रेऽध्येष्यामीति' मनःकामना श्रीराजेन्द्रस्य मनसि बहोः कालादासीदत एव एन्ट्रेन्स-परीक्षोत्तीर्णः सन्तत पूज्यानामनुमत्या ज्येष्ठभ्रात्रा सह तत्र गतवान्। गमनात् पूर्वं स्वस्य प्राक्तनप्रधानाध्यापकानामाशीर्वादग्रहणाय श्रीराजेन्द्रप्रसादस्तेषां समासत्तावगमत् तैश्च प्रसत्तिपुरस्सरमाशीर्दत्ता सहैव प्रतिबोधाय कानिचिन्निर्देशनान्यपि दत्तानि, येषु प्रतिस्पर्धिनां छात्राणां पराजयप्रयासेभ्यश्चारित्र्यदूषणप्रयत्नेभ्यस्तथा महानगर्या दूषितवातावरणात् संरक्षणं परिश्रमपूर्वकमध्ययनं स्वोन्नतये सदाऽग्रे वर्धनमित्येतानि प्रमुखान्यासन्। एतैः प्रभावितेन श्रीराजेन्द्रप्रसादेन मनस्येव मनसि तथाकर्तुं प्रतिज्ञातम्।

तत्र—'ईडन-हिन्दू-छात्रावासे' भ्रात्रा सहोषित्वा 'प्रेसिडेन्सी-महाविद्यालये' प्रवेशं सम्प्राप्यातीव निष्ठयाऽधीतं तत्परिणामश्च प्रथमश्रेणीयशःप्रदः प्राप्तः। अस्मादेव कालादस्य भाविनो राष्ट्रपतेर्जीवनपद्धतेरपि निर्माणमभूत्। प्रत्येकं गम्भीरतया विश्लेषणं तदनुसारं च निर्णयनमिति तस्य जीवनपद्धतेर्वैशिष्टचमभूत्।

यदा श्रीराजेन्द्रप्रसाद एफ० ए० परीक्षामुत्तीर्याग्रिममध्ययनमकरोत् तदा बङ्गभङ्गमभिलक्ष्य तद्विरोधे कलकत्तायां भूयस्यः सभा आयोज्यन्ते स्म, तासु श्रीराजेन्द्रप्रसादोऽपि निश्चितरूपेण गत्वा भाषणान्यश्रृणोत्। ७ अगस्त १९०५ ई० दिने स्वदेशिवस्तूनां व्यवहारप्रचारस्य तथा वैदेश्यवस्तूनां बहिष्कारस्य निर्णयोऽभूत् तदा सोऽपि तत्रासीत्। तत्कृते व्रतमिदं सुपरिपाल्यमासीद् यतः स स्वज्येष्ठभ्रातुः प्रेरणया बहोःकालात् पूर्वमेव स्वदेशिवस्त्राणां प्रयोगे सन्नद्धोऽभूत्। एतेन सह नैकशो विद्यार्थिनोऽपि विदेशिवस्तूनां बहिष्काराय तत्परा अभवन्। विदेशिवस्त्राणां दाहोपि महाविद्यालये समूहशोऽक्रियत। अयं राजेन्द्रप्रसादस्य राष्ट्रियान्दोलने प्रवेशस्य प्रथमः कल्प आसीत्।

बङ्ग-भङ्ग-स्वदेश्यान्दोलनाभ्यां विद्यार्थिनोऽत्यन्तं प्रभाविताः। महतोत्साहेन प्रबुद्धाश्छात्रा महाविद्यालयान् विसृज्य राष्ट्रियमहाविद्यालयं प्रविशन्ति स्म, अध्ययने ध्यानं न दत्त्वा प्राय आन्दोलनवृत्तिष्वेव संलग्नमानसा दृश्यन्ते स्म। ईदृश्यां स्थितावपि श्रीराजेन्द्रप्रसादेन स्वीयं वास्तविकं लक्ष्यं न विस्मृतम्। यद्यपि विविधव्यापृत्याऽध्ययने किमप्यौदासीन्यमेवावर्तत तथापि बी० ए० परीक्षायामन्यापेक्षया सर्वोच्चं स्थानं तेन प्राप्तम्। इतिहासस्य विशिष्टाध्ययने प्रथमं स्थानं तथाऽऽङ्ग्लभाषायां दर्शनशास्त्रे चोच्चाङ्काः प्राप्ताः। फलतश्छात्रवृत्तिद्वयी समुपलब्धा। कलकत्ताविश्वविद्यालये च एम० ए०-बी० एल०—परीक्षयोरध्ययनाय नामाङ्कनं कारयित्वा तदर्थमध्ययनं प्रवर्त्तितम्।

अभिमुखं विपदां यदि पर्वतोऽप्युपगतोऽविनतो विततो भवेत्।
नहि ततोऽपि बिभेति दृढव्रतो, व्रजति सम्मुखमेव सदोद्यतः ॥३॥

तेन सदैव परितः प्रसृतेन राजनीतिकेन विचारसञ्चारण-तच्चञ्चरीकैश्चिरं प्रेरितः किमपि कर्तुमात्मनो मनसाऽप्युत्साहितः स छात्राणां सङ्घटनाय व्यचारयत्। ततः परं श्रीमता राजेन्द्रप्रसादेन स्वकीयच्छात्रजीवनादेव सङ्घटनसञ्चालन-सम्मेलनादि-प्रवृत्तिषु मनोयोगो विहितः। यदा स बी० ए०-परीक्षामुत्तीर्य एम० ए० तथा बी० एल०-परीक्षयोरध्ययने रतोऽभूत् तदा स्वदेश्यान्दोलनं तीव्रतरमासीत्। तस्य प्रभावश्छात्रेष्वप्यपतत्। कलकत्तायां स्थिता विद्यार्थिनोऽपि तस्य प्रचारायाविचारयन् सहैव तैरिदमप्यनुभूतं यदस्माकं बिहारवासिनां छात्राणां सङ्घटनेनैकेनावश्यं भवितव्यं यदाधारेण प्रचारादिकार्येषु सौकर्यं सेत्स्यति। एतेनैका बहिारवासिच्छात्र-सम्मेलन-योजना निर्मिता। अस्य सम्मेलनस्य व्यवस्थासम्पादनाय श्रीराजेन्द्रप्रसादः पटनानगरं प्रस्थितस्तत्र च छात्रैस्तथा तत्रत्यैर्विशिष्टजनैः सह विचारादीन् विधाय स्वागतसमितेर्योजनं कृत्वा पटनामहाविद्यालयस्य

महति भवने सम्मेलनं सम्पादितम्। अपूर्वेणोत्साहेन विशिष्टा नागरिकास्तथाऽनेके छात्राः सम्मिलिताः। तत्र श्रीमता राजेन्द्रप्रसादेनाङ्ग्लभाषायामेकं विशिष्टभाषणं पठितं यत् सर्वैरपि श्रोतृभिः प्रशंसितम्।

नियम-निर्धारणे कर्तव्य-निर्णयने कार्य-प्रवर्तने च सर्वत्र पूर्णं सहयोगं प्रदाय श्रीराजेन्द्रप्रसादेन महती ख्यातिस्तथा प्रमुखनागरिकाणां प्रेमार्जितम्। इदं सम्मेलनं पञ्चदशवर्षावधि भूयांसि राष्ट्रसेवापराणि कार्याणि सम्पादयदनेकान् प्रौढान् कार्यकर्तॄनुदपायद् ये ततः परमसहयोगान्दोलने नेतृत्वभारवहने च समर्था अभवन्।

भविष्यते क्षेत्र-विधानमुत्तमं, बीजानि निक्षिप्य सुसेचनं तथा।
विधाय सम्मेलन-माध्यमेन तत्फलानि भोक्तुं च समर्पणं कृतम्॥४॥

एवमेव १९०६ ई० वर्षे कांग्रेसस्याधिवेशनं कलकत्तानगर्यां निर्णीतमासीत्। अस्मिन् सम्मिलितुं श्रीमतो राजेन्द्रप्रसादस्य वाञ्छाऽतीव प्रबलाऽवर्तत। अतः सर्वतः प्रथमं स्वयंसेवकरूपेण तत्रागच्छत्। दादाभाईनौरोजीस्तत्र साभापत्यं निरवहत्। अस्मिन् शीतोष्ण-समशीतोष्णदलानां सर्वेऽपि कार्यकर्त्तारः सममिलन्। सहैवैका प्रदर्शन्यपि समायोजितासीत्। सौभाग्यान्मञ्चव्यवस्थायां स्वयंसेवकरूपेण यत्र तत्र श्रीराजेन्द्रप्रसादेन सेवा कृता। सर्वेऽपि भारतस्य महान्तो नेतारः प्रथममेवात्र दृष्टाः, सुबहूनां भाषणान्याकर्णितानि। एतेन काङ्ग्रेसं प्रति महती श्रद्धा समुदिता परं यथानियमं तस्मिन् प्रवेशस्तु १९११ ई० वर्ष एव विहितः। अखिलभारतीयकाङ्ग्रेससमित्याः सदस्यरूपेण तत एव राष्ट्रसेवाकार्यं तेन प्रारब्धं यद् आजीवनं तस्य सहयोग्यभूत्।

सत्येन निश्चितधिया प्रकरोति कार्यं,
यत्स्वीकृतं तदनु तन्न जहाति यो वै।
स्वार्थं विसृज्य परमार्थविधौ नियुङ्क्ते,
तज्जीवनं सफलमामनुतेऽत्र लोकः॥५॥

तेषु दिवसेषु समुद्रयात्रां विधाय विदेशीयाया '**आई० ए० एस०**'-परीक्षाया उत्तरणमतीव महत्त्वपूर्णं कर्म मन्यते स्म। आङ्ग्लानां शासने भारतीया अत्रोच्चैःपद-प्राप्तये तदर्थं प्रायः प्रायतन्त। प्रवाहानुरूपं प्रतिभासम्पन्नस्य श्रीराजेन्द्रप्रसादस्य मनस्यपि विचारणेयं समुदिता। पारिवारिकाणां धार्मिकदृष्ट्या समुद्रयात्राया अनुमतिर्नैव लप्स्यत इति कारणात् तेन गुप्तरूपेण व्यवसितम्, वस्त्रादीन्यपि सज्जीकृतानि। भ्रातुरनुमतिस्तु कथञ्चिन् मिलिता, परमस्वस्थानां पितृवराणां तथाऽन्येषां परिजनसदस्यानामनुज्ञा नामिलदतः स विचारः परित्यक्तः। कालान्तरेण

तान्येव वस्त्राणि सङ्गृहीतं द्रव्यं च नीत्वा तन्मित्रं श्रीशुकदेवप्रसादवर्मा विदेशं गतवान्। अद्भुता किल कालकलना !

१९०७ ई० वर्षस्य तृतीये मासि दुःसाध्येन रोगेण ग्रस्ताः श्रीमहादेवसहाया दिवं गताः। श्रीमहेन्द्रप्रसादा भ्रातरोऽपि डुमराव-ग्रामस्य राजकीय-विद्यालये शिक्षकत्वेन कार्यमारभन्त। तेषां तदानीं यावत् पुत्रीद्वयं पुत्रश्चेति सन्ततित्रयमजायत। श्रीराजेन्द्रप्रसादस्यापि मृत्युञ्जयनाम्नः सूनोर्जन्म तस्मिन्नेव हायनेऽभवत्। पितृपादानामभावे सकलस्य परिवारस्य पालन-पोषण-दायित्वं ज्येष्ठे भ्रातर्येवापतितम्। एवंविधायां स्थितावपि श्रीमहेन्द्रप्रसादेन निश्चितं यदार्थिकचिन्तया केनाप्यन्येन हेतुना वा राजेन्द्रस्याध्ययने कदापि कथमपि कापि बाधा नागच्छेदिति। परिणामतः कलकत्तायां वसतोऽस्य सर्वोऽपि व्ययभारस्तैरेव निर्व्यूढो विमुक्तचिन्तः श्रीराजेन्द्रप्रसादश्च स्वाध्ययने पूर्णया निष्ठया तत्परोऽभवत्। एवं सत्यपि पितृणां स्वःप्रस्थानेन, 'आई० सी० एस०'-पदव्यै समुद्रयात्रायाः प्रबलया भावनया तथा महाविद्यालयाद् बहिः प्रचलितेषु कर्मसु प्रवृत्त्या-व्यग्रमानसतया १९०७ ई० वर्षे एम० ए० परीक्षायां द्वितीयश्रेण्यैव साफल्यं प्राप्तम्। १९०८ ई० वत्सरे स्वस्य सुहृदः प्रेरणया मुजफ्फपुर-महाविद्यालयेऽध्यापनमारब्धं मासदशकं यावच्च तत्राध्यापितम्। सहोदराणां भूयोभूयः कथनेन प्रोत्साहनेन च भूयोऽपि विधि-शास्त्राध्ययनाय निश्चित्य १९०९ ई० वर्षे श्रीराजेन्द्रप्रसादः कलकत्तामगच्छत्। तत्र च—

छात्रस्याध्ययनं तपः समुदितं तत्रैव निष्ठा परा,
तत्राप्यात्म-परिश्रमेण सुविधा-सम्पादनं सर्वतः।
कुर्वन् योऽहरहः स्वबोधसदनं निर्माति सद्यत्नत-
स्तस्योपैति पदोः सदा सफलता सार्वत्रिकी शाश्वती ॥६॥

इति स्मारं स्मारं '**बी० एल०**' परीक्षाया अध्ययनं विधाय साफल्यमधिगतम्। अस्या एव परीक्षाया द्वितीभागरूपेण वर्षद्वयं जहादुररहीमनाम्नो वाक्कीलेन सह कार्यसम्पादनपूर्वकं महाविद्यालये स्वतन्त्ररूपेणाध्यापनमपि विहितम्। न्यायाधीशश्रीदिगम्बरचटर्जीमहानुभावस्य पुत्रं पाठयतस्तस्य न्यायाधीशैः सह परिचयोऽपि सञ्जातः।

एतेनोच्चन्यायालये स्वव्यवसायारम्भात् पूर्वमेवैकेन न्यायाधीशेन सह परिचयस्यावसरोऽपि सम्प्राप्तः। स्वल्पकालानन्तरं खानबहादुर-शमसुलहुदामहोदयस्य निकटे स्थानं रिक्तमभूत् तदा तेषां निकटे कार्यमारब्धम्।

यस्मिन् परा भक्तिरुपास्यकार्ये, नैवान्तरे कापि मुधा विभक्तिः।
निष्ठा पटिष्ठा विनयानुरक्तिस्तस्मिञ्जने कस्य भवेन्न सक्तिः॥

***

पूषा-कला

स्वदेश-सेवा--व्रत-सम्प्रतिष्ठा

अग्ने॑ व्रतपते व्र॒तं च॑रिष्यामि॒ तच्छ॑केयं॒ तन्मे॑ राध्यताम्।
इ॒दम॒हमनृ॑तात् स॒त्यमुपै॑मि ।।

(यजुर्वेद० १।५)

नारोपिता नैव पदादिलोभाद्, बहिःप्रकाशा निजराष्ट्रभक्तिः।
कदापि भूमौ भजते स्थिरत्वं, सा मन्यते सैकतिलैव भित्तिः ।।१।।
अन्तःस्फुरद्भावसमीहितार्था, निःस्वार्थरूपेण समादृता या।
राराजते सा हृदि वर्तमाना, स्वदेश-सेवाव्रत-सम्प्रतिष्ठा ।।१।।

श्रीमतो राजेन्द्रप्रसादस्य स्वभावः सङ्कोचशील आसीत्। कस्यापि कर्मणः स्वीकृतावातुरत्वं तस्मै नारोचत। प्रायः स्वयं क्वापि विनावश्यक-कार्यं नामिलन्न च मिलनानन्तरमपि स्वपक्षतः किमपि कथनं निवेदनं वा स ह्यकरोत्। एवं सत्यपि सामाजिक्याः परिस्थतेः परिज्ञानं महद्भिः साकं परिचयस्तेषां राष्ट्रसेवासम्बद्धानां क्रियाकलापानां ज्ञानेन सहैव नीर-क्षीरविवेकदृशा परिशीलनं सर्वास्ववस्थासु जागरूकत्वं च तस्मिन् व्यराजदेव। यत्र तत्र प्रवर्तितानां राष्ट्रियान्दोलनानां समाचारास्तस्यां महानगर्यां सम्पद्यमानानि महतां नेतृवराणां भाषणानि श्रुत्वा तथा नानाविधानि क्रान्तिकारिणां प्रदर्शनानि दृष्ट्वाऽस्यान्तरात्मनि विराजिता स्वदेश-सेवा-भक्तिः प्रस्फुटिता सत्येनं भूयो भूयः प्रैरयत्।

भारते च तदा **'भेदं जनयत राज्यं कुरुत'** इति नीतिमनुसरन्त आङ्ग्ला अप्युत्तरोत्तरं दमनाय सन्नद्धा नवनवान् कूटादेशान् प्रसार्यं स्वातन्त्र्यभावनाऽग्नौ सर्पिःप्रदानमिव भारतीयजनमानसोत्प्रेरणां जनयन्ति स्म। **'बङ्गभङ्ग'**स्यादेशो **लार्ड-कर्जनेन** प्रसारितस्तद्विरोधे प्रचण्डमान्दोलन-मभूत्। बहिष्कारस्यान्दोलनमपि प्रारब्धम्। एतत्समकालमेव क्रान्तिवादिना-मेकं दलमपि प्रकटितम्। अस्मिन् दले विदेशि-शासनात् स्वदेशस्य मुक्तये हिंसात्मकानामुपायानामनिवार्यत्वमाशास्य —**वीरसावरकर-श्यामजीवर्म-वीरेन्द्रघोष-भूपेन्द्रनाथदत्त - सरदारअजीतसिंह-भाईपरमानन्द-**

बालमुकुन्द-लालाहरदयालादिभिर्नेतृत्वमादृतम् । अस्य क्रियाशीलता विदेशेष्वपि व्याप्ता । इंग्लैण्डदेशे श्यामजी-कृष्णवर्म-वीरसावरकराः, फ्रान्सदेशे **मेडम कामा**, अमरीकायां **लालाहरदयाल**प्रभृतयो नैरन्तर्येण क्रान्ति-विचारान् प्रासारयन् । अस्मिन् काले—

स्वतन्त्रताप्राप्ति-विचारमूलं, दृढं विधातुं बहुशः प्रयत्नाः ।
यैर्यैर्महद्भिः पुरुषैरुपात्तास्तैरेव जागर्तिरिहोपयाता ।।३।।
दमनस्य परम्पराऽपि सा, प्रसृता सत्वरमेव भारते ।
विनिगृह्य दुरात्मभिर्जनाः, पशुमारं परितश्च मारिताः ।।४।।
कारासु सम्पात्य भृशं प्रपीडिताः, स्वदेशमुक्तेर्नितरामभीप्सवः ।
लेख--प्रकाशेऽप्यथ मुद्रणादिषु, दृढं गुरुण्डैः प्रतिबन्धनं कृतम् ।।५।।

अस्मिन्नवधौ बङ्गभूमौ न केवलं राजनीतेर्जागर्तेरेवाङ्कनं प्रतिभातं प्रत्युतैकस्य सांस्कृतिकस्य पुनरुत्थानस्य महतो धार्मिक-स्यादर्शवादस्य सामाजिकस्य पुनर्जीवनस्यापि सदुत्साह-तरङ्गाः प्रासरन् ।

'प्रार्थनासमाज'स्य तथा 'डेकनएजूकेशन-सोसायटी' संस्थयोर्ययोः कर्ण-धारा—'एम० जी० रानडे-आर० जी० भण्डारकर-गोपालकृष्णगोखले-बाल-गङ्गाधरतिलक-गणेश आगरकर'-सदृशा उच्चशिक्षाशालिन आसन्—गति-विधिभिर्बङ्गप्रदेशवदेव महाराष्ट्रमपि सामाजिक-सांस्कृतिकान्दोलनानां महत्त्वपूर्णं केन्द्रमभूत्। भारतस्य परिष्काराणामितिहासे गोपालकृष्ण-गोखलेमहोदयैः १९०५ ई० वत्सरे स्थापितायाः 'सर्वेण्ट्स आफ इण्डिया-सोसायटी' संस्थाया एका महत्त्वपूर्णा घटनाऽऽसीत्। तस्या उद्देश्यमभूत्—'स्वदेशस्य भारतस्य सेवायै वास्तविकानां सेवकानां प्रशिक्षणं तथा वैधानिकैः प्रकारैर्भारतीयजनताया हितसाधनम् ।'

यदा श्रीराजेन्द्रप्रसादः कलकत्तायां वाक्कीलतायै प्राथमिकं व्याव-हारिकं प्रशिक्षणं लेखकरूपेणाकार्षीत् तदा तस्याः संस्थायाः सिद्धान्तैः कार्यक्रमैश्च तदीये मनसि प्रभावाङ्कनमप्यासीदेव । परं मन्ये स कालं प्रतीक्ष-माण एवाभूत् । यतो हि—

यदा भवति मानसे मतिमतो विचारोदय—
स्तदा स परिवीक्षते भुवि बलाबलं तत्त्वतः ।
विचिन्तयति भाविनीं परिणतिं पुनस्तत्कृते,
प्रयस्यति च नित्यशः परमधीरया प्रज्ञया ।।६।।

अत. स्वदेशसेवार्थमनुरक्तेन राजेन्द्रप्रसादस्यान्तरङ्गेण यदीप्सितं तस्य परिणतिकालः १९१० ई० वत्सरस्य मार्च-मासे सम्प्राप्तः । धार्मिक्या

वृत्त्या स्वदेशसेवार्थं जीवन-समर्पणं चिकीर्षतो मातृभूमेर्दासतापाशस्य निकृन्तनाय तथा विदेशीयैर्विहितानामत्याचाराणां प्रतीकाराय श्रीराजेन्द्र-प्रसादस्य मनो व्याकुलतामेवान्वभवत्। अत एव स राजनीतिकेषु कार्येषु यदा कदा तत्परतामपि प्राकटयत्। छात्रसम्मेलनस्य कार्ये रुचिप्रकटनेन तस्मिन् साफल्यलाभेन च श्रीराजेन्द्रप्रसादस्य प्रतिष्ठा सर्वत्र वृद्धिं गता। तत्रैव कलकत्तानगर्यां वसतोऽस्य माननीयैः श्रीगोखलेमहोदयैः सह संल्लापस्य तथा तेषामुपदेशप्राप्तेः साक्षाल्लाभोऽप्यभवत्। एकदा गोखलेमहाभागस्य मनस्ययं विचार उद्भूतो यद् बिहारप्रान्तस्य केचनोत्तमा विद्यार्थिनः **'सर्वेण्ट्स आफ इण्डिया सोसायटी'**-संस्थायां संयुक्ता-भवेयुस्तदा श्रीराजेन्द्रप्रसादस्य तथा श्रीकृष्णप्रसादस्य नामनी श्रीपरमेश्वरीलाल-प्राड्विवाकेन प्रस्ताविते। तदनुसारमेतौ मिलितौ तदा तैरुक्तम्—"सम्भाव्यते यद् युवयोर्वाक्कीलताव्यवसायोऽत्युत्तमतया चलेद्

> युवां च पर्याप्तं धनमर्जयेतां, सद्भवनं वाजिरथं सेवकांश्च धनिनामिव बाह्याडम्बरपूर्णान् लभेताम्, परं देशस्याप्यधिकारः स्वस्य पुत्रेषु कोऽपि भवत्येव, किञ्च युवां पठने प्रवीणौ स्तस्त-स्मादयमधिकारो विशिष्य वर्तते। ममाप्येषैव स्थितिरासीत्। मम पारिवारिका अप्येवमेवावाञ्छन्, यदा मया सर्वं त्यक्त्वा देशसेवाव्रतं स्वीकृतं तदा प्रारम्भे सर्वेऽपि कुपिताः परं शनैः शनैः सर्वं समीचीनं सम्पन्नम्। भवद्भ्यां सहापि तथा सम्भाव्यते, किञ्चिद् विश्वस्तव्यं यत् कालान्तरेण जनाः युष्मादृशान् पूजयिष्यन्ति। जनानामाशा विद्यार्थिषु निबद्धास्ति, परं को जानीते यदि युवयो-र्मृत्युर्भविष्यति तदा तु ते सहिष्यन्त्येव।"

अस्योपदेशस्य प्रभावः श्रीराजेन्द्रप्रसादस्य स्वदेशसेवाव्रतसम्प्रति-ष्ठायां जीवनदिक्परिवर्तने च महान् सहायकोऽभूत्। अग्रजस्य स्थित्या पारिवारिक्या परिस्थित्या च यद्यपि स तदानीं तस्यां संस्थायां न संयुक्त-स्तथापि मनसि देशसेवार्थं त्याग-तपस्यापूर्वकं जीवनार्पणस्य भावदार्ढ्यं तु सम्पन्नमेव। कर्तव्य-निष्ठा तमहरहः प्रेरयन्त्येवास्थात् फलं च तदीयमग्रे परिणतम्। एतद्विषये श्रीराजेन्द्रप्रसादेनातिसंयतया धिया पत्रलेखन-माध्यमेनाग्रजस्य सम्मतये पूर्वं प्रयतितं ततः परं पारिवारिका अपि विमर्शाय सूचिताः। सर्वेषामपि मूकभावेन खिन्नता-ऽनुभवेन च विचारोऽयं शिथिलीकृतः।

स्वजना येन तुद्यन्ते येन चात्मा न तुष्यति।
तत्कार्यं नैव कर्तव्यं यद्यपि स्वेप्सितं भवेत्॥

❋

वाक्कीलता-कर्म-विलासः

गोसनिं वाचमुदेयं वर्चसा माभ्युदिहि ।
आ रुन्धां सर्वतो वायुस्त्वष्टा पोषं दधातु मे ॥

(अथर्व० का० ३, सू० २०, मं० १०)

वाचं यः प्रतिवादिनां विधिविदां तर्कैर्द्रुतं कीलति,
दृष्टान्तैर्निजपक्षपोषणपरैस्तत्त्वं समुन्मीलति ।
न्यायाधीशमनः प्रमाणनिचयैर्युक्त्याऽचिरं यः समा-
धत्ते तस्य चिराय चारुवचसो वाक्कीलता द्योतते ॥१॥

विधिशास्त्रमधीयानेन श्रीराजेन्द्रप्रसाद-महाभागेन कलकत्तायां 'विधिशास्त्र-महाविद्यालये' स्वस्यास्य कर्मणः साफल्याय व्यावहारिकं शिक्षणमपि तत्रत्योच्चन्यायालयस्य वरीयसो विधिशास्त्रप्रवीणस्य **श्रीशमशुलहुवा'**—महोदयस्य सविधे सहैव प्राप्तम् । प्रत्यहं तस्य महामतेर-धीनं स्वीकृतानां व्यवहाराणां सारांश-सङ्कलनं, तत्तद्व्यवहारोपयोगि-विधानग्रन्थेभ्य उदाहरण-सङ्ग्रहणं तदनुसारं च वाद-विवादाय प्रश्नो-त्तराणां सञ्चयनं विधाय तेन साकमेवोच्चन्यायालयं गत्वा तर्क-युक्ति-प्रमाणपुरस्सरं प्रस्तूयमानानामुत्तर-प्रत्युत्तराणामाकर्णनं तथाऽन्येषां वाक्कीलानां तर्क-प्रतिकर्णामपि श्रवणं कुर्वतः श्रीराजेन्द्रप्रसादस्य तद्विष-यिणी प्रतिभा नितरामुज्ज्वलाऽभवत् । व्यावहारिकेणानेन शिक्षणेन स्वस्य बलवता च परिश्रमेण विधिशास्त्रप्रवीणत्वमस्य सर्वातिशायितामप्यगच्छत् । अत एव कलकत्ता-विश्वविद्यालयस्य एम० एल०-परीक्षायां सर्वोच्चैरङ्कैः सर्वप्रथमं स्थानं तेन प्राप्तं स्वर्णपदकेन च स पुरस्कृतः ।

सनदनलसभावैः कर्मसम्पादनेच्छोः,
श्रम-शम-दम-युक्तस्यात्मशक्त्यन्वितस्य ।
सकलमपि शुभं यद् वाञ्छितं निश्चितं तद्,
भवति सफलमेवेत्यत्र शङ्कैव नास्ति ॥२॥

यदाऽस्माकं चरित्रनायकेनेयं परीष्टिरीदृशेण गौरवेण फलवती कृता तदा तदानीन्तनैर्वृत्तपत्रैः सामाजिकैर्विपश्चिद्वरैश्च भूयांसि प्रशस्तिवचांसि साशीर्वादं शुभाशंसनानिः साभिनन्दनं भृशं प्रकाशितानि । 'हिन्दुस्तान-रिव्यू'-पत्रे प्रकाशितमासीत्—

'अस्य भविष्यतो गर्भे सर्वमपि निहितं विद्यते । नास्मिन् विषये

किमप्याश्चर्यम्। ईश्वर एनं स्वस्थं रक्षेत्। भारतीयेभ्य उपलब्धं किमपि पदं तेषां महत्त्वाकाङ्क्षातो दूरे न भविष्यति। वयमाशासाना: स्मो यदयं महाभागः प्रान्तस्योच्चन्यायालये न्यायाधीशस्य पदं प्राप्स्यति तथाऽस्मिन् विषये नियुक्तिपत्रं 'राष्ट्रियकाङ्ग्रेसस्याधिवेशने सभापतित्व-सम्पादन समकालमेवोपलप्स्यते, यथा हि लाहौरनगरे न्यायाधीशाय श्रीचन्दवरकराय प्राप्तमासीत्" इति।

एवमेव भारतस्य प्रमुखैः पत्रकारैरभिनन्दनेन विशिष्टैः सामाजिकैश्च शुभाशंसनेन श्रीराजेन्द्रप्रसादस्य सभाजनं विहितम्।

मन्दं मन्दं सुरभि-रसितं मारुतं संवहन्तं,
शीतं स्फीतं विमल-सलिलं निर्झरं स्फारयन्तम्।
रम्यं सौम्यं सपदि विकसत् पुष्पमामोदयुक्तं,
दृष्ट्वा हृष्ट्वा जगति सततं कोऽभिनन्देन्न लोकः॥

कलकत्ताया उच्चन्यायालये विधिज्ञ-व्यवसायमारब्धवत एवाभियोग-विवादास्तस्मै सम्मिलितुं प्रवृत्ताः। प्रायः सर्वेऽपि व्यवहारा दीनानामभियोक्तॄणामेवायान्ति स्म। प्रारम्भत एव श्रीराजेन्द्रप्रसादमहाभागो यं व्यवहारं गृह्णाति स्म तस्मिन्नन्यस्य कनिष्ठस्य वरिष्ठस्य वा प्राड्विवाकस्य हस्तक्षेपो न भवति स्म, यस्मात् सर्वानपि तान् व्यवहारान् स स्वयमेव समपादयत्। एतेन तेषां कार्यं स्वल्पेनैव व्ययेनासिद्धयत्। तत्रोच्चन्यायालये वाक्कीलताकर्मारब्धं तदा तत्र न्यायाधीशपदं **सर-लौरेन्स जैन्किन्स**महोदया अशोभयन्त। सार्धैकवर्षं यावत् ते श्रीराजेन्द्रप्रसादमहाभागस्य वाद-विवादानशृण्वन्, तैस्त इयन्तः प्रसन्ना आसन् यत् स्वस्यावकाशग्रहणानन्तरं स्वगृहं तमाहूय स्वीयहस्ताक्षराङ्कितं छायाचित्रं प्रादुः। ततः परं तत्र **सर-आशुतोषमुखर्जी**महोदया न्यायाधीशपदे नियुक्ताः।

एकदा तेषामुपस्थितौ श्रीराजेन्द्रप्रसादेन स्वस्याधिकरणप्रसङ्गे वाद-मुपस्थापयता ये तर्काः प्रस्तुता यथा च प्रतिपक्षिणो वाक्कीलस्य तर्काः खण्डिता, यानि वा तदुपयोगीनि प्रमाणान्युपस्थाप्य वैदुष्यं निर्व्यूढं तैर्न्यायाधीशास्तेऽतितरां प्रासीदन्। न्यायालयस्य कार्य-समाप्तौ सत्यां ते श्रीराजेन्द्रप्रसादं स्वसदनमाह्वयन्। एतज्ज्ञात्वा श्रीराजेन्द्रप्रसादस्य मनसि काचिद् भीतिरुद्गता विचारितं च यद-वश्यमेव मयाविधीयमानेऽद्यतने वाद-विवादकाले काचन त्रुटिरभवदिति। मुख्यन्यायाधीशाः **श्रीमदाशुतोष-मुखर्जी**-महाभागाः किल केवलं न्याया-धिपतय एव नासन् प्रत्युत ते भारतस्य प्रसिद्धाः पुरुषा अप्यभवन्। तैः कस्यापि कनिष्ठस्याधिवक्तुः स्वगृह आकारणमेकाऽसाधारणी घटनाऽऽसीत्। अतः स व्याकुलेनानिश्चितेन च भावेन तत्रागच्छत्। न्यायमूर्तय आशुतोष-

मुखर्जीमहोदयाः स्नेहपूर्वकममिलन्। न्यायालये विहिताया अधिवक्तृतायै वर्धापना दत्ता। पृष्टं च तैः —'कियद्भ्यो दिवसेभ्यो न्यायालये कार्यमारब्धम् ?, कुत्रास्ति निवासः ? अस्मिन् व्यवसाये प्राथमिकागमनेन कीदृशमनुभूयते ?' इत्यादि । तत्रैव परिचयात्मक-वार्तालापानन्तरञ्च तैरुक्तम्—

"अहं भवतो वाद-विवाद-प्रस्तुत्याऽतितरां प्रभावितोऽस्मि । एवं तु भवतो नाम मया पूर्वमपि श्रुतमासीत्। भवतश्चर्चा पूर्वम् 'एन्ट्रेन्स'—परीक्षायां सर्वप्रथमस्थानाप्तिकालेऽप्यागच्छत्। अद्यावधि प्रत्यक्ष-सम्मेलनावसरो नोपालभत। वक्तृत्वश्रवणानन्तरमहमज्ञासिषं यद् भवान् समुचितरूपेण सज्जीभूय न्यायालयमुपैतीति । एकेन विशिष्टेनोद्देश्येनाद्य भवानत्राहूतः। अहं ज्ञातुमिच्छामि यद् भवन्निकटे यदि कियच्चिदवशिष्टः कालश्चेत्तर्हि विधिमहाविद्यालयेऽध्यापनाय समयो दीयताम्—इति।"

श्रीराजेन्द्रप्रसादस्तेषां कथनमिदमाकर्ण्येषदाश्चर्ये मनाक् द्वैविध्ये चास्थात्। स्वल्पकालं चोहापोहयोः स्थित्वा सोऽवादीत्— 'विचार्य परस्तान्निवेदयिष्यामि। अस्मिन् विषयेऽग्रजानामनुज्ञाऽप्यावश्यकी वर्तते तेऽपि प्रष्टव्या भविष्यन्ति ।' इत्युक्त्वाऽनुमतिञ्च सम्प्राप्य स स्वनिवासस्थानमागात्। भ्रातृवराय सर्वमपि वृत्तं निवेदितं तदा तैरुक्तम्—'त्वयेदं कार्यं स्वीकरणीयम्' इति। द्वितीयदिवसे स्वीकृतिः प्रहिता। इत्थं स विधिमहाविद्यालये प्राध्यापकपदमशोभयत्।

ईदृशेन सम्मानेन व्यवहारेषु च बहुधा साफल्यलाभेन तथाऽधिवक्तृकर्मणि मनोयोगपूर्वकं कार्यकरणेन सर्वत्र तस्य यशः प्रसृतिमुपेतम्। तत एवारानगरस्य रायबहादुरश्रीहरिहरप्रसादसिंहेन स्वीयभूस्वामित्वस्य सकलं विधिसम्बद्धं कार्यं तस्मै प्रदत्तम्। कलकत्तायां वाक्कीलत्वं व्यवस्यत एव तस्य रासबिहारीघोष—कुलवन्तसहाय-सदृक्षैः प्रसिद्धाधिवक्तृभिः सह परिचयोऽपि सञ्जातः।

यस्य स्वीकृतकर्मणीह सुदृढा निष्ठा भवेदात्मिकी,
साफल्याप्तिकृते च यस्य परमः स्यादात्मनि प्रत्ययः।
कर्त्तव्ये न कदापि योऽत्र विरमेत् स्वीये सदैवान्वित-
स्तस्यैवाभ्युदयः क्षितावहरहः सञ्जायते सर्वतः॥४॥

काङ्ग्रेसं प्रति दृढोऽनुरागः

अहं राष्ट्री॑ स॒ङ्गम॑नी॒ वसू॑नां चिकि॒तुषी॑ प्रथ॒मा य॒ज्ञिया॑नाम् ।
तां मा॑ दे॒वा व्य॑दधुः पुरु॒त्रा भूरि॑स्थात्रां॒ भूर्या॑वे॒शय॑न्तः ॥
(अथर्व० का० ४, सू० ३०, मं० २)

आरम्भादनुभूय देशजनतादुःखं विदेश्यैः कृतं,
नाना कष्टकरान् पथश्च सततं सम्पारयत् सर्वतः ।
स्वातन्त्र्यं समुपानयन्न च पुनः श्रान्तं शुभं तद् दलं,
काङ्ग्रेसं प्रति सर्वदाऽस्तु सुदृढो लोकानुरागः श्रिये ॥१॥

काङ्ग्रेसस्य स्थापनानन्तरं क्रमशः कतिषु वत्सरेष्वेव समग्रेऽपि भारते निवसन्तो विशिष्टस्य वर्गस्य जना राष्ट्रियचेतनाया जागर्तौ काङ्ग्रेसस्य महत्त्वपूर्णं योगदानं ज्ञातुं प्रवृत्ता आसन् । अस्याः संस्थायाः प्रारम्भिकेषु वासरेषु बिहारप्रान्त एनां प्रति महानुत्साहोऽवर्तत, अस्याः सभासु च पर्याप्तरूपेण प्रतिनिधयः समवेता भवन्ति स्म । परं कालान्तरेण स उत्साहो न्यूनतामगमत् । तदा कैश्चिदुदारैर्नेतृभिः सप्रयत्नं १९०८ ई० तमे वर्षे प्रान्तीयकाङ्ग्रेस-समितेः स्थापनाऽक्रियत, मुख्यः कार्यालयश्च पटनानगर्यामस्थाप्यत । तस्माद् वर्षादेव तयैकं प्रान्तीयं राजनीतिकं सम्मेलनमपि प्रारब्धम् । सम्मेलनेऽस्मिन् न केवलं प्रतिनिधय एवापि त्वन्ये जना अपि सम्मिलिता भवन्ति स्म ते च प्रान्तीय-हित-प्रसङ्गेषु सहयोगिनोऽपि समजायन्त ।

श्रीराजेन्द्रप्रसादो विद्यार्थिकालादेव काङ्ग्रेसेन सह सम्बद्धोऽभवत् । १९०६ ई० वर्षे कलकत्तायां सम्पन्नेऽधिवेशने स्वयंसेवकरूपेण कार्यं विहितं तत्र च प्रथमवारं **सरोजिनी नायडू—मदनमोहनमालवीय—मुहम्मद अली—जिन्ना**—प्रभृतीनां भाषणान्यापि श्रुतानि । शनैः शनैः काङ्ग्रेसं प्रति समाकृष्टेनः श्रीराजेन्द्रप्रसादेन १९११ ई० वर्षे पुनः कलकत्तायां सम्पद्यमानस्य काङ्ग्रेसाधिवेशनस्य विधिवत् सदस्यत्वं स्वीकृतम् । तदनन्तरं स स्वस्य प्रशंसनीये छात्रजीवने छात्रसम्मेलने च निष्ठापूर्वकं कार्यकरणेनाखिलभारतीयकाङ्ग्रेससमितेः सदस्यो निर्वाचितः ।

एतस्य कियतः कालानन्तरं श्रीराजेन्द्रप्रसादस्य मातुः स्वीयग्रामे स्वर्गवासोऽभूत्। तत उत्तरं ज्येष्ठभ्रातुः कन्याया विवाहावसर आयातः। तदानीं प्रचलितायाः प्रथाया अनुसारं वरपूजादिषु दातव्यस्य धनस्य व्यवस्थायामतीव काठिन्यमेताभ्यामनुभूतम्, ऋणं कृत्वा च तत्कर्तव्यं सम्पादितम्।

'एम० एल०' परीक्षोत्तीर्णतानन्तरं श्रीराजेन्द्रप्रसादस्य मनसि 'डी० एल०'-परीक्षायै शोध-प्रबन्ध-निर्माणस्यापि भावनाऽवर्तत किन्तु राजनीतिके चक्रे पतितमात्मानं विज्ञाय तदीयो विचारः परित्यक्तः। स्वदेशं प्रति समर्पणभक्तेः पूर्णोदयेन श्रीराजेन्द्रप्रसादस्य भारतीयजनताया मानसं बोद्धुं जेतुं च राजनीतेः साफल्यहेतुभूताया भारतस्य भाविन्या राष्ट्रभाषाया अध्ययने रुचिरवर्धत। ततः पूर्वं हिन्दीभाषया परिचय इयानेव तस्यासीत्—'स हि प्रत्यहं रामायणस्य—**रामचरितमानसस्य** पाठमकरोत् तथा सङ्कल्पितपाठकरणं विना स जलपानमपि नाकरोत्। एतस्या न्यूनतायाः परिहाराय स निरतं हिन्दीभाषाग्रन्थान् स्वाध्यायरूपेणाधीतवान्। स्वल्पैरेव दिवसैः कलकत्ताया हिन्दीविदां लेखकानां च नैकट्यं प्राप्तम्। बिहार-समितेः श्रीजगन्नाथप्रसादचतुर्वेदस्य तथा विशुद्धानन्द-सरस्वती-विद्यालयस्य प्राचार्य-श्रीमदुमापतिदत्तशर्मणः सम्पर्कोऽपि सम्प्रेरणाय सहायकोऽभवत्।

हिन्दीसाहित्य-परिषदः कार्यक्रमेषु स भागमगृह्णात् तस्याः सभासु च निबन्धपाठानप्यकरोद् यान् केचन विद्वांसः प्राशंसन्। शीघ्रमेव हिन्द्यनुरागिभिरेकस्याखिलभारतीयस्य हिन्दीसाहित्यसम्मेलनस्यावश्यकताऽप्यनुभूता। पण्डितमदनमोहनमालवीयस्याध्यक्षतायां तस्य प्रथममधिवेशनं वाराणस्यां सम्पन्नम्। तस्मिन् श्रीराजेन्द्रप्रसादमहोदयोऽप्यमिलत्। तृतीयं सम्मेलनस्यास्याधिवेशनं कलकत्तायां १९१२ ई० वर्षे समपद्यत यस्मिन् श्रीराजेन्द्रप्रसादः स्वागतसमितेः प्रधानसचिव आसीत्।

गेहे बहिश्चापि विभिन्नरूपाः, शिक्षा उपात्ता इह या उदाराः।
सुसंयता ताभिरभूत् सदैव, सन्मार्गगामिन्यथ चित्तवृत्तिः॥३॥
देशे शुभानां सुकलोन्नतीनां, साहित्य-विद्या-प्रगतिक्रियाणाम्।
राष्ट्रप्रबोधस्य च कर्मणां स, राजेन्द्र आसीत् प्रमुखः प्रयोक्ता॥३॥
सम्भूय कर्माणि समाचरन्तः, सदाशयैः सत्सरणौ सरन्तः।
श्रमेण नित्यं विपदस्तरन्तः, कीर्तिं लभन्ते कलुषान् हरन्तः॥४॥

इत्थमात्मानं देशसेवार्थं समर्पयन्नयं बिहारिच्छात्रसम्मेलनस्य १९१३ ई० वर्षेस्य मुंगेरनगरेऽधिवेशनस्य सभापतिर्निरुक्तः। १९१४ ई० वर्षे बिहार-बङ्गप्रदेशयोर्भीषणो जलापूर आयातस्तस्मिन् सङ्कटकाले-

जनसेवाव्रतिना तेन नानाविधानि साहाय्यकर्माणि विहितानि। तेष्वेव वासरेषु सोनपुरीये मेलके यात्रिणां सहायतार्थं 'बिहारसेवासमितेः' सङ्घटनं कृतं यया सह श्रीराजेन्द्रप्रसादस्य भ्राततुर्घनिष्ठः सम्बन्ध आसीत्—तस्या आध्यक्ष्यमपि सहोदरवरैर्बहुकालं यावन्निर्व्यूढम्। यदा बिहारस्याधिवक्तारः कलकत्तातः पटनायामुपेतास्तदा तथा बिहारिच्छात्रसम्मेलनस्याधीनतायां दीनच्छात्रेभ्य एकस्य 'निधेः' स्थापनमपि तैः कृतं, तस्य प्रबन्धदायित्वभारमपि श्रीराजेन्द्रप्रसाद एवाङ्गीकृतवान्।

पटनानगर्यां विश्वविद्यालयस्य स्थापनमधिकृत्य प्रवृत्ते जनान्दोलने मुख्यत्वेन साहाय्यमाचरतो विरोधं प्रकटयतः समुचितं पन्थानं दर्शयतो भर्त्सनां विदधत औचित्यं प्रदर्शयतो विजयं च समासाद्य तत्रैव विश्वविद्यालयं प्रतिष्ठापयतस्तस्य प्रबन्धसमितेः सदस्यत्वं निर्वहतः श्रीराजेन्द्रप्रसादस्य या याः कर्मठताः यानि यानि कौशलानि ये ये च कर्मकलापाः सर्वैरालक्षितास्तैस्तस्य जनमनस्सु परमादरणीयं स्थानमभवत्।

□

सविनयमवज्ञान्दोलनम्

यदि॑ चि॒न्नु त्वा॒ धना॒ जय॑न्तं॒ रणे॑ रणे अनु॒मद॑न्ति॒ विप्राः॑।
ओजी॑यः शुष्मिन्स्थिरमा त॑नुष्व॒ मा त्वा दभन्दु॒रे वासः कशोकाः॥

(अथर्व० ५।२।४)

यदि न कुरुते शास्ता नीतेः स्वयं परिपालनं,
सपदि जनता सम्भूयैनं तदा परियाचते।
भवति वितथा याच्ञा सर्वा तदा प्रसभं तया,
सविनयमवज्ञाया आन्दोलनं विनियुज्यते॥१॥

एतेष्वेव वत्सरेषु प्रथमं महायुद्धं प्रारभत। १९१४ ई० वत्सरे **श्रीमती एनीबेसेण्ट**नाम्नी-आयरिशमहिला भारतीय-राजनीतावववतरिता। एकतश्च श्रीतिलकमहोदयेनापि राजनीतौ भूयः कार्यमारब्धम्। महायुद्धस्य ज्वालया सहैव भारतीयानां राजनीतेराकाङ्क्षा अपि बलवत्यो जाताः। १९१६ ई० वत्सरे आयरलैण्डस्य होमरूलान्दोलनात् प्रेरणां प्राप्य भारतेऽपि तस्यान्दोलनस्य समायोजनमक्रियत। संवैधानिकस्य सङ्घर्षस्यास्योद्देश्यं—स्वशासनप्राप्तिस्तथा राष्ट्रिया शिक्षाऽऽसीत्। आन्दोलनमिदमपि दावानलवद् व्याप्तं परं दमनचक्रचालकैः शासकैः शीघ्रमेव शिथिलीकृतम्। युद्धे तथा

पञ्चमजार्जस्य स्वागतादौ कांग्रेसेन पूर्णः सहयोगः समादरश्च विहितः किन्तु यदीप्सितमनुमितञ्चाभूत् तन्न सम्पन्नम्—

तदा श्रीमत्या एनीबेसेण्टमहोदयया स्पष्टं कथितम्—

न भारतं वाञ्छति राजभक्तेः, पुरस्कृतिं नैव च रक्तमूल्यम्।
स्वपुत्रकाणां ‖ तनयादिकानां, न बाऽश्रु-नैमेयमभीप्सितं नः ॥२॥
तदस्ति राष्ट्रं तत एव सर्वं, सिद्धं स्वकीयं ह्यधिकारमाप्तुम्।
न्यायं प्रजार्थं च यदस्ति शश्वत्, तं याचते स्वाधिकृतां सकाशात् ॥३॥

परं कुटिलास्ते तत्र ध्यानं नादुः। तस्मिन्नेव काले जनवरी १९१२ ई० तमे वर्षे दक्षिणाफ्रीकातः **श्रीमोहनदासकरमचन्दगान्धी** भारतमुपेतः। श्रीगान्धी गोपालकृष्णगोखलेमहोदयं स्वस्य राजनीतिकं गुरुममन्यत। ब्रिटिशसर्वकारस्य सहयोगनीतावासीत् तस्य दृढो विश्वासः। महायुद्धकाले युद्धप्रयासेषु श्रीगान्धिनाऽऽङ्ग्लशासनस्य पूर्णं साहाय्यमाचरितं तत्परिणति-रूपेण तैः स 'केसरे हिन्द'स्वर्णपदकेनापि सम्मानितोऽभवत्। परं भारतीय-राजनीतौ सक्रियः प्रवेशस्तेन १९१९ ई० वर्षे विहितो यदा 'रोलट-एक्ट' स्य प्रश्न उदभूत्। एतद्विषये जवाहरलालनेहरुणा लिखितम् —

"प्रत्यग्रवायोः प्रवहानुरूपं, श्रीगान्धिनोऽभूदिह सम्प्रवेशः।
योऽस्मभ्यमुन्मुक्तमरुत्प्रवाहे, श्वासग्रहं सम्भवमाचकार ॥४॥

ते तत्प्रकाशांशुरिवोपयाता, यः प्राविशच्चालिघनेऽन्धकारे।
अपाकरोत् प्रावरणं च शीघ्रमस्मद्दृशोरग्रत आवृतं यत् ॥५॥

तदागतिस्तद्वदिहाभवद् यथा, समेत्य वात्या कुरुते विवर्तनम्।
तथा जनानां श्रमकर्मिणा द्रुतं, मस्तिष्कमेव प्रथमं विवर्तितम् ॥६॥

१९१९-१९२० ई० वर्षयोर्दैन्य-रोगाक्रमण-दमनचक्र-विकृताध्यादेश-युद्धकालिकधनसङ्ग्रहारक्षिनियोजनादिषु शासनेन स्वीकृतानां कठोरतानां कारणाद् भारतीया जनताऽऽङ्ग्लशासनं प्रत्यतीवासन्तुष्टा रुष्टा च सती दुष्टानां तेषामुच्चाटनाय सर्वथा प्रयत्नशीलाऽवर्तत। न्यायाधीशस्य रोलट-नाम्नः साभापत्ये भारतीयक्रान्तिकारिणां षड्यन्त्राणां निरीक्षणायैका समितिः सङ्घटिता तया च विधेयकद्वयं विधानपरिषदोऽग्रे स्थापितम्। देशव्यापिन्यसन्तोषे भारतीयसदस्यानां महति विरोधे सत्यपि तयोरेकः प्रस्तावः १७ मार्च १९१९ ई० दिने पारितः। स एव '**रोलट-अधिनियम**'नाम्ना प्रसिद्धिमगमत्। तस्य विरोधे समस्तेऽपि देशे प्रदर्शनानि चलसमारोहाः सभाश्चायुज्यन्त। श्रीगान्धिनोऽप्यनया दमननीत्या विद्रोहिणः सञ्जाताः। अन्यायस्य तस्य विरोधे प्रवर्तमानानां कर्मणां दमनाय केचन कारासु

निक्षिप्ताः, अनेकेऽस्त्रप्रहारैर्हताः, बहूनां यात्रा निषिद्धाः, हिंसायाः साम्राज्यमिवाभवत्। श्रीगान्धिनः शासनस्याज्ञां तिरस्कृत्य दिल्लीं प्रति प्रस्थिताः परं ते निगृहीताः। **डा० किचलूः डा० सत्यपाला**वपि निगृहीतौ। सर्वेषां तेषां दमनचक्राणां विरोधायामृतसरनगरस्य निकटवर्तिनि **'जलियानवाला'** स्थले शान्तिसभैका समायोजिता। शान्त्या वाचिकं विरोधं प्रकटयतां निःशस्त्राणां जनानां विनाशाय तत्र **जनरल डायरस्या**ज्ञया गुटिकाप्रवर्षणं प्रारब्धम्। मुख्यद्वारावरोधपूर्वकं सैनिकैर्विहितानां भीषणप्रहाराणां कारणात् परस्सहस्रं जना हताः। असदृशोऽयमत्याचारस्तैरक्रियत।

दौर्जन्यं तत् सकल-मनुजा विश्वसंस्था निशम्य,
स्तब्धा भूत्वा विगतकरुणं 'डायरं' बह्वनिन्दन्।
धिक्कारैस्तं रुधिर-तृषितं सर्वतोऽभर्त्सयंश्च,
क्रूरो निन्द्यः क्षितितलगतः सन्ततं कस्य न स्यात्?॥७॥

खलः खलु पिशितैः खेलन् खलूरिका एव मनुते पवित्राण्यपि स्थानानि। खाड्गिकः खड्गट इव खरेण खड्गेन निःशस्त्रान् निर्दयं खण्डयित्वा खाते पातयति न च तोषं भजते। मुखरः सन् भूयोऽपि भीषणमपभाषते। ईदृशस्य दुष्टस्य समूलमुन्मूलनमेवैकं निदानमिति निर्धार्य प्रान्ते स्वदेश-स्वातन्त्र्याय प्राणार्पण-परायणेषु क्रान्तिवीरेषु श्रीऊधमसिंहेन प्रतिज्ञातं तस्य वधाय तथा यथासमयं तत्सफलीकृतमपि।

य आततायी करुणाविहीनः, स्त्रीबालघाती परुषोऽभिमानी।
कृतापराधो मदघूर्णिताक्षो, हन्तव्य एवाशु स दुष्टकर्मा॥८॥

जलियानवालाकाण्डस्य बर्बरतापूर्ण-कर्मणस्तस्य भर्त्सनेन सहैव भारतवासिनां मनांसि दुःखैर्ग्लानिभिरदम्याक्रोशभावनाभिश्च परिपूरितानि। अनेकैर्देशभक्तैराङ्ग्लैः प्रदत्ताः पुरस्काराः पराकृताः। देशेऽतितरां विरोधेन 'न्यायिक-वोक्षण'-प्रार्थनया चान्ततो 'हण्टर-समितेः' संयोजना शासकैः कृता परं तयाऽपि गौराङ्गानामेव पक्षः पोषितः। एवंविधायां स्थितावपि महात्मगान्धिना सहयोगस्यैव पन्था आदृतः। कांग्रेसस्य १९१९ ई० वर्षे समायोजितेऽधिवेशने प्रस्तावोऽप्येकः स्वीकारितः। एका परीक्षण-समितिरपि कांग्रेसनेतृभिर्नियुक्ता तया च परीक्ष्य प्रतिवेदितं यद् गौराङ्गशासकैः स्वसमिति-माध्यमेन यः परीक्षापरिणामः प्रकटितः स हि नितान्तं धूर्ततापूर्ण आसीत्, तत एव तेषां दौर्जन्यं विज्ञाय क्रमेण प्रतिक्रियाऽसहयोग-बहिष्कार-सविनयावज्ञाऽऽन्दोलनानां जन्माभूत्।

अत्याचारैः प्रभूतैः प्रतिपदमुदिता क्रान्तिरत्यन्तमिद्धा,
देशस्यास्यात्र शीघ्रं प्रतिजनहृदयं क्रान्तमेवाकरोत् सा।

तस्याः क्रोधार्चिरुग्रा क्वचन च सरला क्वापि विद्रोहरूपा,
व्याप्ता सर्वत्र देशे निखिलजनगणस्यात्मनः पीडयित्री ॥९॥

प्रतिनगरं प्रतिग्रामं प्रतिवीथि जागर्तेरुद्दामः प्रवाहः प्रसृतः। आन्दोलनानां सञ्चारो नितरां भूयस्तरामैधत। भारतस्य प्रत्येकं मानवस्य मुखात्केवलमेकैव वाणी श्रूयते स्म—

क्रान्तिं क्रोडीकृतान्तःकरणधृतरुषः प्राणदानार्थमुत्काः!
सङ्घीभूय प्रसक्ता भवत निजभुवो दासताया विनष्ट्यै।
क्रूरान् गौराङ्गधूर्तान् तिरयत तरसा प्राप्नुत स्वाधिकारान्,
देशे स्वातन्त्र्यमस्तु त्वरितमिति चिरं गायतोच्चैः समेत ॥१०॥
आङ्ग्लानां सर्वकार्येषु, सहयोगो निरुध्यताम्।
बहिष्कारैरवज्ञाभिस्तदादेशो विरुध्यताम् ॥११॥ इति ॥

अथ चैकतो जलियांवाला-हत्याकाण्डस्य समुचितस्य स्मारकस्य निर्मितये काङ्ग्रेसेनैका समितिः सङ्घटिता यस्याः सदस्येषु पं० मोतीलाल-नेहरू-महात्मगान्धिप्रभृतयस्तथाऽध्यक्षाः श्रीमदनमोहनमालवीया आसन् परतश्चासहयोगान्दोलनं महताऽऽटोपेन प्राचलत्।

पुष्टि-कला

महात्मनां श्रीचरणेषु भक्तिः

स्तुष्व वर्ष्मन् पुरुवर्त्मानं समृभ्वाणमिनतममाप्तमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः प्र सक्षति प्रतिमानं पृथिव्याः ॥
(अथर्व० ५।२।७)

द्वेषं घृणां द्वैधमनार्जवं च, प्रलोभनं नेषदपि स्पृशन्तः ।
प्रेमानुकम्पां शुचितां च मैत्रीं, भ्रातृत्व-सेवादिकमादिशन्तः ॥१॥
सत्यं सदैवेश्वररूपमास्ते, मत्वेत्यसत्यं न समाश्रयन्तः ।
सर्वात्मना सर्वविधेषु कर्मस्वहिंसयैवात्मकृतिं चरन्तः ॥२॥
ये वै पवित्राचरणा नितान्तं, लोके समेषां शरणा भवन्ति ।
एकान्तिकी नित्यमुदेति तेषां, महात्मनां श्रीचरणेषु भक्तिः ॥३॥

भारतीयसंस्कृतौ श्रीगुरोर्गौरवं सर्वैरपि शास्त्रैरुपदिष्टं निखिलैरपि महात्मभिः परया भक्त्या जुष्टं तथा तेषां स्वानुभवैस्तत्परिपुष्टमिति विदितचरमेव। 'यथा गुरुस्तथा शिष्य' इति दिशा राजनीतौ प्रविष्टस्य श्रीराजेन्द्रप्रसादस्य मानसमपि तेषु दिवसेषु प्राधान्येन भारतीयजनतायाः स्वातन्त्र्याय प्रयतमानानां श्रीमहात्मगान्धिनामेव मार्गमनुसर्तुं निरचैषीत्। सोऽयं संयोग एवासीद् यद् यस्य श्रीगोखलेमहोदयस्य प्रभावाद् गान्धिमहाभागा प्रभाविताः सन्तस्तं गुरुममानयन्, तस्यैव महापुरुषस्य प्रेरणया १९१० ई० वत्सरे श्रीराजेन्द्रप्रसादस्यापि जीवनदिशा वलनं प्राप्ता।

१९१२ ई० वर्षे बिहारप्रान्तं बङ्गप्रान्तात् पृथगभूत्। मार्च १९१६ ई० हायने पटनायामुच्चन्यायालयोद्घाटनानन्तरं श्रीराजेन्द्रप्रसादेनापि तत्रैव वाक्कीलता-व्यवसाय आरब्धः। तत्र स्वीये व्यवसाये तस्य रुचिः क्षीणा सार्वजनिके च कार्ये विशिष्टाऽवर्तत।

तस्मिन्नेव वर्षे लखनऊनगरे काङ्ग्रेसस्याधिवेशनं सम्पन्नम् । तस्य साफल्यं शंसनीयमभूद् हेतुस्तस्येदमासीद् यदितः पूर्वं ये दले विभक्ते ते अपि सम्मिलिते आस्ताम् । १९२५ ई० तमे संवत्सरे दक्षिणाफ्रिकातः श्रीगान्धिनो-

ऽप्यागत्यात्र देशे भ्रमन्तः स्थितिञ्च परिचिन्वन्तः समयानुसारमधिवेशनेऽपि समागता आसन् । बिहार-प्रान्तस्य प्रतिनिधयोऽपि तत्र समुचितायां सङ्ख्यायामुपस्थिताः । तेषां रुचिस्तत्र विषयद्वय एव विशिष्य केन्द्रिताऽभूत्, १-पटनाविश्वविद्यालयस्य तथा २-चम्पारनस्य नीलवराणां प्रश्नस्य । सर्वेऽपि वाञ्छन्ति स्म यत् 'काङ्ग्रेसाधिवेशनेऽस्मिन्निदं प्रस्ताव-युगलं स्वीक्रियेत ।' तदर्थं प्रस्तावयोरुपस्थापनं समालोचनं च भूत्वैकस्य स्वीकृतिरपि तत्राभवत् ।

बिहार-वासिन इदं जानन्ति स्म यत् 'कर्मवीराः श्रीगान्धिनो दक्षिणाफ्रिकायां सुबहु साधु सम्पाद्य भारतं समायाताः सन्ति, अत एव तेभ्यः साहाय्यं प्राप्तव्यमिति ।' अतः श्रीराजकुमारशुक्ल-ब्रजकिशोरदासादयस्तानमिलन् चम्पारनस्य स्थितिञ्चावर्णयन् । निशम्य तैस्ततत्राधिवेशने तद्विषये रुचिः प्रदर्शिता तदा विहारवासिभिर्नीलवराणां विषये प्रस्तावोपस्थापनाय श्रीमहात्मगान्धिनः प्रार्थितास्तदानीं तैः स्पष्टमुक्तम्—"अहं पूर्वं स्थितेरध्ययनं करिष्यामि, विना स्वयं दर्शनं तथा विना प्रत्यक्षानुभवमहं कस्मिन्नपि कर्मणि नैव प्रवर्ते ।" यतः —

जनैः श्रुतं कर्णपरम्पराभिस्तथा परैः प्रस्तुतमीरितं वा ।
विनाऽऽत्मतोषं च समीक्षितिं विना, सन्तः प्रमाणं न समामनन्ति ॥४॥

तदुत्तरं श्रुत्वा भूयोऽपि तैश्चम्पारनमागत्य स्वयं द्रष्टुं ते प्रार्थिताः स्वीकृतिश्च तैरपि दत्ता । ततः परं श्रीराजेन्द्रकुमारशुक्लस्य प्रयासेन श्रीगान्धिनः पटनायां ततश्च चम्पारन-जनपदस्य **मोतीहा**रीनगरं प्राप्ताः ।

श्रीगान्धिनां तत्रागमनस्य प्रमुखमुद्देश्यमासीत्—"चम्पारनवासिनां कृषकाणां स्थितेः परीक्षणं तथा नीलीव्यापारिणां वैदेशिकानां विरुद्धं श्रुतानामारोपाणां विषये परिज्ञानम् ।" १५ अप्रैल १९१७ ई० दिने मध्याह्नानन्तरं ते स्वकीय-द्वैभाषिकाभ्यां धरणीधर-रामनवमीप्रसादाभ्यां सह मोतीहारीं प्राप्य तत्रत्य-वाक्कील-श्रीगोरखप्रसादस्य सदनमुपायाताः । परं नीलवराः शासकीया अधिकारिणश्च तेषामीप्सितस्यानुचितं तात्पर्यं मत्वा शङ्काग्रस्ता अभवन् । परिणतिरूपेण द्वितीयदिनेऽतिशीघ्रमेव तस्मान्मण्डलाद् बहिर्गन्तुं ते मण्डलाधीशेनादिष्टाः । तदादेशस्योत्तरे श्रीगान्धिमहाभागैः प्रत्याख्यातुं लिखितं यद्-'अहं जनतां प्रति स्वीयं कर्त्तव्यं स्मृत्वा जनपदमिदं त्यक्तुमसमर्थोऽस्मि । अथ च यद्यधिकारिणां वाञ्छा चेदहमस्यादेशस्यावहेलनापराधे दीयमानं दण्डं भोक्तुं सज्जोऽस्मीति । अहं प्रदेशाध्यक्षस्येदं कथनमपि खण्डयामि यन्मदीयमुद्देश्यं कस्याप्यान्दोलनस्योत्थापनमस्ति । परिज्ञातस्य वास्तविकमन्वेषणमेव मदीयाभिलषितमस्ति तथा तस्याभिलाषस्य पूर्तिं तावत् करिष्यामि यावदहं स्वाधीनः स्थास्यामि ।"

श्रीगान्धिभ्यः प्राप्तस्यादेशस्य सूचना दावानलवत् सर्वत्र प्रसृता। कृषकाणां महान् समुदायोऽग्रिमे दिने समवेतः परं सर्वेऽपि कृषकाः शान्ता भूत्वा क्रमेण स्वं स्वं वक्तव्यं लेखयितुं प्रावर्तन्त। इदं नैतिकशक्तेः साफल्यं तथा प्रेमशक्तेर्विजय आसीत्। श्रीगान्धिनां दृष्टौ कृषकाणां सम्मिलनावासरेऽस्मिन् ते सत्यमेवेश्वराहिंसासत्यानामभिमुखा आसन्।

यस्यात्मा निर्मलिनश्छलरहितस्तथा सन्ततं शुद्धः।
ईश्वर-साक्षात्कारः, सहजस्तस्य सर्वतो भवति ॥५॥

श्रीगान्धिभिस्तडित्सन्देशेन श्रीराजेन्द्रप्रसादाय मोतीहारी-नगरस्य घटना-विवरणं प्रेषितं तथा स्वयंसेवकैः सह शीघ्रं तत्रागमनाय सूचितम्। तं सन्देशं प्राप्य श्रीव्रजकिशोरप्रसादः पटनामुपेतस्ततश्चानुग्रहनारायणशम्भु-शरणादीन् साकं नीत्वा श्रीराजेन्द्रप्रसादो मोतीहारीमागच्छत्। तत्र श्रीगान्धिमहाभागैः स मिलितस्तदा सस्मितं तैः कथितम्। 'आगतो भवान्? अहं भवतः सदनं गत आसम्।' इदं श्रुत्वा तत्र घटितस्य व्यवहारस्य स्मरणेन स मनाक् सङ्कोचमन्वभूत्, परं श्रीगान्धिनः सत्वरमेव न्यायालये सम्पन्नायाः स्थितेः सर्वं विवरणं सर्वेभ्य. प्रास्तुवन् तेन वातावरणं परिवर्तितम्। अयमासीद् राजेन्द्रप्रसादस्य श्रीगान्धिभिः सह प्रथमः सम्पर्कः। तत्रैव श्रीराजेन्द्रप्रसादेन श्रीगान्धिमहोदयैः सह प्राथम्येन परिचयः प्राप्तः। प्रथम-दर्शनसमकालमेव श्रीराजेन्द्रप्रसादः श्रीगान्धिनां दूरदर्शिता-कार्यपरा-यणता-दृढता-कार्य-पद्धतीश्चावलोक्य तेषां नेतृत्वे पूर्णरूपेण विश्वस्तः सन् मनसि सश्रद्धं तानेवात्मनो मार्गद्रष्टारं गुरुं स्वीकृतवान्। यथा यथा श्रीगान्धिनां तेन नैकट्यं प्राप्तं, सत्याहिंसा-सत्याग्रहादीनां महिमानमपि स ज्ञातुं प्रावर्तत। श्रीगान्धिनां निर्देशने चम्पारनस्य कृषकेभ्य आत्मोत्सर्गस्या-पूर्वमवसरं लब्ध्वा श्रीराजेन्द्रप्रसादो न केवलं तच्छिष्यस्तदनुयायी तदनुमो-दक एवाभवदपि तु सहयोगी सहकर्मी सहभागी चाप्यभवत्। सार्वजनिके जीवने तैः सह कार्यकरणादाध्यात्मिकं चारित्रिकं नैतिकं च बलमपि प्राप्तम्।

गुरोः सांनिध्यतः, शिष्यश्चारित्र्यं वर्तनं तथा।
आध्यात्मिकं नैतिकञ्च, बलं प्राप्नोति निश्चितम् ॥६॥

आत्मोत्सर्गमयी दृष्टिः

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
योऽस्मे शे द्विपदो यश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
(अथर्व० का० ४, सू० २, मं० १)

सुचरित-परिषिक्ताः साधु-कर्मानुरक्ता,
अनुदिनममलानां सज्जनानां हि भक्ताः ।
अनुचितमवरोद्धुं सर्वदा ये प्रसक्ता,
इह गुरुपदभाजस्ते भवन्त्यत्र शक्ताः ॥१॥

मोतीहारी-नगरस्यानुप्रभागाधिकारिणो न्यायालये १८ अप्रैल, १९१७ ई० दिन उपस्थितेरादेशः प्राप्त आसीत् । रात्रावेव श्रीमहात्मगान्धिनस्तौ द्वैभाषिकावपृच्छन्—अहं कारायां गमिष्यामि तदा युवां किं करिष्यथ ? तदोभावपि समग्रायां निशि मानसिकद्वन्द्वे अस्थाताम् गान्धिमहाभागास्तु भारतस्य सर्वोच्चशासकायैकं पत्रं तथा न्यायालये कथनाय स्वीयं वक्तव्यं लिखितुं व्यस्ता अभूवन् । प्रातर्न्यायालयं गच्छद्भिस्तैः साकं चलद्भ्यां ताभ्यां रुदित्वा गदितं यदावामपि भवन्मार्गमेवानुसरिष्यावः । एतेन ते प्रासीदन्नकथयंश्च—'साम्प्रतमस्माकमेव विजयोऽस्ति ।' सायं श्रीराजेन्द्रप्रसादादिभिः स्वीयोऽपि तादृश एव निर्णयः श्रावितः । श्रीगान्धिनां सम्मत्या कार्यक्रमोऽपि निरधार्यत ।

निश्चितमेवायमैतिहासिको निर्णय आसीत् । श्रीराजेन्द्रप्रसादेन लिखितमस्ति यत् "२८ अप्रैल १९१७ ई० दिनं न केवलं चम्पारनस्यापि तु समग्रस्य भारतीयेतिहासस्य स्मरणीयं दिनमासीत् । इदमेव दिनमासीद्, यदा महात्मानः श्रीगान्धिनो बिहारप्रान्तस्य दीनेभ्यः पीडितजनेभ्यः कारायां गन्तुं सज्जन्ते स्म । तस्मिन्नेव दिने निखिलं भारतं सत्याग्रहाय प्राथमिक-पाठस्य प्रापकं तथा तस्योदाहरणस्य दर्शकमभवद् येन तस्मै नवीना दृष्टिरदीयत किञ्च नूतनः पन्थाः प्रादर्श्यत ।"

श्रीगान्धिनो निश्चितसमये न्यायालयमुपस्थायाधिकारिणः समक्षं विशिष्टमात्मनो वक्तव्यं प्रस्तुवन्तः सत्यस्य सरलसरलायां सरस्वत्यां स्वाचरितस्य साहसस्य तथाऽन्तरात्मनो ध्वनेः कारणादाचरितं तत्सर्वमपि सुस्पष्टमघोषयन् । तेन विस्मितिचक्रे निपतिता अधिकारिणः किमपि सत्वरं निर्णेतुमक्षमा भूत्वा निर्णयघोषणार्थमेकविंशतितमं दिनाङ्कं निरचैषुः ।

अप्रैलमासस्य १९ तमे वासर एव सी० एफ० एण्ड्रूजमहोदया अपि

श्रीगान्धिभ्यो मिलितुं प्राप्ताः। तांस्तत्र रोद्धुं प्रयतमानान् विज्ञाय महात्मनां मनसि विचारोऽयमायातो यदिमे गौराङ्गं मत्वेमं साहाय्यायानुरुरुत्सन्ति, तत एव तैः कार्यकर्तारि आदिष्टा 'अयमद्यैव गच्छतु स्वेष्टं फिजीदेशम्। अहं भवतो हृदयाद् भयमपास्तुं वाञ्छामि। आङ्ग्लानां नीलीव्यवसायिनां भयाच्च मोक्तुमिच्छामि।'

श्रीमद्गान्धिमहोदयस्य महतीं निष्ठां च निर्भीकतां,
सत्याय स्वसमर्पणस्य सुदृढां सङ्कल्पशक्तिं तथा।
कर्तव्येऽप्यतितत्परत्वमुचित-न्यायाप्तये स्पष्टतां,
दर्शं दर्शमहो ! समेऽपि नितरां जाताः प्रभावान्विताः॥२॥

इदमुचितमप्यासीद् यतः —

परेषां कष्टानि प्रसभमपहर्तुं मनसि यः,
परां निष्ठां धृत्वा ह्यविरतरतिश्चापि नियतम्।
परित्यज्य स्वार्थं दलितकृषकाणां हितविधौ,
स्वयं कारां यातुं सततमभवत् सज्जितमनाः॥३॥

दीनानां दुःख-हरणे दुर्नीतीनां निवारणे।
आत्मोत्सर्गमयी दृष्टिरपूर्वाऽऽसीन् महात्मनाम्॥४॥

अन्ततः श्रीरेवरेण्ड एण्ड्रूजमहोदयाः प्रथमेन यानेन ततः प्रस्थिताः। अधिकारिणां कठोरा नीतिः श्रीगान्धिनां सत्यस्य न्यायस्याहिंसायाश्चाग्रे ध्वस्ता। न्यायाधीशेन लिखितं—"भवतां विरुद्धोऽभियोगो निराकृतः।" मण्डलाधीशेन सूचितं—"भवन्तः स्वस्य प्रस्तावितं निरीक्षणं कर्तुं स्वतन्त्राः सन्ति। शासकीयकर्मचारिभिर्यादृशः सहयोगोऽपेक्षिष्यते स च दास्यते।" श्रीगान्धिन एतद्विषयेऽलिखन्—'इत्थं देशः सविनयमवज्ञायाः प्रथमं पाठमपठत्।' इति।

चम्पारनस्यास्मिन् कर्मणि श्रीराजेन्द्रप्रसादेन श्रीगान्धिनां निर्देशानुसारमतीव श्रमेण सहस्रशो जनानां वक्तव्यानि, तर्क-वितर्कपूर्वकं परीक्षणं विधाय लिखितानि। महात्मभिः पूर्वमेवैतस्मै निर्दिष्टमासीत्—'यूयं सर्वेऽपि वाक्कीलाः स्थ। पूर्णतया परीक्ष्य तैः सह प्रश्नोत्तराणि कृत्वा वक्तव्यानि लेखनीयानि। या वार्ता लिख्येरंस्ताः सत्या भवेयुरिति।'

स्वयं राजेन्द्रप्रसादेनापि लिखितमस्ति—"वयं प्रातः षड्वादनं यावत् सर्वैः स्वकर्मभिर्विनिर्वर्त्य वक्तव्यानां लेखनं प्रारभ्यैकादशवादनं यावत् ततः परं भोजन-विश्रान्त्योरनन्तरमेक-सार्धैकवादनादारभ्य पञ्चवादनं यावल्लेखने व्यापृता अभूम। सान्ध्यं भोजनं विधाय श्रीगान्धिभिः सह

पर्यटनायागच्छाम। वक्तव्यलेखनसमये यदाऽऽवश्यकता भवति स्म तदा तानि मध्य एव तेभ्यो दीयन्ते स्मान्यथा लेखं लेखमदीयन्त यानि ते पठन्ति स्म। इत्थं पञ्चविंशतिसहस्रजनानां वक्तव्यानि श्रीगान्धिभ्यो दत्तानि।" तेषु सर्वाधिकानि श्रीराजेन्द्रप्रसादमहाभागस्यैव स्वहस्तेन लिखितान्यासन्। तदानीमस्मच्चरितनायकेनाश्रमजीवनं प्रारब्धम्। 'दीनो भूत्वा दीनान् सेवेत' श्रमसाधनाभ्यां जनसेवा साधीयसी भवति, महतो महत् कार्यमल्पमानेनारभ्य महत्साफल्यं कथं प्राप्यते, स्वकार्याणि, स्वयमेव कार्याणि, निराडम्बरं जीवनं जीवनीयमित्यादिविषयिणी शिक्षा श्रीगान्धिनां सम्पर्कादेवात्मसात्कृता श्रीराजेन्द्रप्रसादमहाभागेन।

चम्पारनस्य सत्याग्रहाय राजनीतिकरूपमदत्त्वा, काङ्ग्रेसस्य नाम-ग्रहणं विना, समाचारपत्रेषु प्रचाराद् ऋते दूरदर्शितया सत्यदार्ढ्येन स्वपद्धत्या च श्रीमहात्मनः सत्याग्रहमचालयन्। तदन्तराले श्रीगान्धिनां सूचनानुसारं तेषां धर्मपत्नी श्रीमती कस्तूरबाः पुत्रो देवदासः पण्डितमदन-मोहनमालवीया अपि समायाताः। यथावसरं राज्यपालेन सह एडवर्डगेट-महोदयेन सहापि परामर्शा अभवन्। अनेकधाऽनेकेषां श्रमेण त्यागेन तपसा मेधया च १९१८ ई० वर्षस्य मार्चमासे 'एग्रेरियन-विधानं' निर्मितं तन्माध्यमेन च बहुभ्यो वर्षेभ्यो विधीयमानादन्यायात् प्रजाजना मुक्तिमविन्दन्।

ततः परँ चम्पारनग्रामे कृषकाणामन्येषाँ ग्राम्यजनानाञ्च शिक्षायाः प्रारम्भाय **श्रीमती कस्तूरबागान्धी** तथा काश्चान्याः समाजसेविकाः सेवका-श्च गूर्जरप्रदेशतः श्रीगान्धिनां निर्देशादागतास्तत्र व्यवस्था अकार्षुः।

अभावः शिक्षायास्तदनु बहुशोऽभावजनिताः
प्रथाः प्राचीनाश्च व्यवहृतिमुपेताः कृषिजुषाम्।
दरिद्रत्वं भूयः प्रसृतिरभितो दैन्यदमना-
व्यवस्थानामेवं भवति विषया ग्राम्यनिवहे ॥५॥

* * *

सत्याग्रहान्दोलन-भूमिका

तान्त्सत्यौजाः प्र दहत्वग्निर्वैश्वानरो वृषा ।
यो नो दुरस्याद्दिप्साच्चाथो यो नो अरातियात् ।।

(अथर्व० का० ४, सू० ३६, मं० १)

सत्यस्योपासनं कुर्वन्नसत्यं जयति ध्रुवम् ।
नासत्याल्लभ्यते किञ्चित्, सत्यं सत्यादवाप्यते ।।१।।
अतः स्वयंसेवक-धर्मधीरः, सत्याग्रहान्दोलन-कर्मवीरः ।
दुराग्रहं दूरत एव नित्यं, त्यक्त्वा परेषां हितमेव कुर्यात् ।।२।।

भारतस्य यवनास्तुरुष्कस्य शासकं **'खलीफा'** मन्वते स्म । महायुद्धे तुर्कदेशो मित्रदेशानां विरुद्धमयुध्यत् तदा सङ्ग्रामकाले ब्रिटिश-राजनीतिज्ञैर्वचनं दत्तमासीद् यत्ते तुर्कसाम्राज्यस्य कथमप्यहितं विघटनं वा नाचरिष्यन्तीति । किन्तु समरानन्तरं तैस्तस्य विघटनाय निर्णीतं सहैव च तच्छासकस्य मानहानिरप्यक्रियत । तेन ब्रिटिशशासकानां सदाशयतां प्रति विश्वासो नावाशिष्यत । काङ्ग्रेसेनास्य विश्वासघातस्य विरोधः कृतस्तथा यवनैः सह पूर्णरूपेण सहानुभूतिः प्रदर्शिता । नैतावदेव, १९१९ ई० तमवर्षस्य नवम्बर-मासे सम्पन्नस्य—**अखिल-भारतीय-विरोध - (खिलाफत) - सम्मेलनस्य** सभापतित्वमपि **श्रीगान्धिमहाभागैरेव** विहितम् । तदानीं तैर्विरोधसमितये ऽयं परामर्शोऽप्यदीयत **यत्त**स्याः समक्ष**मसहयोगान्दोलन**मतिरिच्यान्यो मार्ग एव नास्तीति । सर्वैरपि स स्वीकृतः । स्वयं श्रीगान्धिभिरपि भारतस्य महाशासकाय पत्रं प्रहितं यस्मिंल्लिखितमासीत्—

यच्छासनं वञ्चन-धौर्त्य-हत्या-क्रौर्यापराधैः परिलिप्तमस्ति ।
यत्स्वस्य पापस्य निगूहनाय, भूयोऽप्यसत्याश्रयणं विधत्ते ।।३।।
तथापि पश्चात्तपतीह नैव, तच्छासनं किं नहि राक्षसीयम् ।
नैवं ब्रुवे चेन्मम वर्तनं तत्, सम्पत्स्यते सत्यविरुद्धमेव ।।४।।

पत्रमिदं सम्प्राप्यापि तेषां मानसं क्रौर्यान्नापगतं न वा तैः स्वयं लज्जाप्यनुभूता । अत ए श्रीगान्धिमहात्मभिस्तदैवासहयोगान्दोलनचक्रस्य

प्रवृत्तये विशिष्टा योजना निर्णीता तथा कर्तव्याकर्तव्यविचाराणां सूत्राणि निश्चितानि। सत्याग्रह- ग्रहिलैः कथं वर्तितव्यं? कथं च काठिन्येऽपि शान्त्या कृता अत्याचाराः सोढव्या इत्यादि सर्वमपि च महत्या प्रौढया विचारितम्। उपदिष्टं च—

न हिंसकानां शमनं जिघांसया, कदापि शक्यं भुवि विद्यतेऽत्र।
अतो विधायासहयोगमेव, स्वतन्त्रताप्तौ विजयं लभन्ताम्॥५॥

वर्ततेऽसहयोगोऽयं, शस्त्रहीनः सुसङ्गरः।
सत्याग्रहञ्च मन्यन्तामस्य पर्यायमुत्तमम्॥६॥

ततः परमयमेव सत्याग्रह-प्रकारः समस्ते भारत एव नैवापि तु समग्रेऽपि संसारे परां स्वीकृतिकोटिमाटीकत। अनेन हिंसाया मार्गोऽवरुद्धः। देशस्य जनता सत्येन समुचितेन मार्गेण युद्ध्यन्ती स्वातन्त्र्य-सङ्घर्ष-सङ्ग्राममचालयत्। वस्तुतः श्रीगान्धिमहात्मनामयं प्राथमिको दायः सर्वस्मै मानवाय हितकृतं पन्थानमुपादिशत्।

यदा चम्पारनस्यान्दोलनाभ्यन्तर-दिनेष्वेव श्रीगान्धिनां नेतृत्वे **'रालट विधेयक'**स्य विरुद्धमान्दोलनमप्यारभत। तस्मिन्नेव समये श्रीगान्धि-महाभागैः **'यंग इण्डिया'** (तरुण भारत)पत्रस्य प्रकाशनमारब्धम्। तत्पत्र-माध्यमेनैवाहिंसात्मकसत्याग्रहस्यात्मानं ते प्रतिध्वनयन्त आसन्। तत्प्रसङ्गे नैव श्रीगान्धिनोऽहमदाबादनगराद् महादेवभ्रात्रा सह दिल्लीमागच्छन्ति स्म, मार्ग एव ते निगृहीताः। महादेवभ्रात्रा श्रीराजेन्द्रप्रसादस्तडित्सन्देशेनाहमदाबादमाकारितः कारणं च तस्यासीद् गान्धिनोऽनन्तरं सत्याग्रहस्य सञ्चालन-भारमुद्वोढुं तं निगद्येतेति। श्रीराजेन्द्रप्रसादमहोदयोऽपि सत्वरं तत्रायातः, परं श्रीगान्धिनस्तावन्मोचिताः। श्रीगान्धिमहात्मनः सत्याग्रहोऽयमेकं पर्वासीत्। अस्य तात्पर्यमिदं यद्—**"अहिंसापालनपूर्वकं सर्वकारस्य तादृशां नियमानामस्वीकारः, यान् खण्डयितुमेका मनोनीता समितिराज्ञापयेत्।"** इयं समितिः श्रीगान्धिभिः संयोजिताऽभूत्। ईदृश्यां समितौ श्रीराजेन्द्रप्रसाद-स्यापि नियुक्तिः श्रीगान्धिमहानुभावैरेव कृता। इतः परं तु क्रमेण सर्वेष्व-प्यान्दोलनेषु श्रीराजेन्द्रप्रसादः श्रीगान्धिभिः सहैवासीत्।

तस्मिन् संवत्सरे ६ अप्रैलतः १३ अप्रैल-दिनं यावद्—'रालट-विधान'स्य विरुद्धं सभा-चलसमारोह-कर्मावरोधाः प्रवर्तिताः। विरोध-समितिषु **देशबन्धुचितरञ्जनदास,—श्रीजयकर—श्रीअब्बास तैयब-मौलाना शौकतअली— मौलाना मुहम्मदअली —मौलाना अबुलकलाम—** प्रभृतयो नेतारोऽपि श्रीगान्धिनां नेतृत्वे सङ्गताः। अस्मिन् कर्मणि श्रीराजेन्द्र-प्रसादेन बिहारस्य नेतृत्वं स्वयं गृहीतम्। समग्रेऽपि देशे गौराङ्गशासनस्य

विरुद्धमसहयोगस्य तथा सत्याग्रहान्दोलनस्येयं भूमिकाऽऽसीत् ।

१९२० ई० वर्षे पटनायां श्रीराजेन्द्रप्रसादस्य साभापत्ये महती सभा समायोज्यत यस्यां **मौलानाशौकतअली—पं० मोतीलाल नेहरू—देशबन्धु-चितरञ्जनदासा** अप्युपस्थिता आसन्। श्रीराजेन्द्रप्रसादेनैव काङ्ग्रेस-द्वाराऽसहयोगान्दोलनानुसारं बिहारवासिनामपि सहयोगदानं समर्थितम्। तदर्थं श्रीराजेन्द्रप्रसादेन वाक्कीलता—व्यवसायोऽपि परित्यक्तः। तदानीं बैरिस्टर मजरुल-महोदया बिहारप्रान्तस्य महान्तो नेतार आसन्, परन्तु पटनायाः सभायां श्रीराजेन्द्रप्रसादेनासहयोगस्य शङ्खनादो विहितः। तस्यैव साभापत्ये **'बिहारप्रान्तीय-राजनीतिकसम्मेलने'**नासहयोगस्य प्रस्तावः १९२० ई० वर्षस्यागस्ते मासि स्वीकृतः। तदनन्तरं सितम्बरमासे **लालालाजपतरायस्याध्यक्ष्ये** कलकत्तायां सम्पन्ने काङ्ग्रेसस्य विशेषाधिवेशनेऽसहयोगान्दोलनस्य प्रस्तावः स्वीकृतिमानीतः। सामान्यं वेषं धृत्वा, श्रीगान्धिनः कार्य-पद्धत्याऽऽन्दोलनं सञ्चालयतः श्रीराजेन्द्रप्रसादस्य निमन्त्रणेन श्रीगान्धिमहात्मनोऽपि बिहारप्रान्तस्य यात्रायामागच्छन्, साफल्यं च सम्प्राप्तम्।

अभवदसहयोगान्दोलनस्यात्र लक्ष्यं,
कथमपि हि परेषां शासनान्मुक्तिरेव।
तदपि विगतहिंसं सत्यपूर्णं समन्ताद्,
निजविषयसुरक्षाशान्तयेऽभूत् स्वतन्त्रम् ॥७॥

एकस्या नवीनायाः स्फूर्तेर्नवीनस्य च दृष्टिकोणस्य प्रादुर्भावाद् भारतीया जनता लोकसेवाभावनया स्वराज्यं वाञ्छन्ती महते त्यागाय तत्पराऽभूत्। आन्दोलनकर्तृषु प्रायः काङ्ग्रेसनिर्दिष्टानां मार्गाणामनुसरणं सर्वेऽप्यकार्षुरस्मिन्—

१-गौराङ्गशासनप्रदत्तानामुपाधीनां सम्मानितानां पदानां शासन-नियन्त्रितानां संस्थानां मनोनीतानां सदस्यतानां च परित्यागाः,

२-शासकीय-समारोहे समुपस्थितीनां निषेधाः,

३-सर्वकाराधीनेभ्यो विद्यालयादिभ्यो बालकानां निःसारणानि तथा राष्ट्रियाणां विद्यालयमहाविद्यालयानां संस्थापनानि,

४-न्यायालयानां बहिष्कारास्तेषां स्थाने स्थानीयप्रतिनिधिसभानां (पञ्चायतानां) स्थापनानि,

५-सैनिक-लिपिक-कर्मकरादि-वृत्तिभ्यो मेसोपोटामियादौ गमन-निषेधाः,

६-काङ्ग्रेसनीतिविरुद्धमाचरद्भ्यो मतदाननिरोधाः,

७-विदेशिवस्तूनां बहिष्काराः,

८-स्वदेशिवस्तूनामधिकाधिकमात्रायां स्वीकारपूर्वकं चऋचालनानि सूत्रनिर्माणानि चेत्यादयो विषयाः प्रमुखा आसन् ।

अपूर्वोऽयमासीद् विरोध-प्रकारो,
न यस्मिन् मनागप्यभूद् दुर्विचारः ।
नहि व्यक्ति-विद्वेष आसीदभीष्टो,
परं वाञ्छिताऽभून् मनः शुद्धिरेव ।।८।।

卐

सत्याग्रह-साधनाः

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः ।
न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ।।

(अथर्व० का० ५, सू० ११, मं० ३)

धीरा धीः प्रथिता कृतिश्च शुचिता-सम्पृक्तवृत्तिः सतां,
सङ्गत्याप्तसृतेः शुभा ह्यनुकृतिः सत्यादृतिः सर्वदा ।
यस्मिन् भान्ति भवन्ति तस्य सफलाः सर्वा अपि प्रार्थना-
स्ताः 'सत्याग्रह-साधनाः' स्मृतिजुषां सन्तोषमातन्वते ।।१।।

काङ्ग्रेसस्य विशेषाधिवेशने स्वीकृतोऽसहयोगप्रस्तावो दिसम्बरमासे नागपुराधिवेशनेऽनुमोदितस्तत्पूर्वमेव बिहारवासिभिर्निर्भीकतया तस्य कार्यान्वयनं प्रवर्तितम् । श्रीराजेन्द्रप्रसादेन न्यायालये गमनं त्यक्तम् । यान्यधिकरणानि तदधीनान्यवर्तन्त तेषां शुल्कपरावर्तनेनान्यवाक्कीलेभ्यः समर्पणेन केषाञ्चित् परित्यागेन च स्वस्य विमुक्तिर्विहिता । शासकीयविद्यासंस्थानानां बहिष्काराय मजरुलहक-महोदयेन शीघ्रमेवैको **'राष्ट्रियविद्यालय'** उद्घाटितः । यस्य प्रधानाध्यापकाः **श्रीरामकिशोर**-महोदया अभवन् । असहयोगान्दोलने भागग्रहणस्य निर्णयात् परं श्रीराजेन्द्रप्रसादमहाभागः पटनाविश्वविद्यालयस्य व्यवस्था-परिषदः सदस्यत्वमपि त्यक्तवान् । १९२१ तमे वत्सरे ५ जनवर्यां श्रीराजेन्द्रप्रसादः स्वीयैरन्यैः कैश्चित् सहयोगिभिः सह पटनायां **'राष्ट्रियमहाविद्यालय'**-मुद्घाटितवान् तस्य प्राचार्यत्वमपि तेनैव निर्व्यूढम् । जागरणस्य नूतनया चेतनया प्रेरिता ये

छात्रा अध्ययनं त्यक्तवन्तस्तेषु अभियान्त्रिकमहाविद्यालयस्यापि शताधिकाश्छात्रा आसन् तेषां व्यवस्थापनाय मजरुलहकमहानुभावाः सहानुभूतिपूर्वकं स्वकीयं प्रशस्तं '**सिकन्दर-मंजिल**' नामकं भवनं त्यक्त्वा छात्रैः सह वस्तुं तत्र समायाता यत् स्थानमग्रे '**सदाकत आश्रम**' नाम्ना प्रसिद्धिमगमत्। इयं '**शान्ति-सदन**' संस्था निष्ठा-पूर्वकं देशसेवाकेन्द्रमिति रूपेण विकासं प्रापत्। तत्रैव राष्ट्रियमहाविद्यालयोऽप्यानीतस्तथा 'बिहार-विद्यापीठ'स्थापनापि तत्राक्रियत। श्रीगान्धिमहात्मभिस्तदुद्घाटनमाचरितम्। **मजरुलहक**महोदयास्तस्य कुलपतयस्तथा **व्रजकिशोरप्रसादा** उपकुलपतयोऽभूवन्।

राजेन्द्रप्रसादस्य महता परिश्रमेण प्रान्तस्य बहुषु नगरेषु परिभ्रमणेनासहयोगान्दोलनमुग्रं रूपमधारयत्। समग्रेऽपि प्रान्ते केवलं दशसु दिवसेषु षट्पञ्चाशत् ५६ सभा आयोज्यन्त। नागपुरकाङ्ग्रेसस्य निर्णयानुसारं बिहारप्रान्तीयकाङ्ग्रेसस्य पुनर्घटने सति तदीयं मन्त्रिपदं श्रीराजेन्द्रप्रसादायैव प्रदत्तम्। अस्मिन्नेव वर्षे राष्ट्रियान्दोलनस्य सन्देशं प्रतिगृहं प्रापयितुं '**देश**'-नाम्नः साप्ताहिकपत्रस्य प्रकाशनं श्रीराजेन्द्रप्रसादस्य सम्पादकत्वे सञ्जातम्। '**सर्चलाइट**' नाम्नः पत्रस्य सम्पादनेऽपि तस्य सहयोग आसीत्। प्रेरकं नेतृत्वमवाप्य बिहारवास्तव्येषु सङ्कल्पस्य दार्ढ्यं भावनायाः प्राबल्यं सिद्धान्तानां निष्ठा त्यागार्थमुत्साहश्च भूयस्तरामैधन्त।

आन्दोलनस्य दमनाय शासनेन शास्तृभ्यः सर्वेऽप्यधिकारा आदिष्टास्तदनुसारं शासनेन मिथ्याप्रचाराः कृताः। सभाः प्रतिबद्धाः। न्यायालयेष्वभियोगाः प्रवर्तिताः। असहयोग-विरुद्धानां सभाः आयोजिता नानाविधैर्भयैः साधारणा जना भापिताः। तेषां सर्वेषां विरोधाय कार्यस्थगन-समालोचनसहनादिभिरान्दोलनं बलवदेवाभूत्। मातृभूमेः सेवार्थं समर्पितसर्वस्वानां देशभक्तानां निष्ठा विश्वासश्च मनागपि शैथिल्यं न प्राप्नुताम्। शासनस्य **दमनचक्रं** पूर्णवेगेन प्राचलत्।

एकराष्ट्रियप्रेरणया सह प्रबलेन व्यापकेन चोत्साहेनाखिलभारतीय-काङ्ग्रेससमितेरधिवेशनं १९२१ ई० वर्षस्य मार्चाप्रेलमासयोरन्ताद्यदिवसयोर्विजयवाड़ानगरे समजायत। तत्र १-अखिलभारतीयतिलकस्वराज्यनिधिसङ्ग्रहे कोटिमुद्राणां सङ्ग्रहाय, २-काङ्ग्रेसस्य कोटिसंख्यकसदस्यवर्धनाय तथा ३-नगरेषु ग्रामेषु च विंशतिलक्षमित-चक्रयन्त्रसञ्चालनाय ३० जूनपर्यन्तं पूर्तिः काङ्क्षिता। विजयवाड़ातः प्रत्यावर्तनकाले धूम्रयान एव श्रीराजेन्द्रप्रसादेन बिहारप्रान्तस्यान्यैः प्रतिनिधिभिः साकं तेषु कार्यक्रमेषु विचारो विहितः। सत्याग्रह-सप्ताहस्यावसरे श्रीराजेन्द्रप्रसादेन निवेदनमेकं प्रसारितम्। सत्याग्रह-दिवसेऽपि तस्यैका हृदयस्पर्शिनी विनिवे-

दना प्रकटिता। अनयोः स्वराज्यस्य महत्त्वं, जनतायाः कर्तव्यं, बिहारवासिभिर्धनसङ्ग्रह-सदस्यत्वप्राप्तिश्चक्रयन्त्र-सञ्चालनादिकर्मसु पूर्णः सहयोगः, सत्याग्रह-प्रतिज्ञादिविषयेषु निर्धारितानां सिद्धान्तानां पालनमिति चर्चितान्यासन्। एवमेव समस्तेऽपि प्रान्ते भ्रमणेन ३० जून १९२१ ई० पर्यन्तं ७.५० सार्धसप्तलक्षमुद्राणां सङ्ग्रहः, पर्याप्तसंख्यायां सदस्यनिर्माणेन तथा खादीनिर्मितयेऽधिकाधिकं चर्खायन्त्रचालनव्यवस्थया च महत्साफल्यमधिगतम्।

सारल्यं शुचिता प्रमाण-परता सेवा सदाचारता,
कार्ये सात्त्विकताऽऽत्मनो नियमिता मान्ये जने नम्रता।
दीने द्रव्यपतौ च पूर्णसमता नित्यं स्वयं सेविता,
साफल्यं चरणानि चुम्बति चिरं निष्ठावतां सर्वतः ॥२॥

बहिष्कारस्य प्रवृत्तेर्दमनाय शासनेन यथा यथा प्रयतितं तथा तथा जनताया जागरणं सत्याग्रहान्दोलनाय च तत्परत्वमाधिक्येन वृद्धिमगमत्। श्रीगान्धिनां निर्देशनेन यथाकथञ्चिदात्मानं रोधयन्ती जनताऽनेकानि नवनवानि बहिष्कृतिकार्याणि प्राकटयत्। भारते साम्प्रदायिकीमेकतां साधयितुं **श्रीगान्धि—मौलाना-शौकतअली**-प्रभृतयो नेतारः पर्वसु जनानबोधयन्। श्रीराजेन्द्रप्रसादस्य सर्वेष्वपि तादृशेषु कर्मसु पूर्णं साहाय्यमासीदेव। विशिष्य खादीवस्त्राणामुत्पादनाभिवृद्धये तथा स्वदेशिवस्तूनां प्रयोगाय तदीयाः प्रयासा महत्त्वमभजन्। यत्र कुत्रापि काङ्ग्रेसस्याधिवेशनानि भवन्ति स्म, तत्र स्वयमुपस्थाय न केवलं बिहारप्रान्तस्यापि तु समस्तस्य भारतस्य राष्ट्रियप्रवृत्तीनां स्थिरीकरणे स्वीयं सर्वतोभावेन सहयोगमकार्षीत्।

घटनानां चक्रं तीव्रतया प्रचलति स्म। जनताया असन्तोष एधते स्म। अलीबन्ध्वोर्निग्रहणेन भारते निष्क्रियप्रतिरोधस्य तथा सविनयावज्ञाया भावनाऽधिकं बलवत्यभूत्। बिहार-बम्बई-करांची-दिल्ली-नगरेषु काङ्ग्रेसस्याधिवेशनेषु विहितान् निर्णयाननुसृत्य देशे सविनयमवज्ञान्दोलनं प्रारब्धम्। तस्य नियमेषु चर्खायन्त्रचालनज्ञानं विदेशिवाससां परित्यागः केवलं हस्तनिर्मितवस्त्राणामेव धारणं सर्वधर्मानुयायिनामेकताऽन्यायानां प्रतिकारः स्वराज्यप्राप्तौ विश्वासश्चेति प्रधाना आसन्।

श्रीराजेन्द्रप्रसादस्य प्रयासेन **'बिहार-राष्ट्रिय-स्वयंसेवकदल'**मेकं स्थापितम्। काङ्ग्रेसनिर्देशानुसारं सर्वत्र प्रान्ते कार्यमारब्धम्। कैश्चित् स्वकीयेभ्यः पदेभ्यस्त्यागपत्राणि दत्तानि। विशिष्टनेतॄणां निग्रहोऽक्रियत। अहमदाबादनगरे काङ्ग्रेसस्य षट्त्रिंशत्तममधिवेशनं सम्पन्नं तत्र बिहारप्रान्तस्य ५५८ प्रतिनिधयः सम्मिलिता येषु राजेन्द्रप्रसादस्य प्रामुख्यमासीत्।

तत्रैव श्रीमहात्मगान्धिभिर्भाविने कार्यक्रमाय निर्देशात्मक: प्रस्ताव उपस्थापितस्तत्र चाहिंसकमसहयोगं तावच्चालयितुं जना: प्रेरिता यावद् भारतस्य शासन-प्रबन्धो भारतीयानां हस्तेषु नागच्छेत् ।

तस्यैवान्दोलनस्य परम्परायां **'बारदोली-ग्रामादेव सत्याग्रहस्य शुभारम्भो भवेदिति'** श्रीगान्धिमहात्मभि: काङ्क्षितम् । किन्तु गोरखपुर-मण्डलस्य **'चौरीचौरा'**ग्रामे दुर्भाग्यपूर्णैका घटना घटिता, यस्यां जनसमहेन सहारक्षिणां सङ्घर्षे हिंसाया अग्निज्वालनस्य च कारणाद् बहव आरक्षिणो मृता: । बारदौली-सत्याग्रहस्य विचारं निरोधयद्भि: श्रीगान्धिभिस्तस्य प्रायश्चित्तार्थं पञ्चदिवसपर्यन्तमुपोषितमपि ।

यद्यपि श्रीगान्धिनामुपवासेन बारदौली-निर्णयेन च केचन कारासु स्थिता नेतारस्तथा देशवासिनो नैराश्यमन्वभवन् परं काङ्ग्रेसस्यानुशासन-मनुपालयन्तस्ते विचार-विमर्शातिरिक्तं किमपि कर्तुं नैच्छन् । देहल्या-मखिलभारतीयकाङ्ग्रेससमितेरेकमुपवेशनं सम्पन्नं तदनुसारं स्वस्वप्रान्तेषु यथानुशासनं केचन सत्याग्रहाधिकारा जनेभ्य: प्रदत्ता: ।

एवं समग्रेऽपि देशे यदा पर्याप्तमुत्तेजना आसन्, श्रीगान्धिनो १० मार्चदिने निगृह्य साबरमतीस्थायां कारायां प्रेषिता: । श्रीराजेन्द्रप्रसाद-महाभागोऽपि सत्वरं तत्र गतवान् । न्यायालये यदा श्रीगान्धिभ्य: षड्वर्षा-वधिको दण्ड: श्रावितस्तदा स तत्रैवावर्तत । सखेदं तत: परावृत्त्य **श्रीमदनमोहनमालवीयेन** सह श्रीराजेन्द्रप्रसादोऽसमप्रदेशस्य भ्रमणं कृतवान् । स्थाने स्थाने सभासु भाषणान्यभूवन् । जना व्यसनत्यागाय प्रबोधिता: । १९२२ ई० वर्षे **सन्थाल**जनपदे शासनेन दमनं प्रारब्धम् । तत्र स्वयंसेवकान् नीत्वा श्रीराजेन्द्रप्रसादेन निरीक्षणं कृतं प्रबोधनं च दत्त्वा शासनस्य दुर्नीतेर्विवरणं पत्रेषु प्रकाशितम् । पञ्जाबप्रदेशे **'गुरोरुद्यान'**-मधिकृत्य सिखधर्मानुयायिनां सत्याग्रहं समीक्षितुं तथा हिन्दूयवनयो: पारस्परिकं सङ्घर्षम पाकर्तुं तत्रापि सोऽगच्छज्जनांश्च प्रत्यबोधयत् ।

'गया' नगरे काङ्ग्रेसस्य सप्तत्रिंशत्तममधिवेशनं सम्पादयितुं सफल-यितुं च श्रीराजेन्द्रप्रसादस्य तत्परता प्रेरणापूर्णं मार्गदर्शनं च सर्वथाऽविस्म-रणीये विद्येते । देशबन्धु श्रीचितरञ्जनदासस्याध्यक्षे सम्पन्नेऽस्मिन्नधिवेशने प्राय: २५ सहस्रमिता: प्रतिनिधय: समवेता: । तत्रैव श्रीराजेन्द्रप्रसादेन हिन्दूमहासभाया: स्वागतसमितेराध्यक्ष्यमपि जनानुरोधात् स्वीकृतं महामनस: श्रीमदनमोहनमालवीयाश्चाधिवेशनस्य सभाध्यक्षपदे निर्वाचिता: । अधि-वेशनमपि तत्र सम्पन्नं परमग्रे मतभेदवृध्या पार्थक्यमभूत् ।

गया-काङ्ग्रेसस्याधिवेशनावसरे—**खिलाफत कान्फ्रेन्स—जमायत-**

उल-उलेमा-कान्फ्रेन्स—हिन्दूमहासभा—अखिलभारतीय-सामाजिकसभा—भारतधर्ममहामण्डल— अखिल-भारतीय-सनातनधर्म-सम्मेलन'— प्रभृतीनां सङ्घटनानामपि सभा आयोज्यन्त तथा स्वदेशस्य स्वातन्त्र्याय सर्वेषामपि विचाराः प्राचार्यन्त। गयाः-काङ्ग्रेसानन्तरं श्रीराजेन्द्रप्रसादः काङ्ग्रेसस्य प्रधानमन्त्रित्वेन वृतः। विविधानां महत्त्वपूर्णकार्याणामाधिक्यवशात् तेन हिन्दी-साप्ताहिकस्य 'देश' नामकपत्रस्य सम्पादकत्वं परित्यक्तम्। ततः परं महात्मगान्धिनां कारायात्रायाः प्रथमवर्षग्रन्थिमभिलक्ष्य समग्रे देशे त्याग-प्रार्थनयोर्दिवसरूपेण शान्तिपूर्णः कर्मविरोधः कृतः। श्रीराजेन्द्रप्रसादेन काङ्ग्रेसस्य प्रधानमन्त्रित्वेन जनाः प्रबोधितास्तथा काङ्ग्रेससमितय आदिष्टाः। १९२३ ई० वत्सरस्य मईमासं यावद् बिहारस्य कार्यकर्तृभिश्चतुःसहस्रमितानां स्वयंसेवकानां प्रवेशने तिलक-स्वराज्यनिधये चैकचत्वारिशत्सहस्रमुद्राणां सङ्ग्रहणे साफल्यमधिगतम्। तदानीमेव बिहारप्रान्तीयासु नगरपालिकासु मण्डलपरिषत्सु च सम्पद्यमानेषु निर्वाचनेषु सक्रियं भागं गृहीतुमपि निर्णीतम्।

भारतस्य राष्ट्रियध्वजस्य सम्मानार्थं नागपुरे तदा सत्याग्रहपूर्वकं जना नगरपालिकाभवने ध्वजमारोपयितुं तत्परा आसन्। **पण्डितसुन्दरलाल-सेठ जमनालालबजाज-सरदार-पटेलादयो** नेतारस्तत्र स्वीयं निग्रहणं कारयित्वाऽऽन्दोलनमिदं पुष्णन्ति स्म, तदैव श्रीराजेन्द्रप्रसादेनापि शतशः स्वयंसेवकैः सह तस्मिन् वीरतापूर्णः सहयोगः प्रदत्तः। नागपुर एव **सरदार-पटेलेन सह श्रीराजेन्द्रप्रसादस्य घनिष्ठता**ऽभवद् या जीवनपर्यन्तं स्थैर्यं प्राप्तवती। १९२३ ई० वर्षस्य १८ जुलाईदिनं ध्वजदिवसमुपलक्ष्य श्रीराजेन्द्रेण नागपुरीयस्य सत्याग्रहस्योल्लेखपूर्वकं स्वीया विचाराः 'सर्चलाइट' पत्रे प्रकाशिताः। येस्वदमप्यासीत् प्रमुखं स्वारस्यम्—

विश्वेषां राष्ट्रजानां निजनिजमहिमख्यापकानि ध्वजानि,
प्रोच्चैरुद्धूयमानान्यविरतममलं गौरवं वर्धयन्ते।
तद्वत् स्वीयं त्रिरङ्गं ध्वजमपि सकलैर्भारतीयैर्नमस्यं,
मान्यं राष्ट्रप्रतिष्ठोन्नयनहितकरं वर्तते सुप्रतीकम्॥३॥

प्रथमविश्वयुद्धे तुर्कराष्ट्रस्य विजय-समारोहे सम्मेलनाय जनान् प्रेरयितुं तथा तत्र स्वीकरणीयानि कार्याणि प्रस्तावयितुं श्रीराजेन्द्रप्रसादः परिपत्रमेकं प्रासारयत्। तेष्वेव दिनेषु गान्धिदर्शनं प्रति श्रद्धधानानां सम्मत्या **'गान्धिसेवासङ्घ'**स्य श्रीगणेशस्तस्य कार्यकारिण्याः सदस्यत्वेन सहयोग-प्रदानं च श्रीराजेन्द्रप्रसादस्य नैपुण्यं प्राकाशयत्। काङ्ग्रेसस्य विशिष्टेष्वधिवेशनेषु समुपस्थाय बलाबलं विचार्य समुपस्थितानां सदस्यानामैकमत्यं

रक्षितुं रचनात्मकानि कर्माणि विधातुं विभिन्नप्रान्तेषु परिभ्रम्य सङ्घटनशक्तिं वर्धयितुं प्रधानमन्त्रित्वेन काङ्ग्रेसदलस्य विघटनं वारयितुं चाहोरात्रं तपस्यतः श्रीराजेन्द्रप्रसादस्य स्वास्थ्यमपि निर्बलमभवत्। श्वासरोगेण पीडामनुभवताऽपि तेन विश्रान्तुं कदापि नेप्सितं न चात्मनः सेवाधर्मात् पराङ्मुखत्वमपि विचारितम्।

बिहारे नगरपालिकार्थं निर्वाचने सति तस्मिन् काङ्ग्रेसीयसदस्यैः सर्वत्र बाहुल्येन विजयश्रीर्वृता। पटनायां श्रीराजेन्द्रप्रसादः सर्वाधिकानि मतान्यवाप्य नगरपालिकाया आध्यक्ष्यं प्रापत् परं तत्र भ्रष्टाचारस्याधिक्येन सहयोगाभावेन च खेदमनुभवन् स एकवर्षानन्तरं तत् पर्यत्यजत्। सकले बिहारराज्ये राष्ट्रियकार्याणां सञ्चालने नवनवानां कार्यक्रमाणां कार्यान्वयने मिथ उत्पन्नानां वैमत्यानां निराकरणे विषमपरिस्थितीनां समाधाने साम्प्रदायिकविद्वेषाणामुन्मूलने श्रीगान्धिनां विचार-प्रसारणे तथा काङ्ग्रेसनीतेः परिपालनपूर्वकं विदेशीयानां शासकानामुत्सारणे समर्पितसर्वस्वस्य श्रीराजेन्द्रप्रसादस्य सत्याग्रह-साधना सत्यमेव कमपि सर्वोत्तमं सर्वप्रशस्यं सर्वानुकरणीयं चिरस्मरणीयमेकमादर्शमस्थापयदिति निखिला अपि भारतवासिनोऽमंसिषुः।

पदे पदे दुर्मनसां दुराशया, निघ्नन्ति विघ्नैः सततं शुभान्यपि।
उत्सर्गमार्गे चलिता दृढव्रतास्त्यजन्ति नो किन्तु कदापि सत्यपथम्॥४॥

अहरहः श्रमसाधनतत्पराः, परहिताय रता गतमत्सराः।
हतधियो न भवन्ति च ये नरा, लसति तद्यशसा सकला धरा॥५॥

*
* *

रचनात्मिकाः प्रवृत्तयः

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ँ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥
(यजुर्वेद० ४०।२)

यस्मिन् कर्मणि कापि नैव नियता वृत्तिः स्वदेशोन्नतेः,
नो वा देशनिवासिनां हितकरी काचित् प्रवृत्तिः स्थिरा।
किं वा यत्र न विद्यते परिणतेर्ध्रौव्यं क्रिया-पद्धतौ,
सा व्यर्थेति विचार्य कुर्युरनिशं विज्ञाः स्वकीयाः क्रियाः ॥१॥

कार्यकर्तुर्जीवनस्य साफल्यं तदीयेषु कर्मसु परिणमत् कस्यामपि रचनात्मिकायां प्रवृत्तौ मूर्तं रूपं दधाति। तस्य कर्तव्यं प्रतिफलदिव प्रतिभाति। तदीयाः सर्वा एव प्रवृत्तयो निर्मितिमादधाना लोकानां कल्याणाय भवन्ति। श्रीराजेन्द्रप्रसादस्य शिक्षामाध्यमेन संस्काराः स्थितिं प्राप्य ज्ञानानुभवाभ्यां सह समन्वयं लभमाना दृष्टिकोण-निर्माणाय प्रेरणाप्रदा अभूवन्। चारित्रिकं बलं सहिष्णुताऽध्यवसायश्चेति त्रयं सम्भूय सामाजिकीं चेतनामवर्धयत्। इयमेव चेतना किल विश्वबन्धुत्वं सहानुभूतिं चाकलय्य क्रियाशीलतां स्फोरयति। श्रीराजेन्द्रप्रसादस्य क्रियाशीलताऽतीव निष्ठापूर्णाऽवर्तत तस्मादेव रचनात्मिकायाः प्रवृत्तेर्विकासः प्रतिदिनं समेधमानोऽभूत्।

२२ सितम्बर १९२५ ई० वर्षे पटनायामखिल-भारतीय-काङ्ग्रेससमितेरधिवेशनसमकालमेव तत्र **अखिलभारतीय-चर्खासङ्घ'स्य** जन्मानन्तरं **'स्वराज्य-दल'स्य** सम्मत्याऽखिल**भारतीय खादी-सङ्घ**'स्य सकलाऽपि व्यवस्था चर्खासङ्घायादीयत। नियमावली-निर्माणमपि श्रीगान्धिमहात्मभिर्विहितम्। तथा च त एवाध्यक्षा अपि संवृत्ताः। श्रीराजेन्द्रप्रसादस्तस्याऽऽजीवनसदस्यस्तथा व्यवस्थामण्डलस्यापि सदस्यो निर्वाचितः। एतस्मिन्नेव समये विभिन्नप्रान्तानां नेतारोऽपि पार्थक्येन खादीसङ्घस्य कार्यक्रमाणां क्रियान्वयनाय नियुक्ता येषु श्री**जवाहरलाल-सतीशचन्द्रदासगुप्त-राजगोपालाचार्य**-प्रभृतय आसन्। श्रीराजेन्द्रप्रसादस्य

निर्देशने बिहारप्रान्तीय-खादीसङ्घस्य प्रवृत्तिषु वस्तुनः प्रकारौन्नत्यमुत्पादनाधिक्यं मूल्यभिवृद्धिश्चेति विशिष्टाः प्रवृत्तयोऽभूवन्। एताभिः सहैव राष्ट्रियशिक्षाया अभिवर्धनमपि प्रारब्धं तच्च पूर्णतया सफलमप्यभूत्।

कृतं चातुर्येण स्वमतिविहितं कर्म सकलं,
जनानां सौख्यार्थं भवति कुशलायैव नियतम्।
तथा संस्थाया अप्युचितविधिना चालनभूत्,
तदुन्नत्यै नित्यं तदनु सकलानां हितकरम् ॥२॥

स्वदेशकार्याणां साफल्याय निरन्तरं प्रयतमानस्य श्रीराजेन्द्रप्रसादस्य मूल्यवतीनां सेवानां महत्त्वं विज्ञाय बेलगांवनगरेऽखिलभारतीय-स्वदेशिवस्तूनां प्रदर्शन्या उद्घाटनस्य सम्मानं तस्मा अदीयत। उद्घाटनावसरे तेनातीव रोचकं भाषणं कुर्वता प्रोक्तम्—

"यदा कस्यापि राष्ट्रस्य दुर्दिनान्यायान्ति तदा तस्य सार्वत्रिको ह्रासः सञ्जायते, तदीयमस्तित्वं ह्रसति संस्कृतिश्च पतनोन्मुखी परिलक्ष्यते। यदि चेयं स्थितिः कियते चित् कालाय स्थिरतां प्राप्नोति तदा तु राष्ट्रवासिनस्तां संस्कृतिं विस्मृत्य परेषामनुकरणेऽनुरक्ता भवन्ति। इयमेव स्थितिर्भारतीयानां विद्यते। अतो भारतराष्ट्रस्योन्नत्यै दासतायाः पराकरणाय स्वदेशे निर्मितानां वस्तूनां धारणमुपयोगश्च सर्वदैवास्माभिः स्वीकर्तव्यः। राष्ट्रियस्य नवजागरणस्य प्रमाणमस्यां प्रदर्शन्यां स्पष्टं प्रतीयते। अस्यां बहुशः प्राचीनाया भुवः कलानां दर्शनानि भवन्ति। स्वदेशिवस्त्राणां वैशिष्ट्यं स्फुरति। अस्य खद्दरवस्त्रस्योपयोगेन वयं स्वराष्ट्रवासिनां वयननिपुणानां साहाय्यमाचरिष्यामः। विदेशिवाससां प्रयोगेण न केवलं तेषां वृत्तिहननमेवाभवदपि तु वस्त्रनिर्मितिकलाया अपि विनाशोऽजायत। अद्यापि भूयांसो वयनजीविनो वस्त्रनिर्मित्या स्वं जीवनं परिवारं च पोषयन्ति, यदि नाम भारतवासिनो हस्तनिर्मितानां वस्त्राणां धारणे कटिबद्धा भवेयुर्निर्मातारश्च तेषां निर्माणे प्रावीण्यं वर्धयेरंस्तदाऽस्य व्यवसायस्य विस्तारः सम्भवेत्। विदेशिवस्त्राणां बहिष्कारेणायस्य मार्गः प्रशस्तो भवितुमर्हति।"

एवंविधेन भाषणेन जना अतीव प्रभाविताः स्वदेशिवस्त्राणां धारणे च कृतप्रतिज्ञा अभवन्। तत्रैवैका 'खादीप्रदर्शनी' श्रीराजेन्द्रप्रसादस्य निर्देशने समायोजिता यस्यां शासनस्यानेक उच्चाधिकारिण उपेत्य खादीवस्त्राण्यक्रीणन्। सूत्रनिर्माणप्रतियोगिता अपि तत्र समायोजिता विजेतारश्च पुरस्कृताः। इत्थमेव बिहारच्छात्रसम्मेलनस्य पुनः सङ्घटनाय श्रीराजेन्द्रप्रसादेन जना ओजस्विना भाषणेन प्रार्थिता यत्ते तन्मयत्वेन समर्पणभावनया च रचनात्मकानि कार्माण्यधिकाधिकं सम्पादयेयुरिति।

४ अप्रैल १९२५ ई० वत्सरे **'बिहारप्रान्तीयं हिन्दूसम्मेलनं'** श्रीराजेन्द्रप्रसादस्याग्रहेण लालालाजपतरायमहाभागानामाध्यक्षे सम्पन्नं तत्राध्यक्षपदाद् भाषमाणैस्तैर्विशिष्य बिहारवासिनः श्रीराजेन्द्रप्रसादसदृशां देशसेवापरायणानामुपस्थित्या वर्धापिता. कामितञ्च तैर्यदीदृशाः कार्यकर्तारो नेतारश्च सर्वेष्वपि प्रान्तेषु भवेयुरिति। इत्थमेव **बोधगयामन्दिरस्य 'निरोक्षणसमितेः'** सदस्येषु श्रीराजेन्द्रप्रसादेन **डा० काशीप्रसादजायसवाल—ब्रजकिशोरप्रसाद दामोदरदास (राहुलसाङ्कृत्ययन)**—प्रभृतिभिः सह कार्यं कृत्वा तैः सह परिचयः प्राप्तस्तथाऽऽत्मनः कर्तव्यपरायणता निर्व्यूढा।

रचनात्मकानां कार्यक्रमाणां वर्धनाय यदा श्रीगान्धिमहात्मानो ग्रामेषु प्रवसन्त आसंस्तदा १९२५ तः १९२७ ई० पर्यन्तं श्रीराजेन्द्रप्रसादमहाभागेनापि तैः सह यात्रा विहिताः। मध्येमार्गमागते **'जीरादेई'**ग्रामे दिनमेकमतिवाहयद्भिः श्रीमहात्मभिः श्रीराजेन्द्रप्रसादस्य जन्मस्थानं विज्ञाय तस्मै **'तीर्थस्थान'**-संज्ञा प्रदत्ता। अस्मिन् भ्रमणकाले बिहारवास्तव्येषु खादीवस्त्राणामुत्पादनमप्यवर्धत। प्रान्तस्य प्रमुखेषु नगरेषु प्रदर्शिनीनामायोजनानि श्रीराजेन्द्रप्रसादस्य निर्देशन एवाभूवन्। प्रत्येकं नगरे प्रदर्शिन्युद्घाटनं देशस्य सुप्रसिद्धेनसमाजसेवकेन कृतम्। काङ्ग्रेसानुयायिनः शासकीया अधिकारिणो भूस्वामिनोऽधिवक्तारो महान्तः सामान्या व्यापारिणः केचनाङ्ग्लाधिकारिणोऽपि प्रदर्शनीरद्राक्षुर्यथेच्छञ्च वस्त्राण्यक्रैषुः।

खादीप्रचारस्य कार्यमिदं श्रीराजेन्द्रप्रसादस्य न केवलं बिहारप्रान्त एवापि तु भारतस्य बहुषु प्रान्तेषु व्याप्तमासीत्। तमिलनाडु- आन्ध्रप्रदेशयोरपि खादीवस्त्रोद्योगस्यार्थिकं पक्षं लक्ष्यीकृत्य बहूनि व्याख्यानानि तेन वितरितानि। स्वयं महात्मगान्धिनोऽपि विषयेऽस्मिन्नेकदैकस्य प्रश्नस्य समाधानाय जनानकथयन्—यदस्य व्याख्यां श्रीराजेन्द्रप्रसाद एव करिष्यतीति। तेषां व्याख्यानानां संग्रहः 'इकोनामिक्स आफ खादी'—नाम्ना पुस्तकरूपेण प्रकाशितः। खादीप्रचारेण सहैव बिहारविद्यापीठाय धनसङ्ग्रहमपि तदीयं विशिष्य कार्यमासीत्। विद्यापीठे धनाभावेन जायमानमौदासीन्यमुद्वासयितुं शिक्षायाश्च समुचितामभिवृद्धिं कारयितुं श्रीराजेन्द्रप्रसादस्तथाऽन्ये सहयोगिनः कार्यकर्तारो विविधैः प्रयत्नैर्धनान्यार्जयन्। विधानसभानां निर्वाचने स्वीयमपरिवर्तनवादिमतं धारयन्नपि श्रीराजेन्द्रप्रसादः काङ्ग्रेसस्य निर्णयानुसारं सहयोगमदात् तेन च तदीयाः प्रत्याशिनो बाहुल्येन विजयं प्राप्नुवन्।

'भारतीया प्रजा विविधान् विचारान् धारयन्ती सामूहिकं हितं विस्मृत्य दलगतं साम्प्रदायिकं दुराग्रहं च न मुञ्चतीति दुःखावहमेव।'

श्रीराजेन्द्रप्रसादस्य मनस्येषा विचारणाऽभवद् यदस्या भावनायाः समूल-मुन्मूलनं विना सङ्घटनं निष्प्रभावमेव स्थास्यति। अतस्तेन वैयक्तिकं सर्व-विधं स्वार्थं सम्मुन्नतप्रदप्राप्त्यभिलाषस्तथा निर्वाचन-प्रत्याशितादि-सकलमपि परित्यक्तम्। अहरहः सर्वात्मना सेवाभावनामात्मसात्कृत्य यात्राः कुर्वतो भाषणानि वितरतः खादी-प्रचारमाचरतः संस्थाभ्य आर्थिकं साहाय्यं प्रापयतश्च श्रमाधिक्येन स्वास्थ्यं क्रमशोऽह्रसत्।

आसीत् स हि कालः परस्परमीर्ष्यायाः, साम्प्रदायिकोत्पातानाम्, समुन्नतपदलाभार्थमहमिकायाश्च। काङ्ग्रेसस्य कानपुराधिवेशने मद्रपुर्य-धिवेशने, लाहौराधिवेशने च कार्यकर्तृष्वपि भिन्नभिन्नानां वैचारिकाग्रहाणां कारणात् क्वचित् क्वचित् सङ्घटनेषु विघटनान्यभूवन् परं सर्वेषु निश्चितया विचारधारया श्रीराजेन्द्रप्रसादेन समुचिताः सम्मतय एव प्रस्ताविताः। मद्रपुर्यधिवेशनावसरे तेन महाभागेन पारिवारिकैः सह **रामेश्वरादितीर्थानां पुण्या यात्रा** विधाय **लङ्कायां यात्रा** विहिता। बिहारं प्रत्यावृत्य दक्षिण-दिश्यन्येषां तीर्थानां दर्शनान्यपि न विस्मृतानि।

स्वीयं मानसमुज्ज्वलं गतभयं विश्वासबीजोद्भवं,
नैर्मल्येन विचार-वर्तनविधौ सन्धारयन् नित्यशः।
कर्तव्यं परिपालयंश्च कुरुते पुण्यानि कर्माणि य—
स्तस्यानन्तफलं स तत्र वृणुते सौख्यं ततो विन्दति॥३॥

श्रीराजेन्द्रप्रसादस्य भारतीयता यथा मनस्यासीत् तथैव वचस्यपि व्यराजत्। कर्मणा स कदापि तादृशं कर्म नाकरोद् येन भारतीयताया आदर्शे मालिन्यमप्यागच्छेत्। अत एव स मनसि वचसि कर्मणि च पुण्यपीयूषपूर्णः सन् नितरां स्वं राष्ट्रं सेवते स्म।

हिन्दीभाषा भारतस्य भाषेति विश्वसन्नयं सर्वदा तस्याः परिवर्धनाय प्रसाराय च प्रायतत। इन्दौरनगरे **'हिन्दीसाहित्य-सम्मेलनस्या'**धिवेशनं श्रीगान्धिमहाभागानां साभापत्ये सम्पन्नं तदा स तत्र सममिलत्। तत एव स हिन्दीप्रचारकार्यं वीक्षितुं मद्रपुरीमगच्छत्। श्रीगान्धिभिरपि स्वीयः सूनुर्देवदासो हिन्दीप्रचारे संयोजितः। श्रीराजेन्द्रप्रसादः कार्यस्यास्य महत्तां विज्ञाय हिन्दीसेवाकर्मणि तन्मना भूत्वा कार्यमकरोत्। **'कोकीनाडा'** नगरे हिन्दीसाहित्यसम्मेलनस्य वार्षिकमधिवेशनं तस्याध्यक्ष्ये सम्पन्नम्। राष्ट्रियैकतार्थं भाषायाः प्रश्नो देशस्याग्रे बहुश उपागच्छति स्म। मुख्यत्वेन हिन्दीमुर्दूं चाधिकृत्य विवादो भवति स्म। तदर्थं श्रीराजेन्द्रप्रसादस्य विचाराः स्पष्टा आसन्। अनेकशः स—**'अखिलभारतीयहिन्दीसाहित्यसम्मेलनस्य,**

राष्ट्रभाषापरिषदः, हिन्दीभाषाप्रचारसभायास्तथा मद्रासस्य हिन्दीभाषा-प्रचारिणीसभा' या अध्यक्षपदान्यभूषयत्। हिन्दीभाषाविषये तदीयमभिमत-मेवमभूत्—

"हिन्दीभाषा सहजा सरला च विधातव्या। तस्यां वैदेश्यशब्दानां ग्रहणे नास्ति सङ्कोचः सन्तु ते पारसीकारबाङ्ग्लदेशीयाः, परं ये शब्दा हिन्द्यामागच्छेयुस्ते हिन्दीवन्निर्मातव्याः हिन्दीव्याकरणानुशासनाधीना भूत्वा ते तिष्ठेयुरिति। न केवलमेतासां तिसृणां भाषाणामेव शब्दाः स्वीकरणीयाः प्रत्युत तया राष्ट्रभाषारूपेण ग्रामीणाः शब्दा अप्यात्मसात् कर्तव्या भविष्यन्ति। याः प्रान्तीया भाषाः सन्ति तासां शब्दावलीभ्योऽपि बहवः शब्दा ग्रहीतव्या इति।"

भाषा राष्ट्रस्य मूलं भवति च निरतं कुञ्चिका सैकताया-
स्तस्यां साल्यमौदार्यमथ सहजताऽपेक्ष्यते नित्यमेव।
निःसङ्कोचं जनानां व्यवहृतिषु समायान्ति ये येऽथ शब्दा-
स्तेषां तद्वच्च हिन्दीकरणमपि सदावश्यकत्वं बिभर्ति ॥४॥

एवंविध एवापूर्वोऽनुरागः स्वदेशस्य हिन्दीभाषाविषये तस्याजीवनमस्थात्। अनेकेषु प्रसङ्गेषु हिन्दीभाषामाधृत्य कृतानि भाषणानि श्रीमतो राजेन्द्र-प्रसादस्य तां प्रत्यनन्यां निष्ठां प्रमाणयन्ति।

卐

देशान्तरालोकनसौख्यलाभः

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्॥ चरैवेति।
(ऐतरेय-ब्राह्मणः ७।१५)

प्रत्येकं देशजाता निज-निज-वसुधामातुराराधनार्थं,
किं किं कुर्वन्ति कीदृग् भवति च सुदृढः संस्कृतौ स्नेहभावः।
कांस्कानाचार-धर्मानपि निपुणतया पालयन्तो वसन्ती—
त्येतज्जिज्ञासमाना दिशि विदिशि मुदा चारुचर्या भ्रमन्ति॥१॥

दृष्ट्या श्रुतेनानुभवेन पुंसः, पूर्णत्वमायाति मतौ समन्तात्।
तदेव सम्पूर्णतमं करोति, देशान्तरालोकनसौख्यलाभः॥२॥

'अङ्गीकृतं सुकृतिनः परिपालयन्ती' ति सूक्तिमनुसृत्य पूर्वं राष्ट्रसेवार्थं वाक्कीलव्यवसायाय तिलाञ्जलिदानकाले डुमरावमहाराजेन हरिप्रसाद-सिन्हाद्वारा कृतस्य बर्मादिशसम्बद्धाभियोगस्य विरुद्धं विहितावेदनस्य पक्षेऽपि वक्तृत्वसम्पादनाय यत् प्रतिवचनमन्तं यावन्निर्वाहाय दत्तमासीत् तस्य कारणादेव श्रीराजेन्द्रप्रसादेन विदेशयात्रार्थं पारपत्रप्राप्तये निवेदितम्, बिहारस्यारक्षिविभागस्तस्मै पारपत्रं दातुं नान्वमन्यत परं प्रधानसचिवस्तेन सह सम्मतोऽनाभवत्, स हि टिप्पणीं प्रास्तौद् यत्—"स केवलं व्यवहारतो राजनीतिज्ञोऽस्ति, तस्य वैयक्तिकं चरित्रं बहुभ्यो जनेभ्यः श्रेष्ठं विद्यते। ईदृश्यां स्थितौ विदेशयात्रार्थमनुमतिपत्रवितरणे निषेधनं कठिनं वर्तते।" एतदनुसारमनुमतिं प्राप्य श्रीराजेन्द्रप्रसादेन प्रथमा विदेशयात्रा कृता। भारतीयवेषभूषयोरेव स तत्रागच्छद् भारतीयपद्धत्यैवाशनवसनान्यपि च निरवहत्। एतस्मिन् व्यवहारे तदीयो भृत्यः श्रीगोवर्धनस्तस्य साहाय्यमकरोत्।

मार्गे स **'काहिरा'**-नगरे भ्रमणं व्यदधात्। लन्दननगरे हरिप्रसाद-सिन्हामहोदयस्य प्रधानैर्महाधिवक्तृभिः **श्रीग्रपजानमहोदयैः** सह कार्यमकार्षीत्। पञ्चसप्तवर्षदेशीया अपि ते श्रीराजेन्द्रप्रसादस्य परिश्रमेण चातुर्येण विधिशास्त्रज्ञतया चातीव प्रसन्ना अभवन्। प्रान्ते द्वावपि पक्षौ परस्परं सन्धिं कृतवन्तौ।

लन्दनं विसृज्य श्रीराजेन्द्रप्रसादो **विएना**-निकटस्थाय **सन्तासवर्गाय** प्रस्थितः। तत्र कर्मकरनेतुः **फेनरब्राकवे**महानुभावस्याध्यक्षे 'युद्धविरोधि-सम्मेलने' जर्मनी-आस्ट्रिया-फ्रांस-इंग्लैण्ड-हालेण्ड-चेकोस्लोवाकिया-फिलिस्ती

नादिदेशानां प्रतिनिधीनामुपस्थितौ श्रीगान्धिनोऽनुयायितया सम्मानितः श्रीराजेन्द्रप्रसादो भाषणमकरोत् तत्र च स चम्पारन-सत्याग्रहे श्रीगान्धिनो ऽहिंसाप्रयोगविषये च स्वानुभवानश्रावयत्। सन्तासवर्गात् स **'ग्राट्ज'**-मगच्छत्। राजेन्द्रप्रसादेन सह युद्धविरोधि-सम्मेलनस्य मन्त्री **'रनहमब्राउन'**-स्तथाऽन्ये केचन प्रतिनिधयोऽप्यासन्। तत्र महात्मगन्धिनः डा० **स्टाण्डिनेय**-दम्पतीभ्यां पत्रमेकं देयमासीत्। ताभ्यां सह स तयोः सदनमप्यगच्छत्। ततश्च-तत्रैव युद्धविरोधि-प्रचारार्थमायोजितायामेकस्यां सभायां सम्मिलितुं प्रस्थितः परं सभाविरोधिनामुत्पातेन श्रीराजेन्द्रप्रसादस्तत्सहयोगि-दम्पती चोत्पात-ग्रस्ता अभवन् रक्तलिप्ताङ्गाश्च गृहं प्रत्यावृत्ताः। इयं सूचना श्रीगान्धिभ्यो-ऽपि दत्ता यदाधारेण तैः **'यंग इण्डिया'** पत्रे पूर्णं विवरणं प्रकाशितम्। घटनेयं १ अगस्त १९२८ ई० वत्सरेऽभूत्। स्वल्पेनैव कालेन स्वास्थ्यलाभं प्राप्य ततः स 'विएनायै' ततश्च श्रीरोम्यांरोलाभिः सम्मिलितुं 'स्विटजर-लैण्ड'-यात्रायै प्रातिष्ठत्। तेषु दिवसेषु स महानुभावस्तापकालादात्मनस्त्राणाय **'कार्टिगी'**-पर्वतिकायां न्यवसत्, तत्रैव श्रीराजेन्द्रप्रसादेन साक्षात्कृतः स महाभागः।

स हि **'बर्नविले-न्यूचैटेल-लूसान-जेनेवा-पैरिस**-नगराणामपि यात्राम-करोत्। ततो **लन्दनं** प्रत्यावृत्य बिहारवासिनः स्वसहयोगिनो दुर्घटनायां मृतस्यान्त्येष्ट्यां सम्मिल्य स **'एडिनबरां'** प्राप्तः। तदनन्तरं यूरोपार्थं प्रस्थाय **'एम्सटर्डम'**-(हालेण्ड)स्यैकस्मिंस्तरुणसम्मेलने सम्मिलितवान् भाषितवांश्च। ततः परं यूरोपस्य भ्रमणमारब्धम्। **बर्लिने** हरिप्रसादसिन्हा-महादयेन सहैकस्मिन्नावासे दिनत्रयमुषित्वा लाइप्जिगनगरमव्रजत्। तत्र **डा० कुने**महोदयं मिलितुं वाञ्छन् स तेषां चिकित्सालयमगच्छत् परं तेषां निधनं ज्ञात्वा निराशोऽभवत्। प्रान्ते तदीयपुत्रेण साक्षात्कृत्यात्मनश्चिकित्सा-विधानं लिखित्वा सन्तोषमन्वभवत्। ततो **म्यूनिखन**गरस्थितं प्रसिद्धं सङ्ग्र-हालयं विलोक्य **बेनिस-रोम-नीस-मा**र्साईनगरेषु व्यहरत्। मासाईत एव **एस० एस० मुलतान'** नामकं जलायानमारुह्य तत्रैव मिलितैर्हरिप्रसादप्रभृतिभिरन्यैः सहयोगिभिः साकं मोहमयीं समागच्छत्।

२० सितम्बर १९२८ ई० दिने पटनायां **'यंग मेन्स इन्स्टिट्यूट'** स्थले समायोजितायां सभायां स्थितेषूत्साहिच्छात्रेषु श्रीराजेन्द्रप्रसादेन स्वस्या विदेशयात्राया अनुभवाः श्राविताः। तेन भाषितम्—

"इंग्लैण्डे भारतीयविद्यार्थिनामध्ययनं मुख्यतो विधिशास्त्रस्याध्ययन-मतीव व्ययसाध्यं विद्यते तच्च नास्ति सर्वतोदृष्ट्या लाभप्रदम्। एवमेव तदानीं विएना-जर्मन्योः क्रमशश्चिकित्साविज्ञानाय तथा लैटिन-ग्रीकभाषयो-रुच्चतराध्ययनाय समुचितं स्थानं दर्शितम्। स्वदेशस्य तरुणा अपि तेन

प्रेरिता यत् ते पाश्चात्यशिक्षासंस्थानामनुशासनमात्मसात् कुर्युः। तत्रैव तेन युद्धविरोधि-सम्मेलनस्य तथा विश्वतरुणसम्मेलनस्यानुभवा अपि श्राविताः किञ्च विदेशवासिनां भारतस्य स्वतन्त्रता-प्राप्तेः प्रतीक्षणं तथा शान्ति-सन्देशोपलब्धेरभिलाषोऽपि विज्ञापितः।"

इत्थं श्रीराजेन्द्रप्रसादस्य विदेशयात्राऽतीवोत्साहवर्धिनी नवनवज्ञान-प्रदायिनी वैदेशिकजनजीवनस्थितिपरिबोधिनी च समपद्यत। तथा च—

विद्वान् सर्वत्र वन्द्यो भवति भुवि जनास्तं सुसम्मानयन्ति,
तद्वाण्यां विश्वसन्ति प्रणतिततिभरैराद्रियन्ते सदैव।
श्रीमद्राजेन्द्रवर्योऽप्यथ वचनसुधाः पाययन् भारतीयां,
क्षीणक्षीणां प्रतिष्ठां पुनरपि सहसाऽस्थापयद् विश्वमञ्चे॥३॥

भारते गान्धिनां दिव्यमस्त्रं सत्याग्रहात्मकम्।
कथं प्रयुज्यते तस्य प्रभावातिशयश्च कः॥४॥
गौराङ्गाणां च दौरात्म्यं पराकर्तुं प्रयस्यताम्।
स्थितिः काऽस्तीति तत्सर्वं विशदं पर्यबोधयत्॥५॥

यतो हि—**कुर्वन् देशविदेशयोः स्थितिविधेर्ज्ञानाय यात्रां जनः,**
स्वीयां प्रातिभशक्तिमुन्नमयति प्राप्नोति सत्प्रेरणाः।
मैत्रीं वर्धयतेऽथ सङ्कुचिततामुज्झत्यजस्रं हृदो,
धैर्यं धारयते मुदं वितनुते क्लिश्नाति नो कर्हिचित्॥६॥

* * *

आन्दोलन-विजृम्भणम्

नि तद्दधिषेऽवरे परे च यस्मिन्नाविथावसा दुरोणे।
आ स्थापयत मातरं जिगत्नुमत इन्वत कर्वराणि भूरि॥
(अथर्व० का० ५, सू० २, मं० ६)

अन्यायानां प्रतीकारं, कर्तुं भारत-वासिनाम्।
शान्तिपूर्णे विरोधेऽभूदान्दोलन - विजृम्भणम्॥१॥

दृष्ट्वा राष्ट्रविरोधिकर्म-निरतान् निन्द्यां प्रवृत्तिं श्रितान्,
नित्यं स्वेप्सितसिद्धये निजमनोऽभीष्टं विधातुं रतान्।
सत्यञ्चापि विकृत्य बोधनपरान् पापान् गुरुण्डाग्रगान्,
राष्ट्रं स्वं परिरक्षितुं कृतधियोऽकुर्वन् महान्दोलनम्॥२॥

पूर्वं श्रीमहात्मगान्धिना प्रेरिता भारतीयाः सविनयावज्ञाऽऽन्दोलनेन यत्र तत्र स्वाधीनता-सङ्ग्रामे किञ्चित् साफल्यमवाप्ताः परं दमन-चक्रस्याग्रे तेषां भीतिस्तथा नैवापगता यतस्ते समूहशः किमपि कर्तुं समर्था भवेयुः। परं श्रीगान्धिभिर्निरन्तरं दीक्षिताः शिक्षिताः स्वयमग्रे भूत्वा परिचायिता जनाः स्वयमेव पुनस्तदर्थं प्रवृत्ता अभूवन्। यतो हि—**'कूपलैण्ड'**स्यानुसारं 'श्रीगान्धिनो भारतीयेतिहासस्य दिशमेव पर्यवर्तयन्। तैस्तत्कार्यं विधाय दर्शितं यत् तिलकेनापि कर्तुं नाशक्यत। राष्ट्रियमान्दोलनं क्रान्तिकारि विहितम्, स्वतन्त्रताया लक्ष्यं प्रति वर्धनं शिक्षितम्, शासनोपरि संवैधानिकः प्रभावः स्थापितः, वाद-विवादाभ्यां नैव, अपि तु शक्त्या—आम् शक्त्या, अस्तु नाम सा शक्तिरहिंसात्मिका। तै राष्ट्रियान्दोलनं न केवलं क्रान्तिकार्येव विहितं प्रत्युत तल्लोकप्रियमपि सम्पादितम्। तदानीं यावद् यदान्दोलनं नगराणां बुद्धिजीवि-वर्गं यावदेव सीमितमासीत् तत्ततः परं ग्रामाणां सामान्य-जनतया निकटे प्रापितं किञ्च तत्तत्र जागर्त्युत्पादनेऽपि समर्थमभूत्।

निर्भीकता सत्यसमाश्रयश्च, स्वाधीनतायै सततं प्रयासः।
अहिंसयान्दोलन-चालनं च, स्वदेशवस्त्रादिधृतौ स्वनिष्ठा॥३॥
राष्ट्रस्य सेवार्थमुदारयोगः, सदात्म-सम्मानसुरक्षणं च।
स्वार्थं परित्यज्य पुरः प्रयाणमासीदिदं गान्धियुगावदानम्॥४॥

कारणादेतस्मादेव विदेशिशासकानां विविधरूपेण वञ्चन-लुण्ठन-प्रतारण-पक्षपात-विद्वेषणादिकार्याणि भारतीय-जनताया मनस्सु काञ्चिद् विचित्रामेव प्रेरणां तदानीं प्रवर्तयन्ति स्म। सन् १९२७ ई० वर्षे चेङ्गलैण्डतः कु० मेयो-लिखितस्य **'मदर इण्डिया'** पुस्तकस्य प्रकाशनमभूत्, तस्मिन् भारतीयानां राष्ट्रियभावनाया उत्पाटनार्थं भारतीयसंस्कृतेः स्वरूपमसत्यं पक्षपातपूर्णम-पमानद्योतकं चावर्तत। आसीत् तस्मिन् भारतीयजनतायाः स्वातन्त्र्य-कामनाया बाधनाय तादृशां प्रयासानां छलप्रयोगः।

आसन् भारतेऽपि बहवो दूरदर्शिनो विचारका नीतिज्ञाश्च नेतारः यैस्तस्या भावनायाः पृष्ठभूमेश्चिन्तनं विधाय भूयोऽपि च्छद्मिनां शासकानां शान्तिपूर्णाय विरोधाय निश्चितम्। सन् १९२८ ई० हायने सरदारवल्लभ-पटेलेनातीव कौशलपूर्वकं ससाहसं **'बारदौलीसत्याग्रह'**स्य सञ्चालनं कृतम-भूत्। तेन गुर्जरप्रदेशवासिनां मनःसु निर्भीकताया एका नवीना चेतना पूरिता किञ्च समस्तेऽपि देशे सत्याग्रहस्यैकः प्रेरको दृष्टान्त उपस्थापितः।

८ नवम्बर १९२७ ई०वत्सरे ब्रिटिशशासनं संवैधानिकानि संशोध-नानि विधातुमेकस्या 'वैधानिकासमिते'र्नियोजनमघोषयत्। तस्या अध्यक्षः 'साइमन' आसीत्। समितौ कस्यापि भारतीयस्य सदस्यत्वेन स्वीकृतेरभावाद्

भारतस्य राष्ट्रियभावनाऽतीवाघातमन्वभवत्। भारते विभिन्नानि मतानि धारयन्त्यः संस्थास्तस्य 'सामूहिकं निन्दन'मकार्षुर्यतो हि—"इयं तस्य प्राथमिकाधिकारस्यास्वीकृतिरासीद् या प्रत्येकं राष्ट्राय स्वाभाविकी भवति।" भारतीयकाङ्ग्रेसेनापि स्वीययोर्मद्रास-कलकत्ता-नगरयोरधिवेशनयोस्तीव्रं भर्त्सनं विहितम्। यदा समितेः सदस्यानां दलं मोहमय्यां प्राप्तं तदा काङ्ग्रेसजना उदारवादिनस्तथा मुस्लिमसम्प्रदायस्य महत्त्वपूर्णा जनसमूहाः **'साइमन! परा याहि'** नादैस्तस्य बहिष्कारमकुर्वन्। भारतस्यान्येषु भागेष्वपि यत्र यत्र तद्दलमुपेतं तत्रैवमेव बहिष्कारा अभवन्।

निन्द्यं समाचरति यः सततं दुरात्मा,
यश्चाधिकारमपि हन्ति सुनिश्चितार्थम्।
सम्प्राप्य शासकपदं न शुभं प्रजाया,
दुष्टश्चिकीर्षति स धिक्करणीय एव ॥५॥

श्रीराजेन्द्रप्रसादस्य तथा केषाञ्चिदन्येषां नेतॄणां नेतृत्वे साइमन-मण्डलस्य समस्तेऽपि देशे बहिष्कृतेः सङ्कल्पस्य समर्थने बिहारप्रान्तेनापि महतोत्साहेन सहयोगोऽदायि। तदानीं बिहारप्रान्ते सर्वकारस्यैकस्याविवेकपूर्णकार्यस्य कारणात् पूर्वमेव व्यापिन्युत्तेजना प्रसृताऽभूत्। शासनेन गयास्थिता मण्डलपरिषत् स्वाधीनीकृता तस्या अध्यक्षः श्रीअनुग्रहनारायणसिंहश्च—यो हि महत्त्वपूर्ण एको राष्ट्रियनेताऽऽसीत्—अध्यक्षपदादपाकृतः। शासनस्येमां स्वेच्छाचारितां विरोद्धुं गयानगर एका सार्वजनिकी सभाऽऽयोज्यत तस्यां श्रीराजेन्द्रप्रसादेनातिकठोरतया निन्दयता श्रीमदनुग्रहनारायणसिंहे शासनस्यारोपाणां निराधारत्वं साधितं भाषितञ्च यत् 'काङ्ग्रेसेन तेषामारोपाणां सम्पूर्णरूपेण परीक्षणं विहितमस्तीति।' प्रकरणमिदमाश्रित्य गयामण्डलस्य विभिन्नेषु स्थानेषु भाषणानि कृतानि। पटनायां 'बिहारप्रान्तीय-राजनीतिकसम्मेलन'स्योपवेशनेऽपि गयामण्डलपरिषत्सम्बन्धिन्याः शासकीयनीतेः कठोरा पर्यालोचनाऽक्रियत विभिन्नैर्जनान्तैः समायाता जनास्तस्मिन् प्रदर्शने सम्मिलिता, यत् साइमनदलस्य विरुद्धमभूत्। प्रायस्त्रिंशत्सहस्रमिता जनाः सोत्साहं '**हार्डिंग उद्यान**'स्य समक्षं कृष्णध्वजान् नीत्वा '**साइमन गच्छतु**' इति नादं कुर्वन्तः समवेताः। तत्र श्रीराजेन्द्रप्रसादश्छात्राननन्यजनांश्च प्रत्यबोधयद् यत् ते 'सङ्घर्षात् दूरे तिष्ठेयुस्तथा द्वितीयः पक्ष आक्राम्येत् तदापि शान्तिं धारयेयुः।' भारतस्य सांविधानिकसमस्याया विचारायाङ्ग्लानां 'साइमनमण्डल'स्य विरोधोऽयं भारतस्य सर्वेष्वपि महानगरेषु प्रवृत्तः। सर्वत्रैव जनाः कृष्णध्वजप्रदर्शनपूर्वकं बहिष्कारनादानुदघोषयन्।

भारतीय-स्वतन्त्रता-सङ्ग्रामस्य मध्यकाले 'साइमन-दल'स्य भारते

भ्रमणमेका महत्त्वपूर्णा घटनाऽऽसीत् । देशस्य प्रमुखेषु स्थानेषु तस्य भ्रमणमभूत् । तद् यत्रापि गतं, तत्रैव तस्य स्वागतेन सह प्रबलो विरोधोऽप्यजायत । तस्य स्वागतकर्तृषु यत्र शासकीयाधिकारिणां भूस्वामिनां कृषिस्वामिनां तथा नृपतीनां समूहोऽवर्तत तत्रैव विरोधकर्तृषु स्वतन्त्रता-सैनिका राष्ट्रिया नेतारस्तथा स्वातन्त्र्याय सन्नद्धा जनताऽप्यवर्तत । अनयोर्द्वयोः समूहयोर्मध्ये सङ्घर्ष-कारणादारक्षिणां यष्टिकावर्षणं प्रवर्तते स्म । तस्मिन् सङ्घर्षे मोतीलाल नेहरूर्जवाहरलालनेहरूस्तत्परिवारस्यान्ये सदस्याश्चाहता आसन् । लाहौरनगरे विरोधप्रदर्शनाय प्रवृत्ते चलसमारोहे **'लालालाजपतराया'**णामुपरि तत्रत्यै रक्षासैनिकैरीदृशा निर्दयतापूर्णा यष्टिकाप्रहाराः कृता यैस्तेऽत्यन्तमाहता अन्ततश्च मृत्युमेव प्राप्ताः । प्रहारानन्तरं तैरुद्घोषितमासीद्, यद्—

मम वपुषि कृता ये यष्टिकानां प्रहारा-
स्त इह भवितारो गौर-साम्राज्यकस्य ।
शव-पिटक-विधाने कीलका एकदा द्राग्,
'भवति भुवि विनाशो दुष्कृतैर्दुर्जनानाम्' ॥६॥

卐

औपनिवेशिक-स्वराज्य-लक्ष्यम्

तेऽअज्येष्ठा अकनिष्ठासऽउद्भिदोमध्यमा सो महसा विवावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥

(ऋग्वेद० ५।५।६४)

यदृच्छालाभादप्यतिसुखितमात्मानमनिशं,
मुदा मन्वानाऽभूदिह सुसरला ह्यार्य-जनता ।
परेषां दास्यं नो कथमपि परं सह्यमभवत्,
स्वराज्यं तस्मात् साऽभ्यलषदचिरं स्वल्पकमपि ॥१॥

साइमन-मण्डलस्य सार्वत्रिको बहिष्कार आसीद् देशस्य जागर्तेरेकः स्पष्टः सङ्केतः । देशवासिभिः स्वस्या रचनात्मिकाया राजनीतिज्ञतायाः प्रमाणमपि प्रस्तुतं किञ्च संविधानस्यैका योजनाऽपि सज्जीकृता । १९२८ ई० वत्सरे मईमासस्योनविंशतितमे दिवसे मोहमयीनगर्यामेकं सर्वदलीयं सम्मेलनमभूद् यस्मिन् **'संविधानयोजना'**याः स्वीकृतये पण्डितमोतीलालनेहरूणाऽध्यक्ष्ये समितिरेका निर्मिता । अगस्ते मासि तस्याः प्रतिवेदनं प्रकाशितम् ।

तस्मिन् **'नेहरूसमित्या'** भारतस्य संविधानरूपेणौपनिवेशिक-स्वराज्यस्य संस्तुतिः कृताऽभूत्। सा नासीत् पृथग् निर्वाचनस्य पक्षे। सा सम्मिलिताय मिश्रिताय वा निर्वाचनाय सम्मतिमदात्। साम्प्रदायिक-सुरक्षाया एकमात्रं साधनमिदं प्रस्तावितं यद् यत्र यवना अल्पसङ्ख्यकाः स्युस्तत्र तेभ्यः स्थानानि सुरक्षितानि क्रियेरन्। लखनऊनगरीये सर्वदलसम्मेलने नेहरूसमितेः स प्रस्तावः कैश्चित् संशोधनैः सह स्वीकृतः। किन्तु **'मुस्लिम-लीग'** नाम्न्या संस्थया तस्य विरोधः कृतः। १६२६ ई० वर्षे मुहम्मदअली जिन्ना च मुस्लिमानां प्रातिनिध्येन चतुर्दशसूत्रमयीं योजनां निरमात्।

काङ्ग्रेसस्य क्षेत्र एको वर्ग ईदृश आसीद् य औपनिवेशिकस्वराज्य-विचारं विरुणत्ति स्म तथा पूर्णां स्वाधीनतां वाञ्छति स्म। तस्याग्रेसरा अभूवन् श्रीजवाहरलालनेहरूः सुभाषचन्द्रो वसुस्तथा श्रीनिवास आयङ्गरः। एतैः 'इण्डिपेण्डेण्ड आफ इण्डिया' नाम्न्या एकस्याः संस्थायाः संस्थापनाऽपि पूर्वं विहिता, आसीत् सा स्वोद्देश्यप्राप्तेः साधनरूपा। मद्रासस्य काङ्ग्रेसाधिवेशने श्रीराजेन्द्रप्रसादः स्वाधीनतायाः प्रस्तावस्य विरोधमकार्षीत्। पूर्वं यदा श्रीगोखलेमहोदयैः सह श्रीराजेन्द्रप्रसादस्य सम्पर्कोऽभवत् तदा स 'ब्रिटिशराष्ट्रमण्डलस्य सर्वेषां सदस्यानां समानस्थित्या तथा तस्य नीति-निर्धारणे समानयाज्ञाया विषये' तेषां विचारेण प्रभावितोऽप्यभवत्। आसीत् स ब्रिटिशसंविधानस्यापि प्रशंसकः। तस्य तदानीं विचार आसीद् यद् औपनिवेशिकं स्वराज्यमेवोचितं लक्ष्यं भवितुमर्हति तथा पूर्णस्वाधीनतयाऽस्माकं काठिन्यमेव वृद्धिं गमिष्यतीति।

कलकत्तायां काङ्ग्रेसाधिवेशनेऽपि रचनात्मककार्याणामग्रे वर्द्धनायापि बलप्रदानं कृतम्। १६२६ ई. वर्षे 'विदेशि-वस्त्र-बहिष्कार-समितेः' सङ्घटनाऽक्रियत तथा काङ्ग्रेस-कार्यकारिण्या निश्चितं यद् "रविवासरे १७ मार्चदिने ततश्च मासस्य प्रथमे रविवासरे विदेशिवस्त्राणां बहिष्कारस्य प्रचारे विशिष्य ध्यानं देयं खादी-वस्त्रस्य विक्रयाय च भ्रमणं विधेयम्" इति—

सेवाया बहुशो भवन्ति विषयास्तेषां प्रकारा अपि,
भूयांसो विलसन्ति तान् फलयितुं यत्ना विधेयाः समैः।
साफल्यं किल लभ्यते पुनरपि प्रीत्या स्वयं सेवका,
वीताहङ्कृतयः स्वकर्मसु रताः स्युः सर्वदा सम्मताः ॥२॥

तेषु दिवसेषु श्रीराजेन्द्रप्रसादो 'बिहार-प्रान्तीय-काङ्ग्रेस-समिते'-र्मन्त्रिष्वन्यतम आसीत्। तेन स्वदेशिवस्त्राणां कार्यमनेकप्रकारेण सुविधाजनकं विधातुमुपायः कृतः। एका योजना निर्मिता, यस्या अनुसारं प्रत्येकं जनपदे

कार्यकर्तृभ्य एकैकं ग्रामं चित्वा तत्र प्रतिगृहं गमनमावश्यकमभूत्। सारन-चम्पारन-दरभङ्गा-भागलपुर-जनपदानां कार्यकर्तारः स्वयं श्रीराजेन्द्रप्रसादेनैव योजनया परिचायिताः।

तदानीं बिहारप्रदेशे कार्यावरोधस्य द्वे घटने विशिष्योल्लेखनीये स्तः। प्रथमा जमशेदपुरस्य लोहयन्त्रालये घटिताऽपरा च तस्योपनगरे गोलमुरीस्थाने विहिता कर्मचारिणां कार्यावरोधस्य घटना। अनयोः प्रथमः कर्मावरोधः श्रीसुभाषचन्द्रवसोर्माध्यमेन मिथः सन्धिना समाप्तः। द्वितीयः खलु श्रीवसोरागमनेन तदनुरोधादेव श्रीराजेन्द्रप्रसादेन विहितैः सुबहु प्रयत्नैरपि साधीयान् न सम्पन्नः।

श्रीराजेन्द्रप्रसादेन विहितानि 'सुरायास्तथा विदेशिवस्त्राणां बहिष्कारस्य कर्मणे' स्वयंसेवकानां प्रवेशार्थमाह्वानमधिकृत्य मुंगेर-मण्डलस्य बरहीग्रामे व्याख्यानदानं, बड़हियास्थाने जगदम्बापुस्तकालये समायोजितायाः सभाया अध्यक्षपदेनाभिभाषणं सारन-जनपदस्य गोपालगञ्जग्रामे सभायां जनेभ्यो बारदोली-सत्याग्रहात् प्रेरणाप्राप्तये निवेदनं चातीव महत्त्वशालीन्यभूवन्।

१८२९ ई० १३ जुलाई-दिने **श्रीजगतनारायणलाल**-महानुभावो हजारीबाग-कारातो विमुच्यागतस्तदा श्रीराजेन्द्रप्रसादेन **'गुलाबबाग'** नाम्नि स्थले पटनाया नागरिकाणामेकस्यां सभायां भाषणमकारि। तस्मिन् भाषणे स राजद्रोह-विधानस्य निर्भीकतयाऽऽलोचनामकरोत्। तदर्थमारक्षिभिस्तस्योपर्यभियोगं चालयितुं सर्वकाराय सम्मतिः प्रदत्ता किन्तु व्यवस्थितस्यैकस्य दलस्य सम्मानितकार्यकर्तुस्तथा सत्यनिष्ठव्यक्तिरूपेण प्रसिद्धस्य तस्य कृते तादृशो व्यवहारो नोचित इतिकृत्वा सर्वकारेण निषिद्धः। एवमेव छपरा-जनपदस्यापि यात्रां विदधता श्रीराजेन्द्रप्रसादेन विभिन्नासु सभासु खद्दरवस्त्राणां धारणाय तथा स्वराज्यप्राप्तये सर्वतोभावेन कार्यसम्पादनाय जनाः प्रबोधिताः।

१९२९ ई. वत्सरस्य नवम्बरमासे स्वसचिवेन मथुराप्रसादेन सह श्रीराजेन्द्रप्रसादमहाभागो बर्म्मादेशस्य यात्रामकरोत्। सा यात्रा श्रीहरिमहोदयस्य निमन्त्रणेन तथा क्याण्टागायाः प्रजाजनानामनुरोधादभवत्। क्याण्टागाया वासिभिरिदं काङ्क्षितमासीद् यद् राजेन्द्रप्रसादस्तत्रागत्य तेषां तथा भूस्वामिनो माइलिनस्य मध्ये प्रचलतो विवादस्य समाधानं कारयेदिति। स माइनिलः पूर्वं शाहाबादे नीलस्य कृषिमकार्षीत्। बर्मायां श्रीहरिमहोदयस्य भूस्वामिता 'जयावाड़ी' कथ्यते स्म। श्रीराजेन्द्रप्रसादो रङ्गूनस्थितान् भूयसो बिहारवासिन आलोक्यातितरां प्रासीदत्। तत्रानेकेऽ-

न्येऽपि परिचिता मिलिताः । तत्रत्यैर्विशिष्टैर्बर्मानिवासिभिर्भारतीयैश्च श्रीराजेन्द्रप्रसादस्य सम्माने भोजस्यायोजनमपि कृतम् ।

बर्मातः परावृत्तिकाले पोत एव श्रीराजेन्द्रप्रसादस्य श्वासरोगः प्रवृद्धः। तदाक्रमणेन खिन्नः स कलकत्तायामेकस्य महाधिवक्तुः श्रीजोगेन्द्र-नारायण-मजूमदारस्य गृहं गतस्तत्साहाय्येन चिकित्सां कारयित्वा मुंगेरनगरे सम्पद्यमानस्य बिहारप्रान्तीयसभाया अष्टाविंशतितमाधिवेशन-स्य साभापत्यं विधातुं दिसम्बरस्य नवम्यां तिथौ तत्र प्राप्तः किन्तु भूयोऽपि तत्र रुग्णतावशात् सभापतिभाषणस्य हिन्द्यनुवादोऽन्येन पाठयित्वा श्रावितः। स्वीये भाषणे तदानीमौपनिवेशिकस्वराज्यस्य समर्थनं कृतमासीत्। तस्मिन्नधिवेशने सरदार-वल्लभभाईपटेला अप्युपस्थिता आसन् । ततः परं बिहारप्रान्ते भ्रमणं कुर्वता श्रीराजेन्द्रप्रसादेन स्वदेशस्य मूर्धनि भ्रमते राष्ट्रियसङ्घर्षाय तथा रचनात्मककार्याणां सम्पादनाय जनानामुत्साहा-भिवर्धनार्थं प्रचारो विहितः। औपनिवेशिक-स्वराज्यस्य कल्पना श्रीराजेन्द्र-प्रसादस्य मनसि समान-पणेषु मिथो विभागताया आसीत् या कस्याप्येकस्य विभागधारिण इच्छातः समापनं कर्तुं शक्यते स्म। यतः —

सङ्घर्षे भवति परस्परं जनानां, हानिस्तां मनसि विचिन्त्य नेतृवर्गः ।
स्वाराज्यं कियति चिदंश एव लब्धुं, सज्जोऽभूत् कथमपि शान्ति-कामनातः ।।३

न्यायानुरूपं यदिहास्ति देयं, तदेव लभ्येत तदापि शान्तिः ।
देशे स्वकीये तु समेष्यतीति, मत्वा कथञ्चित् स्थिरतां प्रपन्नाः ।।४।।

* * *

राष्ट्रियान्दोलन-प्रवेगः

इन्द्रो॒ मदा॑य वावृधे॒ शव॑से वृत्र॒हा नृभिः॑।
तमिन्म॒हत्स्वा॒जिषू॒तेमर्भे॑ हवामहे॒ स वाजे॑षु॒ प्र नो॑ऽविषत् ॥

(ऋग्वेद० १।८१।१)

मुण्डे मुण्डे मतीनां भवति विषमता चिन्तने वर्तने वा,
नैकात्म्यं क्वापि दृष्टौ वसति नियतता दर्शने बोधने च ।
केचित् क्रान्तिं श्रयन्ते प्रतिपदमितरे कामयन्ते सुशान्तिं,
सर्वेषां नो मनांसि क्वचिदपि सदृशान्यत्र भूमौ भवन्ति ॥१॥

अथ प्रसरति सकलभारतवासिजनमानसे गौराङ्गकदम्बोज्जृम्भितोत्पातपातकपरिक्षालन-विचार-वाते सङ्घातेन स्वराष्ट्र-स्वातन्त्र्योपलब्धि-भावोपगूढानाममूढानां कतिपयदिनैरेव समुपचीयमाननानाविधविरोध-शोध-प्रबोध-क्रोधानां भारतीययौधेयानां दमनाय गुरुण्डास्तुण्डान्युदनमयन्। भारतस्य सर्वेषु भागेषु घटनानां चक्रं तीव्रतया भ्रमति स्म, येन राष्ट्रियान्दोलनस्य प्रवेगोऽप्यवर्धत। १९२४ ई० तोऽग्रिमे काले क्रान्तिकारिणां प्रवृत्तयः पुनरेव प्रवृद्धाः। यैर्जनैः '**हिन्दुस्तान-सोशलिस्ट-आर्मी**' नाम्नैकं नवीनं क्रान्तिकारिदलं सङ्घटितमासीत् ते बहुषु स्थलेषु सक्रिया भवन्ति स्म। तस्यैव क्रान्तिकारिदलस्य द्वाभ्यां भगतसिंह-बटुकेश्वरदत्त-नामकाभ्यां नेतृभ्यां १९२९ ई० वर्षस्याप्रैलमासस्य चतुर्थे दिनाङ्के 'सभा' (असेम्बली)-भवने दर्शकदीर्घातः सभायां विस्फोटकास्त्राणि प्रक्षिप्तानि। अनन्तरं ताभ्यां स्पष्टीकृतं यत् "कार्यमिदं जनेषु कोलाहलातङ्कयोरुत्पादनाय विहितमासीत् कस्यापि क्षतये नैवेति।"

'**लाहौर-षड्यन्त्र**'नाम्ना यत् प्रकरणं प्रसिद्धिमगात् तत्प्रसङ्गेन नैकशो जना निगृहीताः। विचाराधीनैरभियुक्तैः सह यादृशो व्यवहारो भवति स्म तस्य विरोधे भगतसिंह-बटुकेश्वरदत्ताभ्यामन्यैरप्यभियुक्तैर्भोजनावरोधो विहितः। तेषु यतीन्द्रनाथदासं विहायान्यैर्भोजनावरोधकर्तृभिर्दीर्घावधेरनन्तरं कथमपि भोजनमारब्धं किन्तु यतीन्द्रनाथदासमहोदयेन

स्वस्य भोजनावरोधस्य चतुःषष्टितमे दिने सितम्बरमासस्य त्रयोदश्यां तारिकायां प्राणोत्सर्गः कृतः। तेन समग्रेऽपि देशे गम्भीरः शोकस्तथोत्तेजनस्य वीचयो व्याप्ताः। स्थाने-स्थाने '**राजनीतिक-पीडित-दिवस**'-रूपेण सभा आयोजिताः। श्रीराजेन्द्रप्रसादेन पटनायामेकस्य श्चलसमारोहस्य नेतृत्वं विहितं तथा गुलजारोद्याने विशालायाः सभाया अध्यक्षपदेन जनाः सम्बोधिताः।

दिने दिने विधीयमानान् विरोधानालक्ष्य ब्रिटिशशासनं चिन्तासन्तानतान्तिमनुभूय स्थितेर्गाम्भीर्यं विज्ञाय सङ्कट-सङ्कुलितानि दिनानि मत्वा मन्दं मन्दमौपनिवेशिकस्वराज्य-प्रदान-विषये भारतस्य संवैधानिक-प्रगतेः स्वाभाविकं लक्ष्यं परिचर्चितुमिङ्ग्लैण्डभूमौ वृत्तमञ्चपरिषद उपवेशनसमाकारणविचारान् प्राकटयत्। श्रीगान्धिनः श्रीमोतीलालनेहरूमहोदयाश्च नवदिल्ल्यां भारतस्याधिनायकममिलन्, किन्तु तत्सर्वं विडम्बनमेवासीदिति तैः स्पष्टतया परिज्ञातम्। केवलं वागाडम्बरेण जनताया वञ्चनमेव तैरनुभूतं स्पष्टीकृतं च यदौपनिवेशिक-स्वराज्यस्य वार्ताऽतिदूरं गताऽस्तीति। श्रीराजेन्द्रप्रसादस्त्वेवं प्रत्यपादयत्—

"अयमस्मभ्यमस्या वार्तायाः सङ्केतोऽभूद् यद् ब्रिटिश-शासनस्य घोषणा अस्माभिरतीव सूक्ष्मतया मुहुर्मुहुः पठितव्यास्तथा तस्याः परीक्षणं विश्लेषणं च निष्पक्षतया यथार्थवादिन्या पद्धत्या कर्तव्यमिति।"

देशोऽग्रे वर्धते स्म। १९२९ ई० वत्सरस्य दिसम्बरमासे २९ तः ३१ तारिकासु, श्रीजवाहरलालनेहरूमहाभागस्याध्यक्ष्ये काङ्ग्रेसस्याधिवेशनं लाहौर-नगरेऽभवत्। सर्वत उत्साहस्य तरङ्गा उद्वेल्लन्ति स्म। सम्मेलने सर्वसम्मत्या भारतस्य लक्ष्यरूपेण पूर्ण-स्वतन्त्रताया एको महत्त्वपूर्णः प्रस्तावः पारितः। परिपूर्णया तन्मयतया रचनात्मकेषु कार्येषु प्रवर्तनाय निवेदनेन सह तेनाधिवेशनेनाखिलभारतीय-काङ्ग्रेस-समितयेऽयमधिकारोऽपि दत्तो यत् "सा यदैवोचितं मन्येत, सत्याग्रहान्दोलनमारभेत, यस्मिन् भवतु नाम केषुचिदेव क्षेत्रेषु किं वा सर्वत्र कर-प्रदान-निरोधोऽपि।"

१९२९ ई० वर्षे दिसम्बरमासस्यैकत्रिंशत्तमे दिनाङ्के मध्यनिशीथिन्यां यदैको नूतनो वत्सरो जन्म प्राप्नोति स्म, रावीनद्यास्तटे महत्युत्तेजनान्विते वातावरणे स्वीकृतेनैतिहासिक-पूर्णस्वाधीनता-प्रस्तावेन साकमेवेदमपि निर्णीतं यद् भाविनि निर्वाचने भागो नैव ग्रहीतव्यस्तथा काङ्ग्रेसस्य ये सदस्याः साम्प्रतं विधान-मण्डले वर्तन्ते तेऽपि ततस्त्यागपत्रं दद्युः। अस्मिन्नेवाधिवेशने सर्वैरिदं निश्चितं यत् प्रतिवर्षं जनवरीमासस्य षड्विंशतितमे दिनाङ्के '**स्वाधीनता-दिवस**'रूपेण समारोहायोजनं विधेयमिति। "**क्रान्तिश्चिरं जीवतु**' '**क्रान्तिश्चिरं जयतु**' '**भारतमातुर्जयोऽस्तु**' इत्यादीनां घोषाणां

मध्ये श्रीजवाहरलालनेहरूमहोदयस्य हस्तेन भारतीय-स्वतन्त्रतायास्त्रिरङ्ग-रञ्जितो ध्वज उत्तोलितः। तदा प्रभृत्येव भारतस्य विदेशिशासनान्मुक्तेः प्रतिज्ञायाः स्मृतये प्रतिवर्षं २६ जनवर्यां दिवसोऽयं स्मृत्युत्सवदिवसरूपेण मान्योऽभवत्।

श्रीराजेन्द्रप्रसादः स्वस्यानारोग्यत्वात् सम्मेलनेऽस्मिन् सम्मिलितुं नापारयत्। स हि मासद्वयमात्मनो 'जीरादेई'ग्रामे सुहृद्वरेण श्रीसतीश-चन्द्रमुकर्जीमहोदयेन सह व्यत्यगमयत्। लाहौर-नगरे यदाऽधिवेशनं प्रवर्तते स्म तेष्वेव दिनेषु बिहारवासिभिः स्वीयः श्रेष्ठो देशभक्तः श्रीमजरुलहक-महानुभावः परिभ्रंशितः। छपरा-मण्डलस्य फरीदपुरग्रामे तस्य देहावसानम-भवत्। तेन समाचारेण श्रीराजेन्द्रप्रसादोऽत्यन्तं दुःखमनुभवन् फरीदपुरं गत्वा तत्पत्नीं तथा शोकार्त्तं परिवारं समवेदनया समभावयत्।

बिहार-प्रदेशे १९३० तमे हायने जनवर्याः षड्विंशतितमायां तारि-कायां पूर्णस्वाधीनता-प्राप्ति-सङ्कल्प-स्मृतये कार्यक्रम-निर्णय-पूर्वकं पर्षदः समायोजिताः। स्वास्थ्यशैथिल्ये सत्यपि श्रीराजेन्द्रप्रसादमहानुभावेन द्वित्रासु सभासु भाषणान्यकारि परमोत्साहश्च सर्वत्रावालोक्यत।

पूर्णस्वाधीनतायाः सुदृढतरविचारोद्यता भारतीयाः,
प्रस्तावं 'रावि' नद्यास्तटनिकटगताः पारयित्वा प्रसन्नाः।
उच्चोच्चैः क्रान्तिघोषैः सह भरतभुवो दास्यमस्तं विधातुं,
सज्जीभूताः प्रकामं विनययुतमथान्दोलनं प्रारभन्त ॥३॥

आबालवृद्धं महसा प्रवृद्धं, देशं स्वतन्त्रं परिवीक्षणाय।
होतुं निजासून् विहितप्रतिज्ञमभूत् सुसज्जं परितः प्रशस्तम् ॥४॥

स्वातन्त्र्यस्पृहयालूनां सुधियां मानसेऽस्फुरत्।
शुभोदर्कः प्रकाशार्कश्चिराय जयसिद्धिदः ॥५॥

□

लवण-सत्याग्रहः

मया सोऽन्नमत्ति यो विपश्यति यः प्राणति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धेयं ते वदामि ॥

(अथर्व० ४।३०।४)

विगतकरमबाधं मुक्तहस्तैरगाधं,
प्रकृतिरतिदयालू राति वायुञ्च नीरम् ।
सकल-मनुजभोज्यं दीन-हीन-प्रयोज्यं,
लवणमपि करात्तन्मुक्तमास्तां तथैव ॥१॥

१९३० ई० वत्सरस्य प्रवृत्तिसमकालमेव देशे वस्तु-मूल्यानां मन्दता व्यापकं नैष्कर्म्यं च मुखं व्यादाय कर्मकरान् कृषकान् व्यापारिणः पीडयितुं भक्षितुं वाऽवाञ्छत् । आर्थिकी दशाऽतितरां शोचनीयतामगच्छत् । अन्यतश्चाङ्ग्लशासनं श्रीगान्धिनो न्यूनतमा अप्यधियाचनाः स्वीकर्तुं नैच्छत् । किमपि सार्थकं चरणोत्थापनमनिवार्यं कार्यमभवत् । यदि काङ्ग्रेसः किमपि नाकरिष्यत्तदा देशस्य नेतृत्वं तस्य हस्तान्निरसरिष्यत् ।

फरवरीमासस्यैकादशे दिवसे काङ्ग्रेस-कार्यकारिण्या सविनयावज्ञान्दोलनारम्भाधिकारः श्रीगान्धिमहात्मभ्यः प्रदत्तः । पूर्वं तु तैर्बहुशः प्रयतितं यत् केनापि प्रकारेणान्दोलनावश्यकता नश्येत् । तदर्थं भारतस्य प्रधानाङ्ग्लशासकादपि काङ्क्षितं यत् स काङ्ग्रेसस्य न्यायोचिता अधियाचना मानयेत्, परं यदा साफल्यं नाधिगतं तदा श्रीगान्धिनो लवण-नियम-खण्डनेन सत्याग्रहारम्भं निरणैषुः । लवणं सर्वेभ्योऽत्यावश्यकमासीत् तस्मिश्चैकाधिकारः सर्वानपि प्रभावयति स्म । तेषां तर्क आसीत्—

"पानीयाद् ऋते लवणमेवेदृग् वस्त्वस्ति यस्मिन् कराधानेन सर्वकारः सत्वरमेव लक्षशः क्षुधितान् रुग्णान् विकलाङ्गान् सर्वथा निःसहायाञ्जनान् यावदुपगन्तुं शक्नोति । मानव-मस्तिष्कमितोऽधिकस्यामानुषिकस्य करस्य कल्पनामपि कर्तुं नाशक्नोत् ।"

१९३० ई० वर्षे मार्चमासस्य द्वादशे दिनाङ्के श्रीगान्धिन एकोनाशीतिसङ्ख्यकान् सहयायिनो नीत्वा स्वस्याः सुप्रसिद्धाया **'दाण्डी-यात्रा'** याः शुभारम्भमकुर्वन् । साबरमत्याश्रमतो (३२२ की० मी०) दूरे समुद्रस्य तटे 'दाण्डी' नामा ग्राम आसीत् । अहमदाबादस्य काङ्ग्रेसोपवेशने सम्मिलितुं गतेषु प्रतिनिधिषु केचन तस्यां सत्याग्रह-यात्रायामपि संयुज्य कियति दूरे गतवन्तस्तेषु श्रीराजेन्द्रप्रसादोऽपि जम्बुसर-ग्रामं गत्वा श्रीगान्धिनो मिलित्वा समुचितं परामर्शं च विधाय प्रत्यावृतः ।

बिहार-प्रदेशे योजनेयं साफल्यमवाप्स्यति न वेति श्रीराजेन्द्रप्रसादस्तस्मिन् शङ्कित आसीद् यतः प्रदेशस्यास्योत्तरभागे केवलं कतिषुचित्स्थानेष्वेव मृत्तिकातः क्षारनिर्माणं कुर्वन्त उपोत्पादनरूपेण लवणं निर्मान्ति स्म। अत एव तेन श्रीगान्धिनो बिहारे **'परिचरशुल्क'**दानं निरुध्य सत्याग्रहारम्भार्थमादेष्टुं प्रार्थिता आसन्, यतः शुल्कमिदं सर्वैर्देयमभूत् तथा जनेषु तद्विरुद्धमसन्तोषोऽप्यासीत् परं श्रीगान्धिभिस्तदर्थं नानुमतम्। पूर्वं लवणनियम-त्रोटन एवासीत् तेषामाग्रहः।

भारतस्य प्रतिभागं सत्याग्रहस्य व्यवस्था विधीयते स्म। बिहारप्रान्ते श्रीराजेन्द्रप्रसादस्यानुरोधाद् श्रीजवाहरलालनेहरूः सारन-चम्पारन-मुजफ्फरपुराणां जनपदेषु भ्रान्त्वा भाषणैश्च जननुदसाहयत्। तदानीं **'सर्चलाइट'** पत्रे लिखितमभूत्—

आशा नवीनाः पुलकैः प्रसक्ताः सम्प्रेरका नूत्नतमास्तरङ्गाः।
आदर्शरक्षा-बलिदानभावा मुदा स्फुरन्तो मनुजेषु दृष्टाः॥२॥
सर्वेऽपि सत्याग्रह-सङ्गराय, विदेशजानामवमाननाय।
सर्वस्वमप्यर्पयितुं सुसज्जा, आसन् स्वदेशाय जनाः समस्ताः॥३॥

शीघ्रमेव बिहारस्य विभिन्नेषु भागेषु सत्याग्रहारम्भोऽक्रियत। चम्पारन-सारनयोरेतस्य स्थानं प्रथममभूत्। श्रीराजेन्द्रप्रसादः सत्याग्रहस्य सन्देशं प्रसारयितुमेकस्मात् स्थानादन्यस्थानं यावदभ्रमत्। बिहारप्रदेश-काङ्ग्रेससमितेः सभापतिरूपेण तदर्थं तेनावश्यका निर्देशाः पूर्वमेव प्रहिता आसन्।

'क्रियन्तां वा म्रियन्ताम्' इत्यस्मादादर्शात् प्रेरिताः सत्याग्रहिणः स्वयं सेवका वीरतापूर्णेन दृढनिश्चयेन तथा साहसेन रक्षासैनिकानां क्रूराया हिंसायाः समक्षं लवणसम्बन्धिनियमस्य त्रोटनाय सत्याग्रहं यथावच्चालयितुं प्रवृत्ता एवासन्। १९३० ई० वर्षेऽप्रैलमासस्य षोडशे दिनाङ्के प्रातर्नववादनकाले पटनानगरस्य मङ्गलतडागस्य क्रोशत्रयदूरवर्तिनि **'नरवास-तडाग'**स्थाने गन्तुं निश्चित्य यूथरूपेण स्वयंसेवकाः काङ्ग्रेस-कार्यालयात् सत्याग्रहिणः प्रातिष्ठन्। आरक्षिणामत्याचारैर्मनागपि न विचलिताः सन्तस्ते मुख्ये मार्गे चतुष्पदे स्थिताः। तेषु प्रथमस्य समूहस्य निग्रहणानन्तरं द्वितीयः समूह उपस्थितः स चापि सुलतानगंजस्यारक्षिकार्यालयस्य निकटं निरुद्धः। परं ते स्थानात्तस्मात् क्वापि न गता अपि तु तत्रैव समस्तायामपि निशि स्थित्वा ग्रामीणैः प्रदत्तमशनं भुक्त्वा मार्ग एव शयिताः।

स्थितेरस्याः समाचारं लब्ध्वा श्रीराजेन्द्रप्रसादः सत्वरमेव तत्रागतस्तथा स्वयंसेवकानां वैकल्यं दृष्ट्वाऽतितरां खिन्नोऽभूत्। प्रातः सर्वान् स्वयंसेवकान् समबोधयदहिंसकरूपेणैव सत्याग्रहं कर्तुम् तत्रैवैका सभाप्यायोजिता यस्यां श्रीराजेन्द्रप्रसादस्याध्यक्षतायामाचार्यः कृपलानी प्रो० अब्दुलबारी मथुराप्रसादश्च भाषणान्यकार्षुः। अन्ते श्रीमता राजेन्द्रप्रसादेन भाषमाणेनोक्तम्—

"सत्याग्रहिणः कठिनेभ्यः कठिनतमानि कष्टान्यनुभूयापि सत्यात् पथो विचलिता न भवेयुः, भीषणान्युत्तेजकानि दृश्यानि विलोक्यापि संयमेन शान्त्याऽहिंसकवृत्त्या च तिष्ठेयुः, मातृभुवं प्रति तान् विश्वासघातिनो जानीयुर्ये प्रस्तरेष्टकादिक्षेपणायाथवा तादृशायैव कस्मैचिदन्यस्मै मन्तव उत्प्रेरयेयुः।"

अनेन सर्वेऽप्यत्यन्तं प्रभाविताः। मण्डलस्य न्यायाधीशस्तु श्रीराजेन्द्रप्रसादमाहूयाकथयद्—'यद् भवान् यदि स्वयंसेवकान् प्रत्यावर्तयेत् तदाऽहं सकलमपि प्रकरणं निराकरिष्यामि।' तदा श्रीराजेन्द्रप्रसादेनोक्तं—पूर्वं किमप्यौचित्यं विना निष्कारणं शान्ता निरायुधाः स्वयंसेवकास्ताडिताः। मत्कृत ईदृग् निर्देशदानं नास्ति सम्भवम्। इत्थं परस्परं नैकवारं वार्तालापाः प्रावर्तन्त। अधिकारिणो वाञ्छन्ति स्म यदिमे सत्याग्रहिण आरक्षिणां दोषानविगणय्य लक्ष्यं परित्यजेयुः। परं राष्ट्रनेतारः श्रीराजेन्द्रप्रसाद आचार्यकृपलानी-प्रो०अब्दुलबारी-प्रभृतयस्तदर्थं नान्वमन्यन्त। १९अप्रैलदिनं यावत् क्रमशः सत्याग्रहिणः स्वीयं दलं नीत्वा निग्रहं प्राप्ताः।

सत्याग्रहकारिणां निरोधाय ये रक्षासैनिका नियुक्ता आसंस्ते बलूचिस्तानस्य यवना आसन्, नायकौ च द्वावाङ्ग्लपुरुषौ। अतः सत्याग्रहमेकं धर्मयुद्धं मानयता श्रीराजेन्द्रप्रसादेन मुस्लिमानां ख्रीस्तानामुत्तमं शुक्रवासरं (गुड्फ्रायडे) पर्वाभिलक्ष्य तद्दिने विरामो घोषितः। रविवासरे यदा सत्याग्रहिणश्चलसमारोहेण लक्ष्यं पूरयितुमग्रे वर्धन्ते स्म तदातीव नृशंसतयाऽमानुषिकेणात्याचारेणाश्वारोहिणो निर्दयंस्ताडयन्तो मुष्टिका-यष्टिका-प्रहारैः पीडयन्तस्तथाऽश्वानां खुरैर्जर्जरयन्तो भीषणमाक्रमणमकार्षुः। प्रो० अब्दुलबारी-कृपलानी-राजेन्द्रप्रसाद-बदरीनाथवर्म-प्रभृतीनपि मार्गे चलतो वीक्ष्य दण्डाघातैरताडयन्। घोटकानां सङ्घट्टनेनापीडयन् रक्षाकर्मकराः।

दृष्ट्वा भीषणदुर्नयं खरतरोत्पातं वृथोत्पीडनं,
क्रूरं कर्म नृशंसतायुतमिदं सत्याग्रहान्दोलने।
सर्वे हन्त ! नितान्तदुःखितहृदः शान्ताः स्वयंसेवका,
अब्रूत्वा किमपीह सत्यपथिकादर्शं पुरोऽस्थापयन् ॥४॥

आरक्षिणामत्याचारपूर्णानि कर्म्माणि सत्याग्रहिणां मनोबलं शातयितुं समर्थानि नाभूवन्। जनतायाः स्वयंसेवकानाञ्चोत्साहा उत्तरोत्तरमवीवृधन्। सर्वेषामपि धर्माणामनुयायिन एकीभूय २२ अप्रैलदिने विशालायां सभायां विरोधं प्राचीकटन्। कुकर्म्मणां निन्दा अचीकरन्। एकत्वमिदमवलोक्य भीतैरधिकारिभिरश्ववाराः परावर्तिताः। ततः परं स्वयंसेवकदलं निर्विरोधं नरवासतडागं गतं तत्र च शान्त्या लवणनिर्माणमकरोत्।

सत्याग्रहिणः प्रति कृता अत्याचारा दमनकर्माणि कठोराणि वर्तनानि नितान्तं निन्दनीयान्यभवन्। भूयांसो देशभक्ता—ये सामाजिक्या प्रतिष्ठया मण्डिताः प्रीतिभाजनानि चावर्तन्त ते—कारासु निवेशिताः। केन्द्रस्थलेषु सत्याग्रहाय सन्नद्धानां भोजन-प्रसाधनोपयोगीनि वस्तूनि भ्रंशितानि। सर्वत्रैषैव स्थितिरासीदत एव श्रीविट्ठलभाईपटेलमहोदयेन विधानसभाया अध्यक्षपदात् त्यागपत्रं दत्तम्। तेन महानुभावेन महाशासकाय पत्रमप्येकं लिखितं यत् "सत्याग्रहे सहस्रशो जनाः प्राणानां विसर्जनाय तथा लक्षशो जनाः कारासु गन्तुं प्रस्तुताः सन्ति।"

श्रीराजेन्द्रप्रसादेन स्वयं तु लवण-निर्माणं न कृतं किन्तु मण्डलेषु भ्रामं भ्रामं कार्यकलापान् दर्शं दर्शं व्याख्यानानि वितरं वितरं सत्याग्रहिणः प्रोत्साहं प्रोत्साहं बिहार-प्रदेशे प्रवृत्तस्यान्दोलनस्य नेतृत्वमाचरितम्। लवणनिर्मितेः प्रतिभागं प्रतिस्पर्धैवावर्तत। श्रीराजेन्द्रप्रसादो यत्र कुत्राप्यगच्छत् तत्र सत्याग्रहिभिर्निर्मितं लवणं विक्रीय तल्लाभात्तेषां व्ययव्यवस्थामपि समपादयत्। यतः —

ये नाम वीक्ष्य विपदं स्वपथं त्यजन्ति,
भीतास्तथाविधसृतौ न पुरो व्रजन्ति।
किंवा प्रपीडनमवाप्य वसन्ति मौनं,
किं ते कदापि निजलक्ष्यमवाप्नुवन्ति ? ॥५॥

शवः प्रवाहे पतितस्तु शीघ्रं, धाराप्रवाहेण समं प्रयाति।
सचेतनः किन्तु, विभिद्य धारां, लक्ष्याप्तये सम्मुखमेव याति ॥६॥

* * *

बहिष्कृतीनां प्रबलः प्रसारः

उद्धर्षन्तां मघवन् वाजिनान्युद् वीराणां जयतामेतु घोषः।
पृथग्घोषा उलुलयः यतुमन्त उदीरताम्।
देवा इन्द्रज्येष्ठा मरुतो यन्तु सेनया॥

(अथर्व० का० ३, सू० १९, मं० ६)

दुःशासकानां कुटिलक्रियाणां, स्वाभीष्टतन्त्र-प्रतिचालकानाम्।
प्रपीडकानां प्रशमाय नूनमाज्ञाऽवहेलाऽस्ति महानुपायः॥
देशस्य सर्वेऽपि निवासिनः स्युः, शीघ्रं स्वतन्त्रा व्यसनैर्विहीनाः।
तदर्थमार्यैर्विहितः स्वदेशे बहिष्कृतीनां प्रबलः प्रसारः॥१॥

देशे प्रचलितं सत्याग्रहं वर्धमानं विज्ञाय शासनेन श्रीगान्धिनो निगृह्य **'यरवदा'** कारायां स्थापिताः। घटनयाऽनया सर्वत्र रोषः प्रासरत्। प्रतिकोणं कर्मविरोधा व्यापारादि-निरोधाश्चाभूवन्। श्रीराजेन्द्रप्रसादेनातीवावेशपूर्णानि भाषणानि वितरितानि। जनानामुत्साहो नितरामैधत।

प्रान्तस्यान्यनेतृभिः सह परामृश्य श्रीराजेन्द्रप्रसादेन जूनमासं यावदेव लवण-सत्याग्रह-प्रवर्तनं भवेत्, ततः परं च वर्षाकाले लवण-निर्माणमसम्भवमिति विचार्य 'विदेशिवस्त्र-बहिष्कारस्य तथा मद्य-निषेधस्य' कार्यक्रमं प्रवर्तयितुं किञ्च 'परिचर्यायाः शुल्कदान-निषेधाय' जना उद्बोधिताः। एकामेतद्विषयिणीं विज्ञप्तिं प्रकटय्य १९ मई दिवसात् कार्यारम्भाय तथा मदिराविपणीषु समूहशो विरोधार्थमुपस्थातुमपि कार्यकर्तार आदिष्टाः। बहिष्कारस्य प्रचारो ऽत एव पूर्णरूपेण सफलोऽभूत्। आपणिका अतीवोत्साहेन सहयोगमदुः। व्यापारिभिः स्वीये सङ्ग्रहे स्थापितानि विदेशिवस्त्राणि सङ्गृह्य निबद्धानि तथा तेषु स्व-स्वपरिसरे वर्तमानानां काङ्ग्रेससमितीनां मुद्रा अपि मुद्रापिताः।

न केवलं ह्यापणिका एवापि तु महिला अप्यस्मिन् बहिष्कारान्दोलने समवेता आसन् ताभिरान्दोलनस्य साफल्याय विदेशनिर्मितानां वाससां धारणं परित्यक्तं तथा मादकद्रव्याणां विक्रयकेन्द्रेषु विरोधाय सम्भूय सत्याग्रहोऽपिकृतः। पटनायां श्रीमती हसन इमाम-महाभागाया नेत्रीत्वे भूयस्यो

महिला आपणेषु गत्वा वैदेश्यवस्त्राणां क्रय-परित्यागाय जनानन्वरुन्धन्। तासु विन्ध्यवासिनीदेवी महतोत्साहेन कार्यक्रमाणां सञ्चालनमकार्षीत्।

महिलाः पुरुषाश्च सम्मतं, यदि कुर्युः कमपीह निश्चयम्।
स हि नात्र कथं भवेत् पुनः, सफलः सर्वहितावहः शुभः ॥२॥

सत्याग्रह-दिवसेषु भागलपुरमण्डलस्य बिहपुरनाम्नि स्थाने मानवीय-भावनानां प्रतिष्ठाया जीवनस्य च विचारमकृत्वैव स्वयंसेवकास्ताडिताः, पताका बलाद् गृहीत्वा दग्धास्तथा काङ्ग्रेससमितेः कार्यालय आक्रमणं विधाय स स्वाधिकारे नीतः। आङ्ग्लाधिकारिणो नेतृत्वे कृतानामत्याचाराणां दुःखगाथां समाकर्ण्य श्रीराजेन्द्रप्रसादस्तत्र सत्वरं गतो विरोधसभैकाऽऽयोजिता च यस्यां प्रायोविंशतिसहस्रसङ्ख्यका जना एकीभूता आसन्, अनेके बिहारप्रदेशस्य देशभक्ताः कार्यकर्तारो विधानसभाया भूतपूर्वसदस्याश्च सभां समबोधयन्। सभासमाप्तौ स्व-स्वस्थानं गच्छतां जनानामुपरि रक्षा-सैनिकैराक्रम्य यष्टिप्रहाराः कृताः। तस्मिन्नाक्रमणे श्रीराजेन्द्रप्रसादोऽप्याहतः। प्रो॰ अब्दुलबारी तु भीषणेन प्रहारेणातीवाहतोऽभूत्। निग्रहा अप्यभूवन्। शासकानां निर्ममस्यात्याचारस्य नीत्या सत्याग्रहाय दमनापेक्षया ततोऽप्यधिका शक्तिः प्रदत्ता। मुख्यतया श्रीराजेन्द्रप्रसादे तथा तस्य दले वर्तमानानां जनानामुपरि विहिताक्रमणेन बीहपुरवासिनां भागलपुर-क्षेत्रस्थानां च जनेषु महती स्फूर्तिस्तथा दृढता वृद्धिं गता।

दमनेन शान्तेः स्थाने क्रान्तिरेवावर्धत। अनेकैर्नेतृभिर्विधानसभायाः सदस्यता परित्यक्ता। केचन परिचराः, पञ्चायताध्यक्षास्तथा कर्मचारिणोऽपि विरोधाय त्यागपत्राण्यदुः। शासनेन श्रीराजेन्द्र प्रसादस्य निग्रहे पूर्णतया सावधानता वर्तिता। तेनाधिकारिणः सूचिता यत् ते विना पूर्वसूचनां निग्रहं न कुर्युः। प्रान्ते स्वच्छन्दं विचरतः सत्याग्रहिणः सम्प्रेरयतः सत्याहिंसाधर्मान् बोधयतः श्रीराजेन्द्रप्रसादस्य वन्दीकरणविषये जनरवस्तु बहुशः प्रसृतोऽभूदेव। यदा छपरायां तदीयं भ्रमणं प्रचलतिस्म तदा जुलाईमासस्य पञ्चमे दिनाङ्के **'गड़खा'**ग्रामं गच्छन् मार्ग एव वन्दीकृतः ततः स पारिवारिकान् स्वग्रामे सम्मेल्य छपरानगरस्य कारायां नीतः। तत्रत्यैः प्रायश्चतुःशतमितैः कारा-वासिभिर्महताऽऽटोपेन स्वागतमाचरितम्। कारागाराद् बहिरपि सहस्रशो जना एकीभूतास्तानपि पराकर्तुं वायौ गुटिकास्फोटाः कृताः। अभियोगा-देशानन्तरं स्वपक्षे किमपि न कथनेन तस्मै मासषट्कस्य कारावासः श्रावितः कालान्तरेण च **'हजारीबाग'**स्थे कारावासे प्रेषितः। श्रीराजेन्द्रप्रसादस्य कारावाससूचना आरण्यकवह्निनरिव सत्वरं सर्वत्र प्रसृता। प्रदेशे जनेषु महानाक्रोशो व्याप्तः। बहिष्कारान्दोलनं तेन दृढतां प्राप्तम्। आन्दोलनस्य

नेतृत्वं श्रीराजेन्द्रप्रसादस्य पूर्व-परामर्शानुसारं भागलपुरवासिना श्रीदीप-नारायणसिंहेन स्वहस्ते नीतम्। देशस्य सर्वेषु भागेषु राष्ट्रियोऽसन्तोषः परमेण वेगेन वर्धमान आसीत्। १९३० ई० वर्षस्य जूनमासे प्रकाशितेन भारतीय-वैधानिक-मण्डलस्य प्रतिवेदनेनापि तस्मिन् न्यूनत्वं नागतम्। विभिन्न-विचारवन्तो भारतीया नेतारस्तस्य सम्मतीः प्रतिक्रियावादिनीस्तथाऽसन्तोष-जनिका अमन्यन्त। ईदृशीं गभीरां स्थितिं वीक्ष्य महाप्रशासकेन सर्वपक्ष-सम्मेलनस्य प्रस्ताव आगामिन्यक्टूबरमासे लन्दननगरे विधातुं प्रस्तुतः। एम० आर० जयकर-तेजबहादुर-सप्रूसदृशानां नेतृणां माध्यमेन च प्रयासोऽयं विहितो यत् काङ्ग्रेसनेतृभिः सह वार्ता विधाय सन्धेर्मध्यमार्गः कश्चन निः-सार्येतेति। एतदर्थं श्रीमोतीलाल-जवाहरलालनेहरूमहोदयौ श्रीगान्धिनां सविधे नैनीकारातो यरवदाकारायामपि प्रेषितौ। अगस्तमासे दिनत्रयं यावज्जयकरः सप्रू महाभागश्च काङ्ग्रेस-नेतृभिः सह सम्मिलितरूपेणापि मिलितवन्तौ किन्तु किमपि समाधानं न जातम्।

बिहारस्यानेके राष्ट्रिया नेतारो हजारीबागस्थायां कारायां निगृहीता अभूवन्। तत्रत्यः काराधिकारी श्रीराजेन्द्रप्रसादं परिचिनोति स्म, यदा स विद्यालये पठति स्म, तदा तस्य ज्येष्ठा भ्रातरः? श्रीराजेन्द्र-प्रसादस्यावासव्यवस्था कारागारे स्थितानां रामदयालुसिंह-श्रीकृष्ण-सिन्हा-बिपिनबिहारी-वर्म-दीपनारायणसिन्हादिमित्रैः साकमेव साधिता। इत्थम्—

प्रशस्तकार्यसाधका असत्यमार्गबाधकाः,
स्वदेश-वासिनां सदा हितं विधातुमुत्सुकाः।
सदाग्रहं मुदा तु ये स्वतन्त्रताप्तये व्यधु-
र्विदेशिशासकैश्च ते स्वचारकेषु पातिताः॥३॥

☐

कारायां सत्य-साधनम्

ये अमृतं बिभृथो ये हवींषि ये स्रोत्या बिभृथो ये मनुष्यान्।
द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमंहसः॥
(अथर्व० का० ४, सू० २६, मं०४)

ये त्याग-वैराग्य-विवेक-युक्ता, ये राग-विद्वेष-विपाकमुक्ताः।
ये शान्तिनिष्ठाः शुचिमानसास्ते, सत्याय सर्वस्वमिहार्पयन्ति ॥१॥
ये वै सत्यस्य संसिद्ध्यै, यतन्ते स्म बहिः स्थिताः।
तैरेवाक्रियतैकान्ते, कारायां सत्य-साधनम् ॥२॥

राष्ट्रे ज्ञानतेजसो वर्धनं तथा तेन राष्ट्रस्य समुन्नतेः कार्यमत्यावश्यकं भवति। राष्ट्रस्य ज्ञानतेज एव स्वप्रतापाद् दुःशासकानां वारणे समर्थं सदभ्युदयाय राष्ट्रवासिनः प्रेरयति। तान्येव राष्ट्राणि जगत्यग्रगण्यानि भवन्ति यानि ज्ञानतेजसा सम्पन्नानि भूत्वाऽज्ञानबन्धनैर्मुच्यन्ते। राष्ट्रवासिनामिदं कर्तव्यं विद्यते यत् ते राष्ट्रस्य ज्ञानं वीर्यं बलं पराक्रमं शौर्यं धैर्यमुत्साहं च वर्धयितुं नितान्तमनुरक्ता भवेयुः।

श्रीराजेन्द्रप्रसादे राष्ट्रानुरक्तिः प्रतिरोम विराजमानाऽऽसीत्। अत एव स यदा कारायां मित्रैः सह निगृहीतोऽभूत् तदापि जीवनमुन्नमयितुं प्रायतत। **'स्वामी भवानीदयाल'** नामा दक्षिणाफ्रिकास्थः सन्यासी स्वातन्त्र्य-सत्याग्रही तत्र कारागारे यदा मिलितस्तदा स्वीयोऽधिकतरः समयोऽध्ययने चक्रयन्त्रप्रचालने च स व्यत्यापयत्। कियच्चिद्दिनानन्तरं काराधिपस्याज्ञया तेन तत्रत्ये कार्यालये वयन-कर्मापि शिक्षितम्। कारावासे समागतैरन्यैर्देशभक्तैः सह मेलनेऽपि काठिन्यं नाभूत्। बन्दीगृहाधिकारिण आदेशं प्राप्य प्रायस्सोऽन्येषु प्रकोष्ठेषु गच्छति स्म। तत्र वसता तेन श्रीगान्धिनां लेखानामेकः सङ्ग्रहः पुस्तकरूपेण सङ्कलितस्तदीया भूमिकाऽपि रचिता। तत्पुस्तकं मद्रासस्य 'नटेशन् एण्ड कम्पनी'तः प्रकाशितम्। ततः परं तेषामेव लेखानां द्वितीयः सङ्ग्रहोपि सज्जीकृतो यस्मिन्—**'अहिंसा-स्वराज्य-सत्याग्रह-शिक्षा-खादी'**-प्रभृतीनि विभिन्नानि शीर्षकाण्यभूवँस्तथा तेषु प्रत्येकं लेखस्य भिन्न-भिन्नाः संक्षिप्ता भूमिका अप्यवर्तन्त। दैवात् तत्पुस्तकं न प्रकाशितं यतो हि यदाऽऽरक्षिभिः सदाकत-आश्रमे बलादधिकारः १९३२ ई० वर्षे कृतस्तदा तैरपहृतम्।

श्रीराजेन्द्रप्रसादः स्वशब्देषु—"श्रीगान्धिनामान्दोलनं न केवलं राष्ट्रियः सङ्घर्ष एवासीदपि तु तदेकप्रकारकं धार्मिकं पुनरुत्थानममंस्त।"

बन्दीगृहे स स्वल्पकालं यावद् धार्मिकानां ग्रन्थानामध्ययनेऽपि मनो न्यधात्। छपरावासिनौ **पण्डित-भरतमिश्र-पण्डित-विष्णुदत्तशुक्लौ** तं तत्सुहृदश्च रामायणप्रभृतिधर्मग्रन्थान् पठित्वाऽश्रावयताम्। स प्रथमवारं मुख्यानामुपनिषदामध्ययनं तत्राकरोत्। निवारणचन्द्रदासगुप्तेन सह स पातञ्जलयोगसूत्रमप्यध्यगीष्ट, परं समयाभावात् स्वामिनः श्रीसहजानन्दस्य गीतोपदेशान् श्रोतुं नापारयत्। आसीदयं सत्यसाधनाया एवैकः प्रकारः।

कारागृहं वसन्तोऽन्येपि स्वातन्त्र्य-वन्दिनः स्व-स्वाभिरुचीनां प्रसादनाय साहित्यिकानि कार्याण्यकुर्वन्। यथा कैश्चन **'क़ैदी'** नाम्ना काचन हस्तलिखिता मासिकपत्रिका सम्पादिता। अन्यैश्च **'कारागार'**नाम्नाऽपरं मासिकं पत्रं प्रकटितम्। पत्रयोः कानिचिच्चित्राणि तथा व्यङ्ग्यचित्राण्यपि भवन्ति स्म यानि गिद्धौर-निवासी कुमारः कालिकासिंहश्चित्रयति स्म। श्रीराजेन्द्रप्रसादस्य सर्वैः सह साम्मनस्यमभूदेव। तस्मादेव तैर्घनिष्ठतामनुभवता तेन लिखितम्—"हजारीबाग-कारागारे यैर्जनैः साकं सम्पर्कोऽभवत्' तेषां स्मृतिमहं सदैव जागरितां निधास्यामि इति।" अत एवेदमुच्यते—

समुचित-मतिमन्तः श्रेष्ठ-कर्म-प्रवृत्ताः,
प्रगतिपथमुपेता राष्ट्रसेवा-प्रसक्ताः।
स्वजन-सुजन-वर्गैः प्राप्त-सौहार्दभावां,
न च खलु निजमैत्रीं सज्जना विस्मरन्ति ॥३॥

* * *

त्यागमूर्तेरसामयिको वियोगः

पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेषसन्दृशो अनवभ्र राधसः।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥

(ऋग्वेद० ५।५७।५)

येषां मनस्तनुधनानि सदैव देश-
स्वातन्त्र्य-सिद्धि-विधये सुसमर्पितानि।
भक्त्या भवन्ति, भुवने ननु ते महान्तो,
धन्या वदान्यचरिता निरतं प्रणम्याः ॥१॥

१९३० ई० वर्षस्यान्ते दिसम्बरमासस्य चतुर्दशे दिवसे श्रीराजेन्द्रप्रसादः कारागाराद् विमुक्तः। तावत्पर्यन्तं स्वच्छन्दमत्याचारेषु प्रतिक्रिया-

त्मकप्रचारेषु सत्स्वपि सविनयमवज्ञायाः प्रगतौ तेजस्विता समागच्छत्। कारातो विमुच्य सत्वरमेव श्रीराजेन्द्रप्रसादः श्रीवल्लभभाईपटेलं साक्षात्कर्तुं मोहमयीनगरीं प्रस्थितः। ततः स श्रीमोतीलालनेहरून् मिलितुमिलाहाबाद-नगरं गतवान्। ते रुग्णतावशात् कारागृहादुन्मोचिता आसँस्तथा कलकत्तायामुपचारं कारयित्वा तत्रागता अभवन्। रुग्णाः सन्तोऽपि ते प्रचलत आन्दोलनस्य नेतृत्वं वाञ्च्छन्ति स्म।

इतः पूर्वं लन्दन नगर्यां सर्वपक्ष-सम्मेलनं (१२ नवम्बर १९३० ई०) सम्पन्नमासीत्। भारतीय-राष्ट्रिय-काङ्ग्रेसस्य कोऽपि प्रतिनिधिस्तत्र भागं नागृह्णात् तथापि तत्स्वकार्यस्य पूर्तिं विनैव १९३१ ई०, १९ जनवरी-दिनेऽनिश्चिताय कालाय स्थगितम्। २१ जनवरीदिने श्रीराजेन्द्रप्रसादस्याध्यक्ष्ये काङ्ग्रेस-कार्यकारिणी-समितेरुपवेशनमेकमिलाहाबादपत्तने सम्पन्नम्। तस्मिन् ब्रिटिशप्रधानामात्यस्य घोषणाविषये सदस्यानामभिमतमिदं प्रकटितं यद्—"इयं घोषणाऽतीवास्पष्टा तथा सामान्याऽस्ति, अत एतदर्थं काङ्ग्रेसः स्वस्यां नीतौ कस्यापि प्रकारस्य परिवर्तनं समुचितं न मनुते।" श्रीराजेन्द्रप्रसादस्य कथनानुसारमग्रिमदिनस्य प्रातःकालं यावत् तस्य प्रस्तावस्य प्रकाशनमवरुद्धम्। परं तस्यामेव रात्रौ मोतीलालनेहरू-महाभागाय वी० एस० श्रीनिवासशास्त्रि-तेजबहादुर-सप्रू-एम० आर० जयकराणामेकः सामुद्रिकस्तडित्सन्देशः प्राप्तो यदस्माकं भारते प्रत्यावर्तनं यावत् प्रस्तावस्य प्रकाशनं स्थगनीयमिति। तदनुसारमेव तथाचरितम्।

संवैधानिक-समस्यानां समाधानाय सन्धेरेकस्मिंश्चरणरूपे भारतस्य महाशासकेन **लार्ड इरविन**महोदयेन श्रीगान्धिनस्तथा काङ्ग्रेसकार्यकारिणी-समितेरन्ये सदस्याः—'ब्रिटिशप्रधानामात्यस्य सर्वपक्ष-सम्मेलन-सम्बद्धे वक्तव्ये विचाराय सुयोगं दातुं' पणं विना कारातो मोचिताः। श्रीमोतीलाल-नेहरूणां स्वास्थ्ये वेगेन प्रवृत्तं ह्रासं विलोक्य श्रीजवाहरलालोऽपि सप्रतिबन्धं मोचितः। श्रीराजेन्द्रप्रसादोऽपीलाहाबादस्थे स्वराज्यभवन एवावसत्। श्रीमोतीलालनेहरूणां स्थितिश्चिन्ताजनिकाऽभवत्, उपचारार्थं ते लखनऊ-नगरं नीयमाना आसंस्तदैव मार्गे तेषां १९३१ ई० वर्षे फरवरीमासस्य षष्ठे दिवसे देहान्तमभूत्। हन्त!

प्रावीण्यं यस्य वाचां व्यलसदविचलं भूतलेऽलं विशालं,
शीलं यस्यात्र कूलं कुलसलिलनिधेर्नाजहान्मूलतश्च।
भक्ती राष्ट्रस्य भव्याऽप्यजनि जनिजुषा यत्समं त्यागमूर्तिः,
'मोतीलालः' सुधीन्द्रः स हि भुवि विबुधाः! कस्य नो वन्दनीयः॥२॥

स्वर्गप्रयाणात् कियतश्चित् कालात् पूर्वं स्वराज्यभवने तैः कथित-मासीत्—

अहं युद्धं करिष्यामि रोगाच्च मरणादपि।
योत्स्यामि दासतारूप-दानवाच्च निरन्तरम् ॥३॥

परं भारत-भाग्यस्य निर्णयोऽत्रैव जायताम्।
ममोपस्थितिकालेऽयं निर्णयोऽथ भवेदिति ॥४॥

मदीय-मातृभूमेस्तु भाग्यनिर्णयकारिणी।
सम्मानपूर्णा या सन्धेर्वार्ताऽन्तिमरूपतः ॥५॥

क्रियेत तस्यां मामपि, कुर्वन्तु सहयोगिनम्।
अहं न मर्तुमिच्छामि देशे स्वे परतन्त्रिते ॥६॥

मरणं यदि मे भवेत् तदा, शरणं भारतमातुरङ्कगम्।
भवतु प्रथितं स्वतन्त्रितं, चिरनिद्राप्रदमुत्तमं क्षितौ ॥७॥

ईदृशस्य प्रतिभा-योग्यता-वाक्चातुर्य-दूरदर्शितादिगुणगणमण्डितस्य महतो देशभक्तस्यासमये वियोगेन सर्वेऽपि देशनेतारः कार्यकर्तारो भारत-वासिनश्च शोकाकुला अभूवन्।

अदात् प्राणाहुतिं यज्ञे स्वातन्त्र्य-प्राप्तिहेतुके।
मोतीलालस्त्यागमूर्तिर्देशभक्तो महान् सुधीः ॥८॥

□

महत्त्वपूर्णः सहयोग-मार्गः

सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम्।
दे॒वा भा॒गं यथा॒ पूर्वे॑ सं जा॑ना॒ना उ॒पास॑ते॥
(ऋग्वेद० १०।१९१।२)

परस्परं द्वेषमुपार्जयन्तः, कदापि शान्तिं न जना लभन्ते।
शुभोऽस्ति शान्त्यै प्रथितः सदैको, महत्त्वपूर्णः सहयोगमार्गः ॥१॥

लन्दनतः सर्वपक्ष-सम्मेलन-प्रतिनिधि-दलमेकं १९३१ ई० वर्षे फरवरी-मासस्य षष्ठे दिन एव बम्बईनगर्यामायातम्। 'तेन स्वीयोऽभिमतः प्रकटितो यत् 'साम्प्रतं भारतस्यौपनिवेशिकस्वराज्यप्राप्तौ नास्ति कोऽपि विवादः।' श्रीनिवासन्शास्त्री श्रीतेजबहादुरसप्रूस्तथा श्री एम० आर जयकर इलाहाबादं गत्वा श्रीगान्धिभिर्मिलिताः। आगृहीतं च तैर्भारतस्य महा-प्रशासकेन सह सन्धिवार्तायै। काङ्ग्रेसस्य कार्यकारिणीसदस्याः—येषु श्रीराजेन्द्रप्रसादोऽप्यासीत्—श्रीगान्धिभिः सह दिल्लीं प्रस्थिताः। तत्र बहु-दिनानि यावन् महाप्रशासकेन (वाइसरायेण) सह वार्ता अचलन्, परिणा-मतश्च मार्चमासस्य पञ्चमे दिवसे लार्ड-इरविनेन सह सम्पन्ने सन्धिपत्रे हस्ताक्षराण्यभूवन्। श्रीगान्धिनां शब्देष्वयमासीत् 'काङ्ग्रेसस्यास्थायी सहयोगमार्ग' इति।

सन्धिमन्त्रणा-फलश्रुतिरूपेण शासनं काङ्ग्रेससमितिषु प्रवर्तितान् प्रतिबन्धानपाकरोत् तथा काङ्ग्रेसकार्यकारिणीसमित्या च तत्कालमेव सत्याग्रह-स्थगनाय निर्देशाः प्रसारिताः। श्रीराजेन्द्रप्रसादेनापि दिल्लीतो दूरभाषेण बिहारप्रान्तीयकाङ्ग्रेससमितेरध्यक्षत्वेन पटनायां मित्राणि सूचितानि। ततः परं नातिचिरात् स्वपुत्रस्य श्रीधनञ्जयस्य विवाहाय जीरादेई-ग्रामं स परावर्तत।

'गान्धीरविन-सन्धेः' श्रीराजेन्द्रप्रसादस्य दृष्टावासीदतीव महत्त्वम्। यतः प्रथमवारं ब्रिटिशशासनं जनतायाः प्रतिनिधिसंस्थया सन्धि-मन्त्रणायै स्व्यकार्षीत्। काङ्ग्रेसाय सर्वपक्षसम्मेलने सहभागित्वस्य मार्गशुद्ध्या जनतायाः प्रतिनिधयस्तदा तेषां जनसुरक्षासाधनानां परीक्षणेऽधिकृता

यानि ब्रिटिशशासनं स्वस्य लाभाय संविधाने संयोजयितुं वाञ्छति स्म तथाऽन्ततः काङ्ग्रेसेन सङ्घराज्यस्य—स्वतन्त्रप्रान्तैः सहैकस्य सुदृढकेन्द्रस्य विचारः स्वीकृतः।

श्रीराजेन्द्रप्रसादोऽनेन सन्धिना सन्तोषमन्वभूत्। बिहारवासिनः सन्धेः सूक्ष्मताः परिबोधयितुं सः प्रमुखेषु नगरेषु जनपदेषु च भ्रमणमप्यकरोत्। किन्तु शासनेन सन्धिवार्तानुरूपं विहितानां निर्णयानां प्रवर्तने शैथिल्यमाचरितम्। ततो बिहारप्रदेशेऽन्यत्र चासन्तोष उत्पन्नः, श्रीगान्धिनश्च शासनेन स्थानीयप्रशासनद्वारा विधीयमानस्य कार्पण्यस्य बिलम्बस्य कारणाज्जायमानेनासन्तोषेण परिचायिताः। सद्भावनाया विपरीतमसन्तोषोदयेन नाना सभासु प्रस्तावाः पारिताः।

कुटिलं हृदयं भुवि धारयतां,
न कदापि मुदाऽपि भवेच्छुचिता।
चिरमेव यतः प्रतितिष्ठति तद्-
वदने मधुरं हृदये च विषम्॥२॥

१९३१ ई० वर्षीये ३१ मार्चदिने लाहोरषड्यन्त्राभियोगस्य निर्णयः श्रावितो यस्मिन् **भगतसिंह-राजगुरु-सुखदेवेभ्यः** पाशमृत्योर्दण्डो घोषितः। सकलस्यापि देशस्याभ्यर्थनानि तिरस्कृत्यैष निर्णयः शासनेन विहित आसीत् ततः सर्वेऽपि भारतीयास्तीक्ष्णेन कोपेन पूरिताः। काङ्ग्रेसेनापि पूर्णस्वराज्यस्य ध्येयं यथावत् संरक्ष्य सन्धेः समर्थनपूर्वकं द्वितीयस्मै सर्वपक्षसम्मेलनाय श्रीगान्धिन एवैके प्रतिनिधित्वाय निर्वाचिताः।

करांची-नगरे सम्पन्नेऽधिवेशने भागं गृहीत्वा श्रीराजेन्द्रप्रसादः परावर्तनकाले लाहौरं जालन्धरं च गतवान् ततश्च 'कांगडी'स्थितस्य गुरुकुलस्य वार्षिकोत्सवे सम्मिलितः। पटनायामागत्य सभासु करांच्यधिवेशने स्वीकृतानां प्रस्तावानां सूक्ष्मान् विमर्शानुपस्थाप्य साम्प्रदायिकशान्तये दुष्प्रचारेष्वविश्वासाय धार्मिकेषु कृत्येषु मिथोऽविरोधाय सद्भावानां विकासाय च जनान् निवेदितवान्।

ततः परं राजनीतिक-बन्दीनां मुक्तये सर्वकारेण साकं पत्रव्यवहारान् विधाय स्वयं च प्रधानाधिकारिभिर्मिलित्वा स्थितेः स्पष्टतां कर्तव्यस्यावश्यकतामपि समबोधयत्। कारातो मुक्ताः काङ्ग्रेस-नेतारः स्वयंसेवकाश्च रचनात्मकेषु कार्येषु संलग्नाः सन्तो राष्ट्रैक्याय प्रायतन्त। शासनस्य दुर्नीत्या पीडितानां पीड्यमानानां च कार्यकर्तॄणां प्रोत्साहनाय बगहा-पिपरिया-बेतियासुगौली-ढाका-मोतीहारी-प्रभृतीनां चम्पारन-मण्डलस्य ग्रामाणां भ्रमणं विहितम्। यत्र दुरात्मभिरारक्षिभिस्तथा सैनिकैर्निर्दयं जनताया लुण्टनं

ताडनं प्रहरणं च कुर्वद्भिरत्याचरितमासीत् तत्रापि ग्रामेषु भ्रान्त्वा जनाः शान्तये प्रबोधिताः। कथितञ्च तेन--

विचाराणां भेदा बहुषु मनुजेषु प्रतिदिनं,
भवन्त्येव प्रायो विविधमतिमत्सु स्थिरधिया।
मिथस्तैर्बोद्धव्यं परमिह न योद्धव्यमनिशं,
मनोभेदो मा स्तादिति च दृढमास्थेयमधुना ॥३॥

'किञ्चोत्तेजनानामवसरेऽपि निरन्तरं सौमनस्येन वर्तनमेव समुचितः पन्थाः। आवेशं विना भारतस्य स्वतन्त्रताप्राप्तये विधीयमानाः प्रयासा एव साफल्यं प्रदास्यन्ति गौराङ्गाश्च भारतभुवं त्यक्त्वा पलायिष्यन्ते। राष्ट्रियान्दोलनस्य पक्षाणां वैविध्यं समीक्षणीयं तथा चास्माभिर्वर्तितव्यं येनास्मान् लोका न निन्देयुः।' इत्थं नगरेषु ग्रामेषु ग्रामटिकासु प्रत्यहं भ्रान्त्वा श्रीराजेन्द्रप्रसादेन कर्तव्यपालनाय सन्धेः पणानां रक्षणाय च जनताऽनुरुद्धा।

कृतज्ञता नाम मानवस्यैको महान् गुणः। कृतघ्नाः सर्वदा सर्वथा निन्द्या भवन्ति। भारतीयेष्वाचारेषु महत् स्थानं प्राप्तवन्तमिमं गुणं सार्थयद्भिर्देशवासिभिः श्रीराजेन्द्रप्रसादस्य सेवा-समर्पण-श्रम-सहयोगादीन् प्रति कृतज्ञता-प्रकाशनाय बहुत्र स्वागतसमारोहा आयोजिता अभिनन्दन-पत्राणि च समर्पितानि तेषु मानभूमजनपदस्य 'आद्रा-रघुनाथपुर-पुरुलिया'-प्रभृतीनां ग्रामाणां निवासिनो विशिष्य स्मरणीयाः सन्ति।

शासकानामत्याचारैः खिन्नानां सान्त्वनाय बम्भ्रम्यमाणः श्रीराजेन्द्र-प्रसादः सर्वत्र सभ्यानेवं न्यवेदीत् —

यावत् पूर्णं स्वराज्यं मिलति नहि जनास्तावदस्माभिरारा-
दादेशाः श्रीगान्धि-दत्ताः परमदृढतया सर्वथा पालनीयाः।
आक्रान्तारो विदध्युः किमपि घृणितं कर्म किन्त्वन्यथा नो,
कर्तव्यं सत्यभक्तैरिति मनसि सदा धारणीयं सयत्नम् ॥४॥

सत्याग्रही शान्तमना, अहिंसा-व्रत-पालकः।
सुखदुःखे समे कृत्वा, वर्धेताग्रे निरन्तरम् ॥५॥

स्वतन्त्रतान्दोलने वीरतापूर्णं सहयोगं ददतां बलिदानं च कुर्वतां जनानां कार्यकर्तॄणां भूरि-भूरि शंसनानि कुर्वन् श्रीराजेन्द्रप्रसादः 'सुपील-बिहपुर-सोनबरसा-भागलपुर-सबौर-नाथनगर - रजांव-बांका - सुल्तानगंजा-मरपुर-बलहर-पँजवारा-कोल-गांग-प्रभृतिषु ग्रामेषु जनतां समबोधयत्। गयाजनपदस्य जहानाबाद-नाम्न्युपमण्डले राजनीतिकसम्मेलने समुपस्थाय

तेन राष्ट्रस्य स्वातन्त्र्याय विधीयमानानां प्रयासानां भूमिकाः प्रस्तूय कथितम्—

"भारतस्याहिंसकः सत्याग्रहोऽयं निखिलाय संसारायैक आदर्शोऽस्ति। अन्ये देशा अतीवौत्सुक्येन भारतीयान् प्रति पश्यन्ति यदिमे निःशस्त्रा जनाः कथमियत्या महत्या शक्त्या सङ्घर्षं कुर्वन्ति ? किञ्च यदि साफल्यमेते प्राप्स्यन्ति तर्हि सत्याग्रहस्य शस्त्रं सम्पूर्णाय जगते प्रयोज्यमुपयोगि च सेत्स्यति।" इति।

श्रीगान्धिनो द्वितीयस्मिन् सर्वपक्षसम्मेलने सम्मिलिताः परं राष्ट्रियया दृष्ट्या तत्र भारतीयसंवैधानिक-समस्यायाः किमपि सन्तोषकं समाधानं नोपात्तम्। गान्धीर्विन-सन्धिः कच्चर-करण्डके पतितः। श्रीगान्धिनो मोहमय्यामागत्य यदा भारतीयानां दमनकथां श्रुतवन्तस्तदाऽतीव व्यथिताः। अन्ते तत्कालिकाद् महाधिशासकाद् '**लार्ड विलिंगडन**'तो मिलितुं श्रीगान्धिभिर्वाञ्छितं परं तेन निषिद्धं तदा भूयोऽपि सविनयावज्ञान्दोलन-प्रवर्तननिर्णयः शासनाय सूचितः।

गौराङ्गशासकास्तद्विषये किमपि कर्तुं नैच्छन्, परं तदपेक्षया सावधाना भूत्वा सकलेऽपि देशे शीघ्रमेव प्रचण्डं देशव्यापि पूर्णसज्जमाक्रान्तृस्वरूपं प्राकटयन्। १९३२ ई० वर्षस्य २४ जनवर्यां श्रीगान्धिनस्तथा श्रीवल्लभभाई पटेला निगृह्य 'यरवदा-केन्द्रीय-कारागारे' स्थापिताः। श्रीगान्धिभिः सह परामृश्य मोहमयीतः परावर्तनसमये श्रीराजेन्द्रप्रसादेन स्वमित्रेभ्यस्तडित्पत्रद्वारा सन्दिष्टं परं तन्मध्य एवावरुद्धं शासकीया अधिकारिणस्तं सन्देशं प्रापकान् यावत्प्रापयितुं नावाञ्छन्। तथापि स पटनायां गमनानन्तरं कानिचिन् मित्राणि संगृह्य सदाकताश्रमे काङ्ग्रेस-कार्यकारिण्या उपवेशनमकरोत्। यदोपवेशनं समाप्तं तदैवारक्ष्यधिकारिभिरागत्य काङ्ग्रेस-संस्था अवैधानिकाः सन्तीति विषये शासकीयां विज्ञप्तिमद्राक्षुः। सदाकत-आश्रमस्य सर्वाऽपि सम्पत् स्वायत्तीकृता। अध्यापकाश्छात्राश्चाश्रमाद् गन्तुं बाधिताः। राष्ट्रियध्वजस्य स्थाने 'यूनियन जैक' उत्तोलितः। तत्रोपस्थितैर्नेतृभिः सहैव श्रीराजेन्द्रप्रसादोऽपि निगृहीतः। पूर्वं बांकीपुरस्य कारायां ततश्च हजारीबागस्थ-कारागारे ते प्रापिताः। अन्यैः सह मिलनस्य निषेधकारणाच्छ्रीराजेन्द्रप्रसादस्तत्र चक्रयन्त्रचालनं तथा हिन्दू-बौद्ध-यवनधर्मा ग्रन्थानां स्वाध्याये सङ्लग्नमानसोऽवसत्।

गौराङ्गकाणां हतनीतिकानां, पदे पदेऽभूत् कुटिला प्रवृत्तिः।
तस्याः प्रशान्त्यै सहयोगमार्गे, श्रितेऽपि नाशाम्यत वैरभावः ॥६॥

येषां मतिर्दारुणकर्मलीना, सदैव तादृक् कृतिषु प्रवीणा।
वसन्ति ते नैव कदापि शान्त्या, किं दुर्जनाः सज्जनतां श्रयन्ते ।।७।।

□

अग्नि-परीक्षाकालः

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ।।
(यजुर्वेद ३४।६)

सत्याग्रह-निरतानां, शम-दम-संयमादि-युत-चित्तानाम् ।
प्रतिशोधं प्रतिरोधं, कर्तुं च समुद्यता आङ्ग्लाः ।।१।।
करतलनिहितप्राणाः, संयान्ति यदा रणे तदा तेभ्यः ।
अग्नि-परीक्षा-कालः, कथमपि जनयति न नैराश्यम् ।।२।।

गौराङ्गाणां गर्वं सत्याग्रहेण खर्वयितुं सर्वेऽपि भारतीयाः पर्व मत्वा सोत्साहं कारायात्रां कुर्वन्ति स्म। बहुधा कृतेऽपि दमने शमनस्य कोऽपि मार्ग एव तैर्न लक्षितस्तदा पुनः स्वस्यां नीतौ परिवर्तनं विधाय प्रतिशोधपर्णां क्रूरतां वर्तयितुमाङ्ग्लशासनेन निश्चितम् । तस्यास्यां नीतौ—"काङ्ग्रेसकार्यकर्तॄणां येषु महिला अपि सम्मिलिता आसन्—निग्रहाः, यष्टिका-प्रहाराः, काङ्ग्रेस-संस्थानामवैधानिकत्वख्यापनं, बलात् काङ्ग्रेस-भावनानां सम्पदाञ्चाधिग्रहणं, दण्ड-माध्यमेनाधिकाधिकं धन-ग्रहणं, वैयक्तिकसम्पत्तेः स्वायत्तीकरणं समाचार-प्रकाशकानां मुखमुद्रणं, कार्यविरोधानां निरोधनं, कठोराणामधिनियमानां प्रवर्तनं तथा जनसमूहे गुटिकानां प्रहरणमित्यादीनि दमनकारीणि वर्तनानि समवेतान्यभूवन् ।"

शीघ्रमेवेदृशास्त्रयोदशाधिनियमाः प्रसारिता येषामतिकठोरत्वं भारतस्य राज्यसचिवेन —**'सर सेमुएल होर'**-महोदयेन तथा **'श्रीचर्चिल'**-महाभागेन स्वयं स्वीकृतम् । तथापि श्रुतमश्रुतं कृत्वा तदाधारेण नैक-स्थलेषु गुटिकास्त्रप्रयोगा आहिताः । मोतीहारी-रोसडा-बेगूसराय-तारा-पुरादिग्रामेषु स्वाधीनतोत्सवे ध्वजसत्याग्रह-दिवसे च समारोहेषु समवेता जना गुटिकास्त्रैर्घातिताः ।

या क्रूरता तैः प्रतिशोधपूर्णा, प्रादर्शि साऽऽसीदतिनिन्दनीया।
न क्षीणधैर्या अभवन् न दीनास्तथाप्यहो ! भारतवासिनोऽत्र ।।३।।

समुपचित-राष्टानुरागैरत्यधिकमाविष्टाः सत्याग्रह-कारिणोऽचलेन प्रत्ययेन सुस्थिरेण सङ्कल्पेन च स्वीयानां प्रत्येकं प्रियवस्तूनां पणं कृत्वा-ऽप्यान्दोलनं प्रवर्तितमेवारक्षन्। यथा नेतृगणा निग्रहं प्राप्तास्तदा तेषां स्थानेऽन्ये कार्यकर्तारः समायाताः। जूनमासे श्रीराजेन्द्रप्रसादः कारातो विमुच्यायातस्तदा तेऽतीव प्रेरणां प्रापन्। श्रीराजेन्द्रप्रसादस्तु शीघ्रमेव वाराणस्यां स्वल्पकालं स्थित्वा श्रीमता मदनमोहनमालवीयेन सह विमृष्टवान्। ततः परं काङ्ग्रेस-कार्यकर्तॄणां साहाय्यार्थं धनं सङ्गृहीतुं मोहमयीं प्रस्थितवान्।

१७ अगस्त १९३२ ई० दिवसे ब्रिटिशप्रधानमन्त्रिणा 'कम्यूनल-एवार्ड' नाम्ना परिपत्रमेकं प्रकाशितं यस्मिन्ननुसूचितानां जातिमतां कृते निर्वाचनस्य पृथग् व्यवस्थाऽऽसीत्। तद्विरोधे श्रीगान्धिभिरामरण-मनशनमारब्धम्। राजनीतिकीषु परिस्थितिषु नवीनाश्चिन्ताया उद्भवेन चिन्तिताः श्रीराजेन्द्रप्रसाद-मदनमोहनमालवीय-राजगोपालाचारी-ठक्कर-बापा-घनश्यामदास - बिड़ला - पुरुषोत्तमदास - ठाकुरदासादयस्तत्कालं श्रीगान्धिनः सविधे यरवदा-कारायां मिलितुं गताः। डॉ० अम्बेडकर-डॉ० सोलंकीप्रभृतिभिरनुसूचितजातीयप्रतिनिधिभिः सह वार्तालापश्च प्रवर्त्तितः। पुण्यपत्तन-सन्धिपत्रे हस्ताक्षराणि जातानि। पश्चवर्गीयाणां स्थानानि द्विगुणितानि। ब्रिटिश-प्रधानमन्त्रिणः सन्धिपत्रकस्वीकृत्यनन्तरं श्रीगान्धिना उपोषणं विसृष्टम्। कवीन्द्रेण रवीन्द्रेणैकया गीत्याऽऽशिषः प्रदत्ताः। तत्रैवैकस्यां सभायां भाषमाणेन तेन भणितम्—"अद्यास्माभिः श्रीमहात्मनां पवित्रे कर्मणि सङ्कल्पपूर्णैः प्रयत्नैः सहयोक्तव्यम्, श्रीगान्धि-महात्मभिर्युगेभ्य आगच्छन्तं भारं दूरयितुं प्रारब्धमस्ति यो भारः किल कस्मिश्चद् विशिष्टे वर्गे जन्मनः संयोगाल्लाञ्छितो विद्यते। सोऽयं भारः स्वदेशवासिनामेकं महत् समूहं प्रति सहानुभूतेः पापपूर्णाया अस्वीकृते-र्भारोऽस्ति। तस्याः सहानुभूतेर्यस्यां मानवमात्रस्य जन्मसिद्धोऽधिकारो विद्यते।" इति।

श्रीराजेन्द्रप्रसादोऽपि सामयिकीमावश्यकतां प्रतिपादयन् हिन्दू-समाजं प्रैरयत् स्पर्शास्पर्शाभिशापस्य निवर्तनाय। ३० सितम्बरदिने मोहमय्यां हिन्दूनेतॄणामेका प्रतिनिधिसभा सम्पन्ना तस्यामपि तादृशास्याभिशापस्या-पाकरणाय तैः प्रतिज्ञातम्। बिहारप्रान्तेऽपि तथैव निर्णयाः सभासु स्वीकृताः। आसीदयं सामाजिकक्रान्तेरेकोऽभिनव उपक्रमः। मन्दिर-प्रवेशाधिकाराः साम्प्रदायिकाः सद्भावाः सौहार्दस्य वातावरणमुदारा दृष्टिकोणाश्चेति हरिजनान्दोलनस्याङ्गभूताः सर्वत्र प्रसृताः। बहूनि सम्मेलनानि साधितानि,

स्थितेः शोधनार्थं प्रयासा आहिताः। मानवीया भावना प्रेरिताः। तेषु सर्वेषु श्रीराजेन्द्रप्रसादेन बहु प्रयतितम्।

वैदेश्यैः शासकैः सविनयावज्ञान्दोलनस्य समूलमुत्पाटनाय भूयोऽपि दमनचक्रं चालितम्। लन्दन-नगरे तृतीयं सर्वपक्षसम्मेलनं सञ्जातं, परं तस्मिन्नपि भारतीयानां स्वातन्त्र्याय किमपि नोद्घोषितम्। प्रकाशिते श्वेतपत्रे भारतस्य राष्ट्रिय-हितानुकूलं कस्यापि संविधानस्य व्यवस्था नासीत् तेनोदारदलीयानां राजनीतिज्ञानां भ्रमजालं छिन्नम्।

को नाम लोके प्रददाति लुब्धः, स्वहस्तगं वस्तु विबोधितोऽपि।
न हिंसकः प्रार्थनया प्रसक्तिं, प्राप्नोति तद्वच्छिथिलाङ्कोऽपि॥४॥

भारतीय-राष्ट्रिय-काङ्ग्रेसस्य स्थानापन्नाध्यक्षत्वेन श्रीराजेन्द्रप्रसादः कांश्चन निर्देशान् प्रासारयद् ये ४ जनवरी १९३३ ई० दिने श्रीगान्धिनां कारावासस्य वर्षग्रन्थौ विभिन्नस्थानेष्वायोजितासु सभासु यष्टिप्रहाराणां निग्रहाणां च मध्ये पठिताः। श्रीराजेन्द्रप्रसादः पुनरपि बांकीपुरकारातः प्रत्यावर्तनकाले, यत्राचार्यकृपलानीमहोदयस्याभियोगीयोपस्थितिरासीद्, निगृहीतः। आचार्यः कृपलानी ४ जनवरी-दिने पटनायां वन्दीकृत आसीत्। एताभ्यां श्रीराजेन्द्रप्रसादाय पञ्चदशमासानां तथा कृपलानीमहाभागाय षाण्मासिकः कारावासदण्डौ श्रावितौ। तत्रापि कारां वसतोस्तयोः कालः स्वाध्याये लेखने चक्रयन्त्रचालने च व्यतीतः।

श्रीगान्धिनां हृदयशुद्धये क्रमशो द्विवारमुपोषणानन्तरं तेषामिच्छानुसारं सविनयावज्ञान्दोलनं निरुद्धम्। विधानमण्डलेषु निर्वाचनानुमतिरदीयत तथा नियन्त्रणाय चैका समित्यपि समघटयत। श्रीराजेन्द्रस्य कारायां स्वास्थ्यं विकृतं चिकित्सालये प्रवेश्योपचारा अप्यक्रियन्त परं स्थितेर्गाम्भीर्यं विज्ञायान्ते १७ जनवरी १९३४ ई० दिने कारातः स विमोचित.।

भूयो भूयोऽनवरतमहोरात्रमेव प्रवृत्त्या,
विश्रान्तेरप्यवसरममलं नो लभन्ते जना ये।
आहारे वा व्यवहृतिविधौ व्यत्ययेनापि नूनं,
तेषां स्वास्थ्यं विकृतिमयते क्षीणतां चैति शक्तिः॥५॥

—०—

बिहार-प्रान्ते प्रकृतिप्रकोपः

तेऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीडुहरास्तप उग्रं मयोभूरापो देवीः प्रथमजा ऋतस्य ।।
(अथर्व० ५।१७।१)

ये नित्यं दयमानमानसतथा दारिद्र्य-विद्राविता,
ये चाप्यात्मतपः-प्रसादनिरताः सत्याश्रिताः साधवः ।
तानेव प्रकृति-प्रकोप-विकृतिर्हन्त ! व्यधाद् दुःखितान्,
'दीनानेव दुनोति दारुणतया दैवोऽपि दुःखप्रदः' ।।१।।

१५ जनवरी १९३४ ई० वर्षे बिहारप्रान्ते प्रकृतिप्रकोपः प्रोत्कटतया-प्रस्फुटितः । प्रलयङ्करेण भूकम्पेन सहस्रशो गृहा विनष्टाः, लक्षशोः जना गृहा परिवार-विहीना जाताः कोटिशो मुद्राणां च हानिरभूत् । सर्वत्र कारुणिकं दृश्यमासीत् । श्रीराजेन्द्रप्रसादस्तदा रुग्णावस्थायां चिकित्सालये निगृहीत उपचारमगृह्णात् । आसीत् तदानीं श्रीराजेन्द्रप्रसादस्य **'बिहारस्य गान्धी'**-ति प्रख्यातिः । बिहारसर्वकारस्य समक्षं भूकम्पेनोत्पीडितानां पुनर्वासस्य तेषां सेवायास्तथोन्मूलितस्य बिहारस्य भूयोवसतेः कार्यं प्रत्युपस्थितमभूत् । तस्मिन्नेव समये बिहारस्य जनताया दुःखमपाकर्तुं श्रीराजेन्द्रप्रसादः कारातो मोचितः ।

कारातो विमुच्य मित्रैः सह परामृश्य च सर्वप्रथमं तेन **'बिहार सैन्ट्रल-कमेटी'**-नाम्नैका संस्था स्थापिता । सदस्यैः सर्वसम्मत्या तस्या आध्यक्ष्यं श्रीराजेन्द्रप्रसादाय तथा साचिव्यं श्री**जयप्रकाशनारायणाय** समर्पितम् । अनुग्रहनारायणसिंहस्य यदा कारागृहान्मुक्तिरभूत् तदा तस्मै स साचिव्यभारोऽर्पितः । श्रीराजेन्द्रप्रसादस्य निवेदनेन जनतायाः साहाय्यद्रव्यं सुबहु प्राप्तम् । सर्वकारेणापि निवेदनं प्रकाशितं परं तन्माध्यमेन साहाय्यकोषे स्वल्पमेव धनमायातम् । कोषे प्राप्तस्य धनस्य वस्तूनां च वितरणव्यवस्थया सहैव धनदातॄणां नामान्यपि प्रकाशितानि । एका चतुःशतपत्रात्मिका पुस्तिकैव मुद्रापिता । एतदधिकृत्य श्रीराजेन्द्रप्रसादेन स्पष्टमेव निगदितम्—

सामाजिकं द्रव्यमुपार्ज्यते यत्, सम्प्रार्थनैर्नेतृवरैः प्रकामम् ।
सर्वांशतस्तस्य समीक्षणेन, व्ययव्यवस्थाऽपि सुरक्षणीया ।।२।।
नो चेत् समग्रं यश एति काम्यं, वचस्सु नो विश्वसिति प्रमार्ष्टि ।
कर्माणि लोकः सुकृतानि तस्य, हिनस्ति तं तद्धन-दुष्प्रयोगः ।।३।।

अनया व्यावहारिक-सत्यतयाऽऽस्थावत्या भारतीयजनतया प्रभूतं धनं वस्तुजातं च यद्यत् प्राप्तं तस्य समुचितं वितरणमपि सम्पन्नमिति भावनया श्रीराजेन्द्रप्रसादं प्रति भूयसी श्रद्धा महान् विश्वासस्तथाऽयमेवास्माकं हित-कृद् वास्तविको नायक इति जनानां हृदयेषु दाढ्र्येनाङ्कितम्।

बिहारस्य भूकम्पे लक्षशो गृहाणि ध्वस्तानि। सहस्रशः कूपाः सिकताभिः पूरिताः। भूयांसो ग्रामा ईदृशा आसन् येषु जलमेव नाभूत्, क्वचित् तु सिकता तथा पूरिता यत्रेदमपि ज्ञातुं नाशकद् यदत्र क्वापि गर्त आसीदथवा नैव, पानीयस्य भीषणः सङ्कटः। गङ्गाया उत्तरभागे सर्वेषु जनपदेषु प्रायः सर्वत्र समानैव स्थितिरासीत्। ईदृशेषु स्थानेषु पानीयप्रापणं क्षेत्रेभ्यस्तथान्य-स्थानेभ्यः सिकतायाः पराकरणमसाधारणं कार्यमभूत्। किन्त्वस्य सिद्धये श्री**गान्धि-जवाहरलालनेहरू-सरदारपटेल-कुमारप्पा-कृपलानी-हार्डीकर-श्रीमती सोफिया सोमजी कुमारी-म्युरियललेस्टर.कुमारी अगाथा हैरिसन-एण्ड्रयूज**-सदृशैर्मूर्धन्यनेतृभिः पूर्णया शक्त्या व्यवस्थितरीत्या च प्रयस्तम्। अस्य कर्मणः पृष्ठे यत्सङ्घटनमभूत् तदप्यसाधारणमेवासीत्। देशाद् विदेशाच्च यद् धनमायातं यद्वा वस्तुजातं प्राप्तं तस्य प्रत्येकमंशस्य गणना व्यवस्थापिता। एतेषां मूले राजेन्द्रप्रसादस्य कर्मठता चारित्रिकता सत्य-निष्ठता च वस्तुतो विराजमाना आसन्। क्रमबद्धया योजनया साहाय्यदानस्य तथा भूयोऽपि जनानां समुचितकर्मसु नियोजनस्य यादृशी व्यवस्थाऽक्रियत तयोत्खातप्रायस्य बिहारस्य पुना रचनेन जना एवं कथयितुं प्रवृत्ता यद् **'अभिशापोऽपि कदाचिद् वरदानाय कल्पत'** इति। बिहारेऽपि विध्वंसो निर्माणे परिवर्तितः। एतेन कार्येण श्रीराजेन्द्रप्रसादस्य प्रतिष्ठा जनानां मनः-स्वियतीं वृद्धिं गता यया देशवासिनो **'देशरत्न'** पदं तन्नाम्ना सहायूयुजन्। श्रीजयप्रकाशनारायण इमामेव वार्तां मनसिकृत्यैकत्रालिखत्—

श्रीमन्महात्मभिः स्वीये भव्य आस्थानमण्डपे।
सङ्गृहीतानि भूयांसि, रत्नानि महतः श्रमात्॥४॥
तेषु सर्वेषु सम्मान्यो, देशरत्नपदाञ्चितः।
श्रीराजेन्द्रप्रसादोऽयमेक एव महानभूत्॥५॥

तेष्वेव दिवसेषु श्रीराजेन्द्रप्रसादस्य ज्येष्ठसहोदराणां श्रीमहेन्द्रप्रसा-दानां देहावसानमभूत्। तदाघातेन खिन्नस्य तस्य मनःशान्त्यै गीताया आश्रय एव सर्वातिशायी सम्पन्नः। परिचितानां शोकसन्देशा अप्युपेताः श्रीगान्धिभि-रपि सान्त्वना सन्देशः प्रहितः।

ततः परं मासद्वयानन्तरं भ्रातृव्यश्रीजनार्दनस्य पञ्चवार्षिकः पुत्रोऽपि

रुग्णो भूत्वा प्रयत्नशतैरपि स्वस्थतामप्राप्य दिवं गतः । अयं बालकः श्रीराजेन्द्रप्रसादस्यातीव स्नेहभाजन आसीत् । अतः 'क्षते क्षार' इतीवासह्यो-ऽयमपि दुःखाघातः समजायत ।

संसारः सुख-दुःखयोरनुपमं क्षेत्रं वरीवर्तते,
यस्मिन्नैकविधाः क्षुपा व्रततयः स्तम्बास्तृणाद्यङ्कुराः ।
पत्रैः पुष्प-फलैरलं विलसिताः सन्तोऽपि तेष्वेव हा !
केचित् कण्टककोटिभिर्गतदयाः सम्पीडयन्ते जनान् ॥६॥

—०—

११

ज्योत्स्ना-कला

काङ्ग्रेसाध्यक्षपदाधिरोहणम्

अभि प्रेहि मार्पवेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रुवन् ॥
(अथर्व० का० ४, सू० ८, मं० २)

धन्यैर्मान्यैर्वदान्यैः शुभकृतिकुशलै राजनीतिप्रवीणै—
राध्यक्ष्यं यस्य पूर्वैरतिनिपुणतया भूषितं राष्ट्रवीरैः ।
काङ्ग्रेसाध्यक्षताख्ये अतिमहति पदे मण्डयित्वाऽथ तत्र,
श्रीराजेन्द्रप्रसादः स्वगुणगणफलं प्रापितो भारतीयैः ॥१॥

भारतीया संस्कृतिः कर्तव्यपरायणानां सदाचार-तत्पराणां विद्या-वदातान्तःकरणानां मनीषिणां सम्मानाय निर्दिशति । अनिच्छुकस्यापि सेवा-व्रतिनः सर्वदा समादराय सज्जा देशवासिनः सन्ततं प्रतीक्षन्ते स्म यद् लभ्येत कश्चनेदृशोऽवसरो यस्मिन् वयमपि किमपि कर्तुं प्रभवेम । अत एव रात्रिन्दिवं स्वसुखानि विस्मृत्यात्मीयानविगणय्य देशस्य देशवासिनां सेवायै धृतव्रतस्य सर्वात्मना विशुद्धस्य विनम्रस्वभावस्य विधिशास्त्रविचक्षणस्य निष्ठावतः कर्मयोगिनः श्रीमतो राजेन्द्रप्रसादस्य सङ्घटनशक्ति सेवापरायणतां लोक-प्रियतां चालोक्य काङ्ग्रेसस्य भग्नप्रायामवस्थां पुनः समुचितरूपेण व्यवस्था-पयितुं महात्मगान्धिसहितैः काङ्ग्रेस-कार्य-समितेः सदस्यैरैकमत्येन निर्णीतं

यदागामिनि मोहमय्यां अष्टचत्वारिंशत्तमे काङ्ग्रेसाधिवेशनेऽध्यक्षपदं श्रीराजेन्द्रप्रसादायैव देयमिति। अयं काङ्ग्रेसाध्यक्षपदस्य स्वीकृतेः प्रस्तावो यथाकालं श्रीराजेन्द्रप्रसादस्य निकटे प्रेषितः परं तदा तेन स्पष्टमिदं कथितं यद्-'इदानीं मत्कृते प्रस्तावस्यास्य स्वीकरणं नास्ति सम्भवम्' असमर्थता चात्मनो दर्शिता। महात्मगान्धिभिरपीदं श्रुतं तदा साक्षादाहूयाध्यक्षपद-स्वीकाराय गदितं तथा निषेधस्य कारणं जिज्ञासितं, तदा विनम्रभावेन स न्यवेदयत्—'**भवतामादेशः शिरसा स्वीकार्यः परं मत्समक्षमस्ति नैतिकतायाः प्रश्नः, कारणादस्मादेवाहमध्यक्षपदग्रहणं नोचितं मन्ये**' -इति श्रुत्वा, ते स्पष्टतया कारणं विश्लेषयितुमकथयन्। श्रीराजेन्द्रप्रसादेन तदा कथितं मम भ्रातुः स्वःप्रस्थानं कतिपयेभ्यो दिवसेभ्यः पूर्वमेवाभूत् साम्प्रतमेव गार्हस्थ्यस्य सर्वा व्यवस्था मत्समक्षमायाता ज्ञाता च परिस्थितिः। अहम् ऋण-भारेणा-र्दितोऽस्मि। यः खलु पर्युदञ्चनेन ग्रस्तो भवेत् तेन काङ्ग्रेसस्याध्यक्षता नाङ्गीकरणीयेति मम मतम्। इदं श्रुत्वैव श्रीगान्धिनो मौनाः सञ्जाताः। मनाग् रुद्ध्वा ते पृष्ठवन्तः —'का वार्ताऽस्ति ? स्पष्टतया मामवगमयन्तु।'

श्रीराजेन्द्रप्रसादेन सर्वाऽपि स्थितिर्वर्णिता प्रायो द्विलक्षमुद्राणाम् ऋणं देयमासीत्। तस्य निष्कृतिं विना तादृशस्य गौरवपूर्णस्य पदस्य स्वीकारेऽभूत् तस्य विमतिः। श्रुत्वा सर्वमिदं श्रीगान्धिभिः श्रेष्ठि**श्रीजमनालालबजाज**-महोदय आकारितः। श्रीराजेन्द्रप्रसादात् प्राप्तायाःपरिस्थितेः परिज्ञानानुसारं तत्समक्षं सर्वं स्पष्टीकृतम्। पृष्टं च श्रीगान्धिमहात्मभिः 'किमस्माद् भाराद् राजेन्द्रप्रसादो मोचयितुं शक्यते ? काङ्ग्रेसाध्यक्षपदस्वीकरणे नैतिकतायाः प्रश्नोऽयमेतत्समक्षमुपस्थितोऽस्ति।' श्रीगान्धिनामादेशमिमं सम्प्राप्य श्रीबजाजमहोदयः स्वीयं व्यवस्थाधिकारिणमाहूय जीरादेईं प्रेषितवान् स्थितेश्च पूर्णं ज्ञानं प्राप्तवान्। परिज्ञातं यत् स्वाधिकृता भूमिर्यद्युपनिधी-क्रियेत तथा कानिचिद् वस्तूनि विक्रियेरंस्तदा ऋणं साकल्येनापाकर्तुं शक्यते। तदनुसारम् ऋणापनोदनव्यवस्था सम्पादिता तदा श्रीराजेन्द्रप्रसादेन काङ्ग्रेसस्याध्यक्षपदमङ्गीकृतम्।

कार्यं लोकहितस्य सार्वजनिकं कुर्वन्ति ये ये नरा—
स्तेभ्यो नैतिकताऽवनं समुचितं ह्यावश्यकं विद्यते।
प्रामुख्येन न पालयन्ति भुवि ये तेषां प्रतिष्ठा तथा,
लोके तिष्ठति नैव किञ्च जनता प्रत्येति तादृङ् नहि ॥२॥

१९३४ ई० वत्सरस्याक्टूबरमासे षड्विंशतितमदिनाङ्कादष्टाविंश-तितमदिनं यावत् काङ्ग्रेसस्याष्टचत्वारिंशत्तममधिवेशनं श्रीराजेन्द्रप्रसाद-स्य साभापत्ये महानगर्यां मोहमय्यामभूत्। इदमतीव महत्त्वपूर्णमधिवेशन-

मासीद् यतः काङ्ग्रेसस्य स्थापनाया अभूदयं पञ्चाशत्तम-वत्सरारम्भकालः। अस्मिन्नेव स्वर्णजयन्त्युत्सवस्यायोजनाया निर्णयेन शीतलतोष्णतावादिनः सर्वेऽपि प्रतिबन्धा निरस्ताः। सहैव श्वेतपत्रे ये सिद्धान्ता निर्णीता अभूवंस्तान-धिकृत्य संविधानस्य या रूपरेखा सज्जीक्रियते स्म तदर्थं स्वीयानां विचाराणां प्रकटनस्य महत्त्वपूर्णं कार्यं काङ्ग्रेसाय दत्तमासीत् किञ्च केन्द्रीय-संसदो निर्वाचने भागग्रहणायापि तेन निगदितमासीत्। काङ्ग्रेसस्य समक्षं सत्यमेवा-तीव महत्त्वपूर्णानि कार्याण्यासन्।

समस्तदेशस्य सुखावहानि कार्याणि कार्याणि यदा भवन्ति।
तदात्तभारा भृशमेव चिन्ता-सन्तानमन्तःकरणे वहन्ति ॥३॥

स्वस्याभिभाषणं सज्जयता श्रीराजेन्द्रप्रसादेनेमाः सर्वा अपि वार्ता ध्याताः। पटनायां तस्य पाण्डुलिपिं पूर्वं डा० सच्चिदानन्दसिन्हा-महाभागं दर्शयित्वा ततः परं सः श्रीगान्धिमहाभागानां परामर्शं सम्प्राप्यान्तिमं रूप-मदात्। अधिवेशनारम्भदिवसेऽध्यक्षरूपेण सम्प्राप्तस्य श्रीराजेन्द्रप्रसाद-महोदयस्य धूम्रयान-विश्रमस्थलात् समस्तेऽपि वर्त्मनि भव्यं स्वागतम-भूत्। एकस्यां विशेषतो विभूषितायां शकट्यां तदीया धर्मपत्नी श्रीमती **राजवंशीदेवी** स्वागतसमितेरध्यक्षः **श्री के० एफ० नरीमैन**महानुभावस्तथा प्रसिद्धा कवयित्री **सरोजिनी नायडू**-महोदयाऽप्यवर्तन्त। अयं प्रथम एवा-वसरोऽभूद् यत् कस्मिंश्चित् सार्वजनिके समारोहे श्रीराजेन्द्रप्रसादस्य धर्मपत्नी तेन सह समायाता। तदर्थं श्रीसरोजिनीनायडूमहाभागाया बलवती प्रेरणा-ऽवर्तत।

काङ्ग्रेसाधिवेशने सभापतेरभिभाषणं मुद्रितं व्यतीतरत् स्वयं च श्रीराजेन्द्रप्रसादमहोदयोऽपि कांश्चिदंशान् महत्त्वपूर्णान् मत्वाऽपीपठत्। काङ्ग्रेसस्य करांच्यधिवेशनोत्तरं विगतेषु सार्धत्रयेषु वर्षेषु देशो यासु परीक्षासु यातनानां घटिकासु च व्यत्यगच्छत् तस्याध्यक्षीयभाषणे स स्पष्टं विवरणमुपातिष्ठिपत्। अधिवेशनारम्भात् पूर्वदिने श्रीगान्धिमहात्मभिरेकं वक्तव्यं प्रकाशितं यस्याशयोऽभूद् यत्—'ते काङ्ग्रेसात् पार्थक्यं वाञ्छन्ति स्म, किन्तु बहिः स्थित्वाऽपि ते काङ्ग्रेसस्याधिकाधिकां सेवां कर्तुं प्रभविष्य-न्ति करिष्यन्ति च।' यद्यपि तेन सर्वेषु वैकल्यमासीत् परं श्रीराजेन्द्रप्रसाद-स्तत् समार्थयद्, यतो हि— स विश्वसिति स्म यच्छ्रीगान्धिनो यत् किञ्चिदपि चिकीर्षन्ति तत्काङ्ग्रेसस्य दौर्बल्याय नैवापितु कार्यकर्तारः स्वयं विचिन्त्य किमपि निर्णेतुं विधातुं च प्रभवेयुरित्यर्थम्। तेन सहैव श्रीमहात्मभि.— (१) काङ्ग्रेसस्य विधाने परिवर्तनमपि वाञ्छितम्। तदनुसारं (२) सदस्ये-भ्यः प्रतिमासं ४५७ मीटरमितस्योत्तमसूत्रस्य कर्तनमथवा तद्विनिमये कस्या-प्यन्यविधस्य शारीरिकश्रमस्यानिवार्यत्वं (३) काङ्ग्रेसस्य निर्वाचनेऽथवा

कस्मिन्नपि पदे समारुरुक्षवे हस्तकर्तित-हस्तवयित-वस्त्रधारणस्यावश्यकत्वं च निर्णीतम् ।

श्रीराजेन्द्रप्रसादः स्पष्टरूपेणाभ्यभाषत—"**यदि वयं वस्तुतः पूर्णं स्वातन्त्र्यं कामयेमहि तर्हि तत्प्राप्तये दृढसङ्कल्पवद्भिरस्माभिर्भाव्यम् ।**"
अथ च —

या चावश्यकताऽस्ति साम्प्रतमिह स्वातन्त्र्यलब्ध्यै द्रुतं,
तस्यां धैर्य-समर्पणानवरतात्मत्याग-निष्ठादयः ।
सङ्कल्पाश्च दृढाः क्रियासु निरताः सत्याग्रहेणान्विताः,
प्रामुख्येण भवन्तु तैर्वयमरं प्राप्स्याम आत्मेप्सितम् ॥४॥

अन्ते च तेन 'जेम्स लावेल'स्याशासन्देश उद्धृतः —

सत्यं शूले निवसति सदाऽसच्च सिंहासनस्थं,
तस्मिञ्छूले भवति नियतं भाविनः शासनं तु ।
किञ्चाज्ञाते क्वचिदपि तमस्तोमसंस्थे निलीनो,
देवो दत्ते प्रहरमथ सोपस्थितोऽस्माकमूर्ध्वम् ॥५॥

—०—

स्वर्णजयन्ती-समारोहः

तपो॑ष्प॒वित्रं॒ वित॑तं दि॒वस्प॒दे शोच॑न्तो अस्य॒ तन्त॑वो॒ व्य॑स्थिरन् ।
अव॑न्त्यस्य प॒वीता॑र॒माश॑वो दि॒वस्पृ॒ष्ठमधि॑ तिष्ठन्ति॒ चेत॑सा ॥

(ऋग्वेद० ९।८३।२।)

सङ्घर्षजन्य आनन्दस्तापं शोधयते सदा ।
देदीप्यमानतत्त्वेन व्याप्नोति भुवनत्रयम् ॥१॥

वर्षाणां सङ्घर्षानन्तरमालोकितान्तरा रुचिरा ।
सुखदा 'स्वर्णजयन्ती', तनुते जनेषु हर्षवर्षाः ॥२॥

काङ्ग्रेसाधिवेशनस्य समाप्तेरनन्तरं सत्वरमेव श्रीराजेन्द्रप्रसादेन 'कार्यकारिणां समितिः' सङ्घटिता । आचार्यः कृपलानी मन्त्रित्वेन नियुक्तः । समितेरुपवेशनकाले भूयोभूयस्तत्र श्रीगान्धिमहात्मभ्यः कष्टदानापेक्षया

स्वयं श्रीराजेन्द्रप्रसाद एव वर्धायां गत्वा तैः परामृशति स्म। १९३४ ई० वत्सरस्य नवम्बरमासे केन्द्रीय-संसदो निर्वाचनान्यभूवन्। काङ्ग्रेसायायमासीत् परीक्षाकालः। परं काङ्ग्रेसस्य लोकप्रियत्वमेधमानमासीदतो बङ्गालप्रान्तं विहाय —यत्रत्याः सवर्णा हिन्दवः साम्प्रदायिकेनास्पृश्योद्धार-नियमेनासन्तुष्टा आसन्— सर्वेषु प्रान्तेषु सहजं साफल्यमवाप्तम्।

अग्रिम-वर्षारम्भे यदा देहल्यां केन्द्रीय-लोकसभायाः सत्रारम्भ-समकालमेव काङ्ग्रेस-कार्यकारिण्या अप्युपवेशनमायोजितं तस्मिन् महात्मगान्धिनोऽपि सम्मिलिताः। तेषां परामर्शेण काङ्ग्रेसे नवजीवनसञ्चाराय शीतकालानन्तरं समग्रेऽपि भारते भ्रमणस्य कार्यक्रमं श्रीराजेन्द्रप्रसादो निरचैषीत्। भ्रमणार्थं गमनात् पूर्वं फरवरीमासे स साम्प्रदायिकमैक्यं सर्वसम्मतं सन्धिं च विधातुं गाम्भीर्येण प्रायतत, मुस्लिमलीगस्याध्यक्षेण **श्री एम० ए० जिन्ना**-महोदयेन सह संलापं च बहूनि दिनानि यावदकरोत् परं कोऽपि सुखदः परिणामो नामिलत्।

श्रमाधिक्येनास्वास्थ्यवशेन च बहुशोऽसौविध्ये सत्यपि श्रीराजेन्द्रप्रसादः पञ्चाम्बुप्रान्ते महाराष्ट्रेषु गूर्जरेषु दक्षिणभागेषु च धूम्रयानेन मृत्तैलयानैश्च भ्रमणानि विधाय तत्र तत्र समुपस्थिताः परिस्थितीः समीक्ष्य मिथ उद्भूतान् विवादान् समाप्य सर्वत्रैव स्वागतान्यभिनन्दनानि शुभाशंसनानि स्वीकृत्य संस्थायै साहाय्यद्रव्याणि सङ्गृह्य च राष्ट्रिय-प्रबोधनविधिं समपूरयत्।

मनस्विनो मानधनस्य निर्भयं, शुभेऽयने संव्रजतो निरन्तरम्।
सुखाय देशस्य समर्प्य जीवनं, प्रयस्यतः स्वागतमाचरेन्न कः ॥३॥

काङ्ग्रेसाध्यक्षत्वेन विचरन् श्रीराजेन्द्रप्रसादः '**क्वेटा**'-नगरस्य तथा तन्निकटवर्तिमण्डलानां भूकम्पेन ३१ मईदिवसे ततोऽग्रिमेषु दिनेषु च ध्वंसवार्तां श्रुत्वाऽतीव दुःखमन्वभूत्। स्वीयं भ्रमण-कार्यक्रमञ्चान्तराल एव रुद्ध्वा भूकम्प-पीडितानां साहाय्यमाचरितुं तत्र गन्तुं चावाञ्छत् परं सहायकसमितिभ्यस्तत्र गमनं सर्वकारेण निरुद्धम्। तदर्थं शासनं प्रार्थितं महाधिशासकाय च तन्त्रीसन्देशोऽपि प्रहितो यस्मिन्—"प्रवेशनिरोधाज्जनता वैकल्यमनुभवति। बिहारस्य ममानुभवोऽस्ति यदनेकदिनानन्तरमपि ध्वंसावशेषाणामधो जीवितानां निःसारण-सम्भावनाऽवशिष्यते। अतो ममायं गहनोऽनुरोधोऽस्ति यत् क्वेटा तथाऽन्येषु प्रभावितक्षेत्रेषु श्रीमन्तः प्रामाणिकं साहाय्यमुपलम्भयेयुः।" परं शासनेन स्वनीतौ परिवर्तनं न विहितम्। तथापि श्रीराजेन्द्रप्रसादस्याध्यक्षतायामेका '**क्वेटा-केन्द्रीय-साहाय्य-समितिः**' सङ्घटिता। करांची-सिन्ध-भागयोस्तेषु सर्वेषु स्थानेषु भ्रमणं कृत्वा साहाय्य-

समितीर्निर्माय स्वातन्त्र्येण स्वीयं कर्तव्यं श्रीराजेन्द्रप्रसादेन पूरितमेव।

तेष्वेव दिवसेषु देशि-राज्यानां जनतासु जागर्तये श्रीगान्धिमहाभागानां विचारानुसारं '**प्रजामण्डल**'-संस्थानां प्रवृत्तयः श्रीराजेन्द्रप्रसादस्य काङ्ग्रेसाध्यक्षरूपेण प्रसारिताद् वक्तव्यादुद्भूताः। तेन वर्षाकालिकानि दिनानि वर्धा-इलाहाबाद-बिहारेषु व्यत्यापितानि। मद्रपुर्यामायोजितायामखिलभारतीयकाङ्ग्रेससमितेरुपवेशिन्यां भागं गृहीत्वा श्रीराजेन्द्रप्रसादस्तमिलनाडु-प्रदेशस्य यात्रामकरोत्। यात्रायां प्रायश्चतुर्दशजनपदेषु भ्रान्त्वा षोडशोत्तरैकशतसभासु स भाषणान्यदात्। मध्ये मध्ये बहुषु ग्रामेषु जनानामाग्रहादपि कार्यक्रमातिरिक्तमप्यभाषत। परिस्थितेरनुकूलं क्वाप्याङ्ग्लभाषयाऽपि स भाषितवान् किन्तु स हिन्दुस्तानी-भाषाशिक्षणाय जनानवश्यं प्रैरयत्। एवमेवान्ध्रेषु केरलेष्वपि च यात्रां विधाय सर्वत्र प्रजाजनानस्पृश्योद्धाराय कुटीरोद्योगाय स्वराज्यप्राप्तये शान्तिपूर्वकं सङ्घर्षाय काङ्ग्रेस-कार्यार्थं धनसङ्ग्रहाय च भाषमाणस्य श्रीमतो राजेन्द्रप्रसादस्य महती प्रतिष्ठा समादरः साफल्यं च प्रत्यभात्। सहस्रशो मुद्राश्च जनैरुपहृता यासामुपयोगः काङ्ग्रेस-कार्यायाक्रियत। तस्यां यात्रायां श्रीरमणमहर्षीणां तथा सुबहूनां प्रसिद्धानां सुप्रसिद्धानां स्थलानां मन्दिराणां च दर्शनान्यपि स न व्यस्मरत्।

स्वदेश-सेवाव्रतिनः सुकर्मठाः, सदा सदाचारविधौ परायणाः।
दिवानिशं राष्ट्रियभावनान्विता, भजन्ति नो निश्चलतां कदापि॥४॥

१९३५ वत्सरे दिसम्बरमासस्याष्टाविंशतितारिकावधि सम्पाद्यमानं स्वर्णजयन्ती-कार्यक्रमं निश्चेतुं तस्य प्रभावशालि-महत्त्वं स्थिरयितुं कर्तव्यानि बोधयितुं च श्रीराजेन्द्रप्रसादमहाभागेन काश्चन घोषणाः प्रसारिताः, यासु द्वे अतीव महत्त्वपूर्णे अभूताम्। तयोः प्रथमा '**भारतीय-राष्ट्रिय-काङ्ग्रेसस्येतिहास-निर्माणं**' द्वितीया च '**देशि-राज्य-प्रजामण्डल-स्थापनाः।**' इतिहास-निर्माणं '**डा० पट्टाभिसीतारामैय्या**'-महोदयेन कृतम्। मूलत आङ्ग्लभाषायामाकलितस्य तस्य पाण्डुलिपेः सम्पादनं स्वयं श्रीराजेन्द्रप्रसादो व्यदधात् तथा भारतस्यान्यासु हिन्दी-मराठी-कन्नड-तेलुगु-तमिलोर्दू-भाषास्वनुवाद्य स्वर्णजयन्त्यवसरे मुद्राप्य च स प्रकाशितः। तस्मिन्नेव समये विभिन्नानां विषयाणामन्यान्यपि पुस्तकानि प्रकटितानि।

दिसम्बरस्य अष्टाविंशतितमे दिवसे सूर्योदयात् पूर्वं देशे सर्वत्र प्रभातचङ्क्रमण-समारोहाः सार्धाष्टवादनसमयात् पूर्वं ध्वजोत्तोलनानि राष्ट्रियध्वजविक्रयणानि तृतीये प्रहरे चलसमारोहप्रवर्तनानि सार्वजनिक-

सभासंयोजनानि रात्रौ दीपमालाप्रकटनानि तथा स्वदेशिवस्त्राणां प्रदर्शनीकरणानि चेति कार्याणि निर्दिष्टान्यासन्। प्रधानसमारोहस्तत्रैवायोज्यत यत्र पञ्चाशद्वत्सरपूर्वं प्रथमः समारोहोऽक्रियत। बम्बईनगर्यां यदा श्रीराजेन्द्रप्रसादस्यागमननभूत् तदा तेन ज्ञातं यत्—काङ्ग्रेसस्य भूतपूर्वेष्वध्यक्षेषु सर्वेभ्यः प्राचीनास्तथा काङ्ग्रेसस्य प्रथमाधिवेशने सम्मिलितेषु सदस्येष्वप्येकमात्रमवशिष्टाः श्रीदिनशावाचामहोदया अतीव रुग्णा अत्रैव विराजन्ते, तदा तेषां शुभाशीर्वादप्राप्तये तन्निकटं गतः। शुभाशिषः सम्प्राप्य मुदितः स स्वर्णजयन्तीसमारोह स्थानं यावत् महत स्वागतेनाभिनन्द्यमानः समागच्छत्। तत्र श्रीराजेन्द्रप्रसादेन ध्वजोत्तोलनं विहितं काङ्ग्रेसाध्यक्षरूपेण च सन्दिष्टम्—

"पञ्चाशद्वर्षपूर्वमस्मिन्नेव स्थाने यदा प्रथमं सम्मेलनमभूत् तस्मिन् राष्ट्रियकाङ्ग्रेसस्य स्वल्पा एव प्रतिनिधयः सममिलन् परं ते भारतीयजनतायाः सत्याः सेवका अवर्तन्त। जनतायाः स्वातन्त्र्ये काङ्ग्रेसस्य निश्चितमुद्देश्यमासीत् किन्तु **'स्वतन्त्रता'**-शब्दस्य काऽपि परिभाषा स्पष्टा नासीत्। साम्प्रतं तेन शब्देन मूर्तं रूपं प्राप्तम्। अस्यार्थोऽस्ति 'पूर्णं स्वराज्यम्, स्थायि स्वातन्त्र्यम्, भारतस्य निर्वाचितानां प्रतिनिधीनां शासनम्। अस्मिन् शब्दे कस्यापि वर्गस्य जातेर्दलस्यैव वा स्वातन्त्र्यं नास्ति काङ्क्षितमपि तु दीनाद् दीनतमानां जनानां सर्वेषां स्वातन्त्र्यम्। जनतायाः शोषणस्य समाप्त्यै राजनीतिक-स्वतन्त्रतया सह वास्तविकतयार्थिकी स्वतन्त्रताऽपि सम्मेलनीया। अस्य लक्ष्यस्य मार्गा अपि स्पष्टतः परिभाषिताः सन्ति। तैर्वैधैः शान्तिपूर्णैश्च भवितव्यम्। १९२० ई० वत्सरात् प्रकटरूपेण ते मार्गा अवलम्बिताः। स्वेषामुग्रतमेन रूपेण तैरहिंसका असहयोगाः शिष्टा अहिंसका अवज्ञाः स्वीकृताः, यदन्तर्गतं सहस्रशो नार्यः पुरुषाश्च काराणां यातनाः सोढवन्तः, स्वीयाः सम्पदोऽधिग्रहणमपि स्वीकृतवन्तः स्वेषां प्रियवस्तूनां विनाशनमपि स्वचक्षुषां पुरतो दृष्टवन्तः।

शारीरिकीर्मानसिकीश्च वैत्तिकीः, सोढ्वाऽपि पीडा बहुशः प्रताडनाः।
दण्डप्रहारैर्गुटिकास्त्र-घातनैरन्तेऽथ मृत्योर्बरणानि लम्भिताः ॥५॥
एतादृशैर्भूरितरैश्च कारणैरान्दोलनं द्राक् स्वजनैर्निवारितम्।
तथापि काङ्ग्रेसदलं न मौनतां श्रितं ततः शक्तिमदस्ति साम्प्रतम् ॥६॥

लब्धारम्भादविरतमियं चारु काङ्ग्रेस-संस्था,
लब्ध्वा पूर्णं सकलजनतादत्तसाहाय्यशक्तिम्।
अद्योदीच्याः प्रथितिमयिता दक्षिणां यावदास्ते,
मान्या देशे जनहितकरी वर्धमाना समन्तात् ॥७॥

किञ्चास्या वर्तमानेषु कार्यक्रमेषु—"विधानसभानां सदस्यता सूत्र-कर्तन-वयनोद्योगयोः प्रवर्धनं लघूनां ग्रामीणोद्योगानां प्रोत्साहनं ग्राम-जीवनस्यार्थिक-शैक्षिक-सामाजिक-स्वास्थ्य-सम्बद्धानां पक्षाणां पोषणं स्पर्शास्पर्श-निवारणं विभिन्नेषु सम्प्रदायेष्वैक्यसम्पादनं मद्यनिषेधो राष्ट्रिय-शिक्षाप्रसारो वयस्केषु ज्ञानविस्तार औद्योगिकश्रमसङ्घटनं कृषकाणां सङ्घ-स्थापना चेत्यादयः सन्ति सङ्कल्पिताः।"

"इत्थं प्रायः सर्वेषु राष्ट्रियकार्यकलापेषु काङ्ग्रेसेन स्वीयं महद् योगदानं कर्तुं प्रयत्यते। भारतस्य नैकशो महिलाः पुरुषाश्च निष्ठापूर्वकं जनतायाः सेवायै बलिदानाय सन्नद्धाः सन्ति। ईदृशीयं संस्था निजा-सूपलब्धिषु गर्वमनुभवति। नायं समय आमोदोत्सवानां न च मध्येजलं नौकादण्ड-विमोक्षणस्य। अधुनाऽपि भूयांसि कार्याण्यवशिष्यन्ते, तानि महान्ति विद्यन्ते, तदर्थं महतो धैर्यपूर्णस्य श्रमस्यानन्तानां बलिदानानां सुदृढस्य च सङ्कल्पस्यावश्यकता वर्तते।"

"वयं ज्ञाताज्ञातान् तान् स्त्रीपुरुषान् बालकान् प्रति च नतशिरसो भवामो यैर्भारतस्य स्वातन्त्र्याय स्वीयानां प्राणानामाहुतयः समर्पिताः, कष्टानि सोढानि, हानयश्च प्राप्ता ये चाद्यापि मातृभूमेः प्रेम्णो मूल्यं वितरन्ति। अद्य वयं कृतज्ञतापूर्वकं सम्मानेन सह तानपि स्मरामो यैरस्याः शक्तिशालिन्याः संस्थायाः बीजमारोपितं पुरस्कार-रहितैः श्रमै-र्बलिदानैश्चास्याः पालनं पोषणं च विहितम्।"

"पञ्चाशद्वर्षाणां पूर्वमारोपितोऽयं लघुतमः क्षुपोऽद्य शक्तिशाली वृक्षः संवृत्तः। अस्य शाखाः प्रशाखाः सर्वत्र देशे व्याप्ताः सन्ति तथा ऽगणितानां स्त्रीपुरुषाणां बलिदानेनाद्यैष कुसुमितो भवति। अस्य बहुवर्णानि कुसुमानि जनानां मनांस्याकर्षन्तु, सौरभाणि हृदयान्याह्लादयन्तु पुष्पाणां परागैराकण्ठं मग्नाश्चञ्चरीकाश्चिरं मधूनि पिबन्त्विति वयं दृढेन चेतसा वाञ्छामः। साम्प्रतं सर्वेषां देशसेवकानामस्माकं कर्त्तव्यमस्ति यद्—

स्वपूर्वजैरात्मसमर्पणेन, प्रवर्तितस्यास्य सदाशयस्य।
पथः परित्यागमथो न कृत्वा, स्वतन्त्रताप्त्यै पुरतो व्रजेम ॥८॥

१२

श्री-कला

काङ्ग्रेस-निर्वाचन-कार्यशौर्यम्

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथा मयञ्च।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानस्य सीदत॥
(यजुर्वेद० १८।६१)

कस्मिन्नपि प्राज्यकुले जनिः स्याद् राज्ये पदे वाऽथ चिरं स्थितिः स्यात्।
किन्तु प्रवृत्ते किल लोकतन्त्रे, निर्वाचनं तस्य भवत्यवार्यम्॥१॥
तां लोकतन्त्रस्य मतप्रणालीमुज्जीवयन् दर्शितवान् प्रयत्नात्।
राजेन्द्रवर्यो विधिशास्त्रशूरः, काङ्ग्रेसनिर्वाचनकार्यशौर्यम्॥२॥

सन् १९३६ तमे वत्सरे काङ्ग्रेसस्योनपञ्चाशत्तममधिवेशनं लखनऊ-नगरे श्रीमतः पं० जवाहरलालनेहरूमहोदयस्य सभापतित्वे सम्पन्नम्। आसँस्तदानीं केचन प्रमुखाः सदस्याः समाजवादेन प्रभाविताः। समाजवादि-दलस्य स्थापनमप्यभूत्। तस्य दलस्य सदस्यतां यद्यपि श्रीनेहरूर्नाङ्गयकरोत् परं तस्मिन्नासीत् तस्य वलनमवश्यम्। यूरोपयात्रानन्तरं स तस्य पक्षे स्वीयान् विचारान् प्रकटयन् निगदितवान्—

"समाजवादो मत्कृते न केवलमेक आर्थिकः सिद्धान्तोऽस्ति यन्मह्यं रोचते प्रत्युत तदेकं महत्त्वपूर्णं मतं विद्यते यदहं हृदयेन मस्तिष्केण च मन्ये। अहं भारतस्य स्वतन्त्रतायै कारणादस्मात् कार्यं करोमि यन्ममान्तः स्थितो राष्ट्रवादी विदेशिदास्यं सोढुं न शक्नोति। अहमेतदर्थमधिकाधिकं कार्यमस्मात् कारणादाचरामि यदहमेनं सामाजिकायार्थिकाय च परिवर्तना-यावश्यकमभियानं मानयामि।"

तदीययाऽनया दृष्टया श्रीराजेन्द्रप्रसादस्तथाऽन्ये केचन पुरातनाः काङ्ग्रेससदस्याः सम्मता नाभवन्। किन्त्वयं मतभेदो मूलप्रश्नेषु नासीन्न च परस्परं तेऽपि स्वीये मते आरोप्य स्वतन्त्रता-सङ्ग्रामे काठिन्यमुत्पाद-यितुमप्यैच्छन्। काङ्ग्रेस-समित्या निर्वाचने सहभागित्वाय निर्णीतं तथा तत्समये निर्वाचनोत्तरं पदग्रहणविषये किमपि नोद्घोषितम्। लक्ष्मणपुरीये ऽधिवेशने श्रीराजेन्द्रप्रसादेनैतद्विषयकः प्रस्तावोऽप्युपस्थापितो यश्च

तत्प्रेरणया विभाजनं विनैव स्वीकृतः। एवमेव— इथोपिया-विषयेऽप्येकः प्रस्तावस्तेन प्रस्तुतः सोऽपि 'सहानुभूति-प्रकटनावधिकः' पारितः।

संवत्सरोऽयं प्रान्तीयविधानसभानामागामिभ्यो निर्वाचनेभ्यः काङ्ग्रेसस्य वेगवत्यास्तत्परताया वर्ष आसीत्। १९३५ ई० वत्सरस्य विधानानुसारं तानि निर्वाचनानि १९३७ ई० वर्षस्यारम्भे सम्पद्यमानान्यासन् तथा तेषु द्विसहस्रमिताः प्रत्याशिनो निर्वाचनाङ्गणेऽवतारणीया अभवन्। प्रत्याशिनः काङ्ग्रेसदर्शाणां निदेशानां च पालकाः प्रतिज्ञाबद्धा भवेयुरित्यावश्यकमासीदेव। ईदृशानां प्रत्याशिनां चयनं निर्वाचनाय द्रव्यसङ्ग्रहश्चेत्युभयमपि कठिनं कर्माभवत्। समयानुसारं निर्वाचनघोषणापत्रमेकं प्रसारितं यस्मिन् काङ्ग्रेसेन प्रतिज्ञातमासीद् यद् "दलमिदं भूमेरुपयोगाधिकारपत्र-राजस्व-भूमिकर-प्रणालीषु संशोधनं करिष्यति, कृषियोग्यायां भूमौ यो भारोऽस्ति, तस्मिन् सन्तुलनमानेष्यति, लघीयांसः कृषका ये साम्प्रतं राजस्वं भूमिकरं च ददति तस्मिन् नैयून्यं विधाय सत्वरं साहाय्यं करिष्यति तथा हानिप्रदस्य भूभागस्य करं राजस्वं च परिहरिष्यति। काङ्ग्रेसनेदमपि प्रतिवचनं दत्तं यत् "तदीयं दलमुद्योगेषु सम्पृक्तेभ्यः कर्मकरेभ्यो जीवनस्योन्नतस्तरीयां व्यवस्थां विधाय तेभ्यः स्वकीय-सङ्घटन-निर्माण-सौविध्यं च प्रदाय तेषां स्थितिं समुन्नेष्यतीति।"

घोषणाऽनुसारं काङ्ग्रेसकार्यकर्तृष्विदमावश्यकत्वेनापतितं कार्यमभूद् यत् ते स्व-स्व-प्रदेशेषु जनपदेषु मण्डलेषु ग्रामेषु च गत्वा दलस्य सन्देशं जनान् यावत् प्रापयितुं निर्वाचन-घोषणापत्रस्य व्यवस्था अवगमय्य काङ्ग्रेसाय भारतस्य स्वतन्त्रतायै जनतायाः सहयोग-प्राप्तये च परिभ्रमणानि कुर्युः। काङ्ग्रेस-प्रत्याशिनां चयनं लघुलघूनां दलानां समूहानाञ्च प्रभावाद् दूरे स्थित्वा निष्पक्षं विधातुम्-'अखिल-भारतीय-काङ्ग्रेस-समितेः संसदीय-मण्डलस्य' सङ्घटनमप्यभवत्, तस्याध्यक्षेषु श्रीसरदारपटेलाः, मौलाना आजादः श्रीराजेन्द्रप्रसादश्चासन्।

इत्थं सामूहिक-कार्य-सम्पादनेन सहैव श्रीमता राजेन्द्रप्रसादेन बिहार-प्रदेशेऽपि निर्वाचनस्य बहूनि कार्याणि सम्पाद्यान्यभूवन्। आसीत् स हि महानुभावः प्रान्तीय-काङ्ग्रेस-समितेरप्यध्यक्षः। परं —

यत्रास्ति धैर्यं पटुता च बुद्धेर्विराजते यत्र विनम्रता च।
विघ्नास्ततो दूरतरं व्रजन्ति, सिद्धिश्च साक्षादुपयाति शीघ्रम्॥३॥

इत्यनुरूपं विनाकलहमेव बिहारप्रत्याशिनां चयनं सम्पन्नम्। विषयेऽस्मिन् प्रामुख्येन श्रीराजेन्द्रप्रसादस्य नैपुण्यमेव प्रभावशाल्यवर्तत। यत्र

हरिजनानां बाहुल्यमासीत् तत्र तेषां नेतृभिः सह विचार्य निर्णयो विहितः। अत एव तेषु बहवो निर्विरोधमेव निर्वाचिताः। यत्र जातिवादिनां प्रामुख्यमवर्तत तत्रानिच्छयाऽपि सङ्कटवारणाय तादृशाः प्रत्याशिनो नियुक्ताः। कृषकसभाया नेतॄणां **स्वामिसहजानन्दसरस्वतीना**मपि सम्मतिर्निर्देशनानि च स्वीकृत्य तत्सदस्यानां नामानि सद्भावनापूर्वकं गृहीतानि। एवंविधेन कौशलेन विना पारस्परिकवैमनस्येन यथोचिते यथाभिलषिते च स्थाने छन्दाकलनाय निर्धारणात् सर्वेऽपि सन्तुष्टा भूत्वा पूर्णेन प्रयासेन निर्वाचन-प्रचारे संलग्नाः।

बिहार-प्रान्ते काङ्ग्रेसस्य ससम्मानं विजयेन सहैव निर्वाचनं समाप्तम्। ततः परं श्रीराजेन्द्रप्रसादः स्वदेशस्यान्येषु भागेषु छन्दाकलन-व्यवस्थालोकनाय समुचितसाहाय्य-प्रदानाय प्रचाराय च यात्रा आकर्षीत्। उत्तरप्रदेशेऽवधधामपुरादिषु मण्डलेषु मध्यप्रदेशे जबलपुर-जनपदे महाराष्ट्रस्य कर्नाटकस्यान्ध्रस्य च बहुषु नगरेषु बम्भ्रम्य तत्र-तत्र काङ्ग्रेस-कार्यकर्तॄन् समुद्बोध्य जनतां 'कर्तव्याकर्तव्यविवेचनपुरस्सरं भारतस्य भाविनीं स्वतन्त्रतामभिलक्ष्य काङ्ग्रेसदलस्यैव हस्ते शासन-व्यवस्थार्पणेन देशस्य कल्याणं भविष्यतीति च सयुक्ति प्रतिपाद्य' भूयांसं परिश्रमं व्यदधात्। निर्वाचनानां फलश्रुतिरतीवानुकूला समपद्यत। काङ्ग्रेसाय षट्सु प्रान्तेषु पूर्णं बहुमतं प्राप्तम्।

'बिहारोत्कल-संयुक्तप्रान्त-मध्यप्रान्त-मद्रास-बम्बई'-प्रान्तेषु काङ्ग्रेस-विजयानन्तरं १९३७ ई० वर्षस्य मार्चमासे सप्तदशाष्टादश-दिवसयोर्देहल्यां 'भारतीय-काङ्ग्रेस-समिते'रेकमुवेशनमभूत्। तत्र च निर्णीतं यद् येषु प्रान्तेषु काङ्ग्रेसेन स्पष्टतया बहुमतं प्राप्तं तत्रत्याः सदस्या विधान-सभासु पदानि गृह्णीयुः परं मन्त्रिपदं तावन्न स्वीकुर्युर्यावत् काङ्ग्रेस-नेतारो विश्वस्ता न स्युस्तथैवं सार्वजनिकरूपेण घोषयितुं न प्रभवेयुर्यत् प्रान्ताधीशाः "हस्तक्षेपाधिकारस्य स्वकीयविशेषाधिकारस्य प्रयोगं न करिष्यन्ति न च वैधानिकानां कार्यकलापानां सम्मतिममान्यां विधास्यन्ति।" इति।

एतन्निर्णयानुसारं प्रारम्भे वैधानिको गतिरोध एव प्राचलत्। प्रान्ताधीशा निर्णयं स्वीकर्तुं नैच्छन्। काङ्ग्रेससदस्यानां पदग्रहणाभावेऽन्य-दलनेतॄनामन्त्र्य मन्त्रिमण्डलान्यपि निर्मितानि किन्तु विरोधबाहुल्येन पराजित्यान्ते भारतस्य महाधिशासकेन वक्तव्यमेकं प्रकाशितं यस्मिन् 'विशेषाधिकारसत्त्वेऽपि तत्प्रयोगाकरणमप्रत्यक्षतया स्वीकृतमासीत्।' तेन गतिरोधः समाप्तः। घोषणापत्रानुसारं प्रतिज्ञा-पूर्वकं काग्रेसनीतेः पोषणाय रचनात्मक-कार्याणाञ्च कार्यान्वियनाय निर्वाचिताः सदस्या मन्त्रिपरिषन्निर्माणाय पदग्रहणाय चानुमताः।

बिहारप्रान्ते श्रीकृष्णसिंहः प्रधानमन्त्रित्वेन वृतः। अन्येऽपि मन्त्रिणो नियुक्ताः। श्रीराजेन्द्रप्रसादस्य मूल्यवन्मार्गदर्शने शासनकार्याणि गतिमन्ति सम्पन्नानि। एवमेवान्येषु प्रान्तेष्वपि काङ्ग्रेस-मन्त्रिमण्डलानि कार्यरतान्यभूवन्।

वर्षाणामनवरत-श्रमाप्तलक्ष्यं,
सम्प्राप्तं जगदवलोक्य मोदमानम्।
नेतॄणां विनतधियाऽथ धन्यवादैः,
कार्तज्ञ्यं सुचिरममंस्त कर्मनिष्ठम्॥ ४॥

काङ्ग्रेस-मन्त्रिमण्डल-प्रवर्तनेन भारतीयानां मनांसि स्वतन्त्रतां प्रति किञ्चिदाश्वस्ता भूत्वा कालं प्रतीक्षमाणा इवोत्तरोत्तरं देशसेवासु दत्तचित्ता अभवन्। मन्त्रिणः सदस्याश्च कर्तव्यपालनपद्धत्या शासनकार्याणि सम्पादयन्तः स्व-स्व-बुद्धिबलोदयानुरूपं भू-शोधन-कृषक-प्रतिनिधि-विमर्श-सम्भाव्यादेश-प्रसारण-हितकारि-नियमविधानादिषु सचेष्टा अवर्तन्त।

श्रीराजेन्द्रप्रसादस्तु कर्मयोगित्वेन विराममकृत्वैव निर्वाचनानन्तरं प्रान्तेषु यत्र कुत्रापि काठिन्यं वैषम्यं वैधानिकं सङ्कटं मतभेदं वा समुपातिष्ठत् तत्रैव सत्वरं गत्वा स्वविवेकेन मन्त्रिणां परामर्शेण नेतॄणां विमर्शेण विनामर्षेण सामञ्जस्यं समपादयत्। उत्कले वा भवतु पश्चिमबङ्गे वा; संयुक्तप्रान्ते वा भवतु मध्यप्रान्ते, मद्रप्रान्ते वाऽस्तु पश्चिमसीमाप्रान्ते वा, हिन्दू-मुस्लिम-सिखपारसीकादि-जातीया वा सन्तु राष्ट्रिये कर्मणि सर्वेऽपि भारतीया एवेति दृढं निश्चित्य श्रीमहात्मगान्धिन आदर्शानुरूपं स्वराष्ट्रहितं पुरः कृत्वा स्वानुभवगरिम्णा कर्तव्यान्यदिशत्।

अहर्दिवं कार्यव्यापृत्या श्रान्तस्य श्रीमतो राजेन्द्रप्रसादस्य स्वास्थ्यं क्रमशः क्षीणमभवत्। विराम-दृष्ट्या स्वग्रामं जीरादेईं स कियत्कालं यापितवान् परं स्थितेरननुकूलत्वादुपचाराय पटनाचिकित्सालयं प्रापितस्तत्र च मासद्वयमुषित्वा स्वास्थ्योपचारमग्रहीत्। तत्रैव कानपुरस्य-यन्त्रालयकर्मकराणां स्थितेः परीक्षणस्य प्रतिवेदनं विवादशान्तेरुपायांश्चालिखत्। उत्तरप्रदेश-बिहारयोरागतं वैधानिकं सङ्कटञ्च निराकरोत्। स्वास्थ्यलाभानन्तरं स काङ्ग्रेसशासनस्य रचनात्मककार्येषु सम्बद्धः सन् मूल्यवतीनां योजनानां प्रवर्तनाय शिक्षानीतेरुन्नयनाय काङ्ग्रेसस्य महत्त्वपूर्णानां कर्मणां निर्णयाय च प्रत्यहं संलग्नमानस एवातिष्ठत्। महाराष्ट्रे नासिक-त्र्यम्बकस्थले च विश्रान्तिकामनया कानिचिद् दिनानि श्रीराजेन्द्रप्रसादेन व्यतिगमितानि प्राचीनैतिहासिकमहत्त्वशालिनां ध्वंसावशेषाणां तथा प्राकृतिकधार्मिक-स्थानानां दर्शनेन सहैव गोकर्णस्य वेदविदुषा **पं० देवव्रतब्रह्म-**

चारिणा सह वेदानामुपनिषदां च विषये विचारविनिमयेनात्मानो ज्ञानवर्धनमाचरितवान् ।

स्थितौ समायामथवाऽसमायां, जनः सदैवात्मविचार-निष्ठः ।
संस्कारपूतानि विधाय कर्माण्यहर्निशं जीवनमुन्नयेत् स्वम् ॥५॥

नासिकतो मुम्बईं गत्वाऽस्वास्थ्यवशात् तत्रैवोपचारान् कारयित्वाऽपि सुखमलभमानः श्रीराजेन्द्रप्रसादो महात्मनां निर्देशानुसारं वर्धां गतः । तत्र वसता तेन मध्यप्रदेशासमप्रान्तयोर्मन्त्रिमण्डलयोः सङ्कट-निवर्तनाय तथा बिहारि-बङ्गवासिनां कलह-वारणाय पूर्णः प्रयास आहितः । तेष्वेव दिवसेषु जबलपुरस्य निकटवर्तिन्यां 'त्रिपुरी' नगर्यां सम्पाद्ये काङ्ग्रेसस्य द्वापञ्चाशद्वर्षीये भाविनोऽधिवेशनस्याध्यक्षताविषये कश्चन विवाद उत्पन्नः । बहवो जना मौलाना-आजादस्य पक्षेऽवर्तन्तान्ये श्रीमन्तं सुभाषचन्द्रवसुमेव पुनस्तत्रोपवेशयितुं कामयन्ते स्म । प्रान्ते सुभाष एव जितः परं रुग्णतावशादधिवेशने नोपातिष्ठत् । श्रीमहात्मगान्धिनां निर्विवादरूपेण विश्वासभाजनाभावप्रस्तावस्वीकृत्या श्रीसुभाषचन्द्रेणाध्यक्ष्यात् त्यागपत्रं प्रदत्तं तत्स्थाने च पुनः ३० अप्रैल १९३९ ई० दिने श्रीराजेन्द्रप्रसादः काङ्ग्रेसाध्यक्षो निर्वाचितः ।

काङ्ग्रेसाध्यक्षरूपेण काङ्ग्रेसदले विद्यमानान् विवादान् समाधातुं श्रीराजेन्द्रप्रसादेन बहुशः प्रयतितम् । उत्कलप्रान्ते मध्यप्रान्ते च काङ्ग्रेससदस्येषु ये विवादा आसंस्तेषामपि समाधानं यथाशक्ति तेन विहितम् ।

काङ्ग्रेसस्य मोहमय्यधिवेशने स्वीकृतानां केषाञ्चित् प्रस्तावानां श्रीसुभाषचन्द्रो वसुर्विरोधं कृतवांस्तदा श्रीराजेन्द्रप्रसादेन तस्मै काङ्ग्रेसत्यागाय कथनास्याप्रीतिकरं कार्यमपि करणीयमभूत् । श्रीराजेन्द्रप्रसादो मईमासे 'राजनीतिकबन्दीदिवस'-समायोजनाय निवेदनं प्रकाशितवान् । एवमेवान्येषु काङ्ग्रेसकार्येषु यथाकालमुपस्थितानां समस्यानामपि समाधानं कर्तुं स सदा सज्ज एवावर्तत । अत एव सर्वेषां श्रद्धा श्रीराजेन्द्रप्रसादे बलवत्तया व्यराजत ।

स्वयं विशुद्धोऽन्यजनान् विशोद्धुं, निष्पक्षपातं भवतीह शक्तः ।
प्रत्यग्रमुद्योतितसत्स्वभावे, श्रद्धां विधत्ते सकलोऽपि लोकः ॥६॥

विश्वयुद्ध-बिभीषिका

जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवो रुचः सुरुचो रोचमाना इडा येषां गण्या महिना गीः ॥

(ऋ० ३ । ७ । ५)

स्वार्थ-वृत्ति संश्रितैरथ वैभवार्जन-कामुकै—
र्हास-रास-विलासशासित-वासनान्वित-मानसैः ।
लोभ-वृत्ति-समूर्जिता भुवि विश्वशान्ति-विनाशिका,
व्यावृतिं गमिता समन्ताद् विश्वयुद्ध-विभीषिका ॥१॥

काङ्ग्रेसस्य नीतिः प्राधान्येन स्वातन्त्र्यप्राप्तिं प्रति सावधानाऽवर्तत किन्तु तस्यां भारतीयानां कल्याणकामनाया उपेक्षणं कथमपि कुत्रापि नासीत् । राष्ट्रसेवाया एकमनुशासितं प्रभावकारि च माध्यमं भूत्वा काङ्ग्रेसदलस्य कार्यकर्तारः परीक्षणघटिकास्वपि स्थैर्येण धैर्येण च समस्यानां समाधानानि कर्तुं सर्वथा क्षमाः स्युरिति सर्वे वाञ्छन्ति स्म । १९३९ ई० वर्षस्य जूनमासे २४ तः २७ दिनाङ्कान् यावद्—'अखिलभारतीयकाङ्ग्रेस-समिते'—र्यदधिवेशनं सम्पन्नं तस्मिन् सभापति-पदाद् भाषमाणेन श्रीराजेन्द्र-प्रसादमहाभागेनोक्तम् —

"विश्वयुद्धस्य विभीषिका निरन्तरं वर्धमाना विद्यते । अस्य सङ्कटस्य साम्मुख्यं विधातुं तथाऽस्मिन् युद्धेऽस्मानपि संयोक्तुं विधीयमानानां सर्वेषां प्रभावाणां विरोधायास्माभिः सज्जैर्भवितव्यम् ।"

इत्थमेव देशस्याग्रे समुपस्थितानां समस्यानां विचारं प्रस्तुवता तेन ध्यानमाकृष्टं यत्—"समुद्रपारं स्थितानां भारतीयानां काठिन्यं देशिराज्यानां विकृतिं यान्ती स्थितिर्यत्रत्याः शासका अथवा तेषां परामर्शदातारः सर्वोच्च-शक्तेः साहाय्येन स्वकीयां प्रजां प्रति दमननीतिमाश्रयन्ते, निर्लज्जामपराधि-समूहवृत्तिं च श्रयन्ते, गत्यवरोधस्थितिर्या देशोन्नतौ हानिकरी विद्यते, साम्प्रदायिकसद्भावाभावस्तथा स्वयं काङ्ग्रेस-सदस्येषु वैमनस्य-विस्तार इमे सर्वेऽपि न समीचीनाः सन्ति । अतः सर्वैरपि राष्ट्रसेवा-परायणैः सावधानतया स्थातव्यं योग्येषु कर्मसु च योक्तव्यमिति ।"

सङ्कटश्चायं सत्यमेव न चिरादेव समुपागच्छत् । ३ सितम्बर १९३९ ई० दिने इङ्ग्लैण्डेन नाजीजर्मनस्य विरुद्धं युद्धं प्रारब्धम् । तस्मिन् विश्वव्यापिनि महति युद्धे मानवतैकस्या गभीराया अभूतपूर्वाया अग्नि-परीक्षायाः साम्मुख्यं कुर्वत्यवर्तत । तद् युद्धं सभ्यताया मूलाधार एव

प्रचण्डमाक्रमणं तथा शान्ति जनतन्त्रं च हिंसकमाह्वानमकरोत्। भारतायापीदमेकस्य कृच्छ्रस्यानिष्टस्याकारणाप्रदं प्रमाणमभूत्। भारतस्य राष्ट्रियनेतॄणां परामर्शं विनैव महाधिनायकेन लार्डलिनलिथगो-महानुभावेन भारतं युद्धरतं राष्ट्रमुद्घोषितं तथा विश्वस्य महत्सु राष्ट्रेषु तस्य यत्स्थानमस्ति तदनुरूपमाचरितुं तस्याह्वानं कृतम्।

एतस्यां परिस्थितौ विचाराय वर्धायां काङ्ग्रेसकारिण्या एकमुपवेशनं विहितम्। श्रीराजेन्द्रप्रसादस्यास्वास्थ्यवशात् प्रामुख्येन श्रीगान्धिमहात्मभिः श्रीमहादेवभाई 'रामगढ'-पत्तनं तमानेतुं प्रेषितः। श्रीजवाहरलालोऽपि विदेशात् प्रत्यावृतोऽभूत्। उपवेशने तत्र बलवद्भिः शब्दैर्नाजीवादस्य फासिस्टवादस्य च निन्दा कृता। परं युद्धसम्बन्ध्युत्तरदायित्वं ध्यायता तेन 'भारतीयजनतायाः सहमतिं विना' भारतस्यापि युद्धरतानां राष्ट्राणां श्रेण्यां परिगणनस्य विरोधो विहितः। एकेन वक्तव्येन ब्रिटिशशासनमप्यनुरुद्धं यत्तत् स्वच्छरूपेण घोषयेत् "यद् जनतन्त्रस्य तथा साम्राज्यवादस्य विशेषतया नूतनव्यवस्थाया विषये, यस्याः परिकल्पना प्रचलति, तस्याः कानि लक्ष्याणि सन्ति किञ्च भारते केन प्रकारेण तानि प्रवर्त्स्यन्ति तत्कालं च फलवन्ति करिष्यन्त" इति।

वर्धायामक्तूबरमासे पुनराकारिते ह्य पवेशने श्रीराजेन्द्रप्रसादेनाध्यक्ष्यं कुर्वता युद्धघोषणानन्तरमुपस्थितस्य सङ्कटस्य तथा कर्तव्यानां कर्मणां प्रतिबोधनेन सहैव वर्तमान-सङ्ग्रामे भागग्रहणाय परेषां देशानां प्रक्रियाविषये च स्थितिं स्पष्टयता स्वीया विचाराः प्रस्तुताः। सर्वसम्मत्या स्वीकृतं यद्—ब्रिटिशशासनं 'युद्धस्योद्देश्यानि शान्तेरुद्देश्यानि च घोषयेत्' तथा 'भारतं निश्चितरूपेणैकं स्वतन्त्रं राष्ट्रं घोषितं स्यात् किञ्च तदीयाधिकारान् तत्कालमधिकाधिकरूपेण प्रवर्तयेत्।' अथ च भारतीयस्वतन्त्रताया आधार आवश्यकरूपेण जनतन्त्रमैक्यं च भवेत्। तस्मिन् सर्वेषामल्पसंख्यकानां तेषामधिकाराणां स्वीकृतिः संरक्षणं च भवेद् यदर्थं काङ्ग्रेसदलं सर्वदा प्रतिज्ञाबद्धमतिष्ठत्।"

मुस्लिमलीगस्य मनीषा काचिदन्यैवावर्तत। तदीयाः सदस्या वाञ्छन्ति स्म यद् "अस्माकं सहमतिं विना न काऽपि वैधानिकप्रगतये घोषणा क्रियेत न वा किमपि विधानं निर्मीयेत" इति।

एवं विभिन्नविचारधारावतां प्रायो द्वापञ्चाशद्भारतीयनेतॄणां निवेदनानुसारं महाधिनायकेन वक्तव्यमपि प्रकाशितं परं नासीत्तस्मिन्नपि किमपि समाधानात्मकं घोषणं, तन्निरीक्ष्य श्रीराजेन्द्रप्रसादेन कथितं— "इदं निराशाजनकं विद्यते किन्त्वाश्चर्यजनकं नास्तीति।" पुनश्च तेन कथितं-

दुर्भाग्यमस्येदं यद् ग्रेटब्रिटेनस्य पक्षे सहानुभूतिं सद्भावं च विनश्यद् विधाय भूयोऽपि सन्देहाविश्वास-दुर्भाग्यानि प्रवहणायोन्मोचितानि। अधुनाऽस्मिन् नास्ति कश्चन सन्देहो यद् ब्रिटेनस्य नीतौ किमपि परिवर्तनं न जातम्।"

स्थितावस्यां काङ्ग्रेसमन्त्रिमण्डलानि त्यागपत्रदानायादिष्टानि। सङ्घर्षस्य सज्जतायै तथाऽनुशासितायाः कार्यवाहिन्याः सङ्कल्पाय 'स्वतन्त्रता-दिवसो' त्सवायोजनाय च निर्णीतम्। समारोहस्यास्य साफल्याय चैकं निवेदनमपि प्रकाशितं, यस्मिन् जनतां प्रोद्बोधयता श्रीराजेन्द्रप्रसादेन कथितमासीत्—

प्राप्स्यामो नहि यावदत्र नियतं स्वातन्त्र्यमव्याहतं,
स्थास्यामो न विनिश्चला इति महत्सङ्कल्पमेनं सदा।
प्रत्यब्दं किल यद्दिने दृढतरा आवर्तयामो भृशं,
सम्मान्यं पुनरेव तद्दिनमिदं हर्षोत्सवैः साम्प्रतम् ॥२॥

शरीराणि तथात्मानो, निबद्धा याभिरत्र नः।
विदेशिशासनस्याशु, विभज्याः शृङ्खलाः समैः ॥३॥

प्रत्येकं तेन राष्ट्रेण, दुर्बलेन कृशेन च।
मृत्योश्च सर्वनाशस्य, दायित्वं ग्राह्यमेव तत् ॥४॥

दासेन स्वामिना साकं, दास्यदायित्वनिर्वहः।
तथा घृणायां भागित्वं, प्राप्तव्यं सर्वथा भवेत् ॥५॥

साम्राज्यवादस्य सदैव सृष्टिं, कुर्वन्ति शक्त्या रहिता मनुष्याः।
अतः स्वशक्त्यै दिनमेतदात्म-निरीक्षणस्यैव च वेदनीयम् ॥६॥

किञ्च वयमात्मनो हृदयानि पश्येम यदस्माभिः स्वस्य वैयक्तिकेन राष्ट्रियेण चाचरणेन स्वस्या यन्त्रणाया अवधिस्तु न वर्धितः? वयं स्वयं स्वान् पृच्छेम यद् किं वयं स्वेषामुच्चादर्शान् प्रति श्रेष्ठोद्देश्यानि तथा शुद्धसाधनानि प्रति, यान्यस्माभिः स्वेषां लक्ष्यप्राप्तये सम्मुखं स्थापितान्यासन्, सत्या अतिष्ठाम? प्रत्येकं जनः स्वयं स्वं पृच्छेद् यत् किं मया स्वस्माद् जीवनात् साम्प्रदायिकताया एकैकं लाञ्छनमपाकृतमस्ति? किं मया धर्मानुयायिनो मतवादिनो जनान् स्वीयाः सहोदरा भ्रातरो ज्ञाताः? हिन्दूरूपेण किं मयाऽस्पृश्यत्वस्य कलङ्कस्यापसारणाय तनीयोऽपि कार्यमाचरितम्? किं मया दुर्बलसम्प्रदायवतां प्रगतेर्मार्गो वैयक्तिक-महत्त्वाकांक्षाणां हेतवे तु नावरुद्धः? किं मया दैनिकावश्यकतानां तथा क्रयकाले सप्तलक्षग्रामाणां क्षुधितानां कोटिशो जनानां स्मरणं कृतम्? किं मया-

ऽऽत्मनो व्यक्तिगतेनोदाहरणेन तेषां समक्षमयं विचार उपस्थापितो यत् तैः स्वस्य साहाय्याय किं कर्तव्यमिति ?"

एवंविधान् राष्ट्रियभावनासंवलितान् कर्तव्यबोधकान् विचारानुपस्थाप्य श्रीराजेन्द्रप्रसादेनात्मसम्मानरक्षायै न्यायसङ्गत-मानवोचित-विश्वव्यवस्थायै सत्याहिंसासंरक्षणाय साङ्कटिके काले च धैर्यधारणाय जनताः प्रबोधिताः।

त्रिपुरीतः परावर्तनानन्तरं '**लघु-नागपुर**'स्य निकटे '**रामगढ**'-स्थाने काङ्ग्रेसस्य त्रिपञ्चाशत्तममधिवेशनं '**मौलाना अबुल-कलाम आजाद**'-स्याध्यक्ष्ये सम्पादनाय धनसङ्ग्रहादीन् विधाय सर्वा अपि तस्य व्यवस्थाः पूर्णपरिश्रमेण व्यधात् । आसीदस्मिन् श्रीराजेन्द्रप्रसादः स्वागतसमितेरध्यक्षः । ततः परं तेन 'शिक्षासमितेः प्रतिवेदनं' निर्माय शासनाय प्रहितम् । कर्मचारि-निरीक्षण-समितेरपि प्रतिवेदनं सज्जीकृतं तथा 'स्वयंसेवकप्रशिक्षण-शिबिरे' स्वयंसेवकाः सूत्रकर्तनयन्त्रचालन-सत्याग्रहात्म-संयमानुशासनादिविषयप्रशिक्षणं स्वयं स तत्रोषित्वाऽदात् । अतिव्यस्ततया श्रान्तिमस्वास्थ्यं चानुभवँश्चिकित्सकपरामर्शानुसारं च जीरादेईं विश्रामायागच्छत् ।

अहो ! मनीषि-प्रवरस्य निष्ठा, राष्ट्रस्य सेवार्थमहो ? प्रयासाः ।
अहर्निशं कर्म-परायणत्वं, राजेन्द्र-चन्द्रे व्यलसत् प्रशस्तम् ॥७॥

* *
*

१३

प्रीति-कला

साम्प्रदायिक-सद्भावना-प्रयासाः

असम्बाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥
(अथर्व० १२।१।२)

धर्मः शिक्षयते मिथो नहि जनाः! शत्रुत्व-सन्धारणं,
नो वा सन्ति च सम्प्रदाय-नियमा विद्वेष-शिक्षा-प्रदाः।
दुर्बुद्ध्या परमत्र केचन सदा स्वार्थान्धता-संवृता,
एकत्वं ननु खण्डयन्ति जनयन्त्यश्रान्तमेवारतिम् ॥१॥

साम्प्रदायिक-सद्भाव-भावना-भावनार्थनाम्।
ईप्समाना विश्वशान्त्यै, प्रारभन्ते मनीषिणः ॥२॥

विश्वयुद्ध-प्रवृत्त्या सहैवान्ताराष्ट्रियाः परिस्थितयो विकृता मित्र-राष्ट्राणाञ्च स्थितयोऽपि शोचनीयतां गताः। शार्मण्यदेशेनोत्तरोत्तरं विजयो लब्धः। इटली-देशेन सह तस्य सन्धिरभूत्। फ्रान्सस्य पराजयेन तथा यूरोपे शार्मण्यदेशस्य प्रभुत्वेन ब्रिटेनो न केवलं गम्भीरे सङ्कटे निपातितः परं भारतेऽपि महती चिन्तोत्पादिता। एतेन काङ्ग्रेस-दलेनापि सङ्कटकालिकी समितिर्देहल्यामायोजिता। श्रीराजेन्द्रप्रसादोऽपि तस्यामुपस्थित आसीत्। तस्यां भारतस्य पूर्णस्वातन्त्र्याधिकारस्य स्वीकृत्या सह केन्द्रेऽस्थायिनो राष्ट्रियसर्वकारस्य स्थापनया देशे व्याप्तस्य गतिरोधस्य दूरीकरणाय शासनं सूचितमासीत्।

श्रीगान्धिनामनुसारं हिंसा-नीतौ स्थैर्यमाचरितव्यं तथा युद्धप्रयत्नेषु ब्रिटेनाय सक्रियं साहाय्यं न कर्तव्यमिति विषये सर्वेऽपि काङ्ग्रेस-सदस्येष्वैकमत्यं नाभूत्। मतभेदकारणाद्ये गान्धिनोऽनुयायिनोऽभूवँस्तै-राजेन्द्रप्रसाद-प्रफुल्लचन्द्रघोष—जे० बी० कृपलानी—शङ्करराव—खान अब्दुलखफ्फार-खां—प्रभृतिभिः काङ्ग्रेसकार्यकारिणीसमितेः सदस्यतायास्त्यागपत्राण्यपि दत्तानि, परं मौलाना आजादस्य प्रयत्नेनानुरोधेन च तानि परावर्तितानि।

पुण्यपत्तने वसतः श्रीराजेन्द्रप्रसादस्य स्वास्थ्यं पुनर्विकृतम्। तस्माद्

वर्धायां जयपुरे पटनायां सीकरे च कतिपये दिवसा व्यतिगमिताः। सीकर एव श्रीराजेन्द्रप्रसाद "आत्मकथा"या आलेखनं प्रारभत।

दिल्ल्यां स्वीकृतः प्रस्तावो भारतस्य महाधिशासकाय प्रेषितः परं तेन यद् वक्तव्यं प्रवर्तितं तेन निराशैवान्वभूयत। विशिष्य च भारताय नियुक्तो राज्यसचिवः **एल० एस० एमरी**-महोदयो (हाउस आफ कामन्स) ब्रिटिश-संसदि विचारणायामेवं प्राभाषत यद्"भारते प्रतिनिधि-निर्वाचिनीषु संस्थासु काङ्ग्रेस-मुस्लिमलीगानुसूचितजातिषु तथा देशीयनरेशेषु सहमतेरभावाद् वैधानिको गतिरोधो विद्यते।"

भारतीय-राष्ट्रिय - काङ्ग्रेसेन ब्रिटिशशासनस्य तादृशीं दृष्टिं भारतस्य राष्ट्रियाणां हितानां विरोधिनीं मत्वा तद्विरोधाय श्रीगान्धिनः पुनरपि नेतृत्वं मार्गदर्शनं चेप्सितम्। तेषां परामर्शानुसारं वैयक्तिक-सत्याग्रह-योजना स्वीकृता। **श्रीविनोबाभावे**महानुभावः पवनार-ग्रामे युद्ध-विरोधिना भाषणेन सत्याग्रहं प्रारब्धवान्। बिहारप्रान्ते श्रीराजेन्द्रप्रसादोऽस्वास्थ्यवशात् तथा कर्तुं नाशक्नोत् परं तादृशस्य सत्याग्रहस्य नेतृत्वं श्रीकृष्णसिंहो निरवहत्। मध्ये श्रीगान्धिनां निर्देशपालनाय श्रीराजेन्द्रप्रसादो जनानवश्यं निरदिशत्। काङ्ग्रेसाध्यक्षस्य मौलाना - आजाद-महाभागस्य निग्रहणानन्तरं श्रीगान्धिनस्तस्याध्यक्ष्यं निर्व्यूढवन्तस्तेषामिच्छया च श्रीराजेन्द्रप्रसादः पुनर्वर्धायां गतवान्। श्रीगान्धिनां निर्देशान् मैसूर-पत्तने राजनीतिकं सम्मेलनमेकमुद्घाट्य तत्रस्थानां प्रशस्यस्थलानां विविध-प्राकृतिकस्थापत्यकलादीनां निरीक्षणेन सोऽतीव सन्तोषमाप्नोत्।

देशस्यास्य विभिन्नभूमिपटले भूयांसि नैसर्गिक—
स्थानानि प्रसृतानि सन्ति सहसा यानीह दृष्ट्वा जनः।
आश्चर्यं कुरुते मुदं वितनुते धन्यं वदत्यञ्जसा,
लोकं लोकयितुं निवेदयति च श्रेयः सुखं विन्दति ॥३॥

आङ्ग्लानां कूटनीत्या प्रभाविताः केचन स्वार्थान्धाः साम्प्रदायिकं तत्त्वमुद्बोध्य हिन्दू-यवनयोः परस्परं विद्वेषं जनयितुं राष्ट्रियं दृष्टिकोणमज्ञात्वा मुस्लिमलीगमाध्यमेनान्तरिकं कलहं च प्रवर्तयितुं तत्परा अभूवन्। काङ्ग्रेस-कार्यकर्तृभिर्भूयोभूयः समानराष्ट्रियताधिकारेण वैदेश्यानां भारताद् गमनानन्तरमेकगृहवासिनां पारस्परिक-विवाद-शमनाय च प्रार्थिता बोधिता अपि मुस्लिमलीगनेतारो हठवृत्तिं नात्यजन्। **मुहम्मदअली जिन्ना** च स्वीये नेतृत्वे मुस्लिमलीग-संस्थां प्रतिनिधिसंस्थां स्वीकर्तुं तथा यवना अल्पसंख्यका न सन्ति परं त एकं राष्ट्रं सन्ति, तस्मात् तेषां स्वतन्त्रं गृहं भवेत्, शासनक्षेत्रं भवेत्, स्व-तन्त्रं पाकिस्तानराज्यं भवेत्, पश्चिमोत्तर-पूर्वभागा

—येषु यवना आधिक्येन वसन्ति, तेषां स्वतन्त्रं सार्वभौमसत्तासम्पन्नं राज्यं भवेदिति, लाहौराधिवेशने सिद्धान्ततयाऽघोषयत् ।

मुस्लिमलीगस्यैव मद्रपुर्यधिवेशने श्रीजिन्नाः पुनरपीमां पाकिस्तान-सम्बन्धिनीमधियाचनामाम्रेडयन् काङ्ग्रेसदलं बहुधाऽध्याक्षिपत् । श्रीराजेन्द्र-प्रसादस्तामधिकृत्य प्रत्येकमारोपं स्ववक्तव्यप्रकाशनेन खण्डयन्नुत्तरितवान् । तस्मिन् वक्तव्ये श्रीराजेन्द्रप्रसादेन वैयक्तिकानामारोपाणां तथा संस्था-सम्बद्धानां तर्काणां युक्तियुक्तैः प्रमाणैः समाधानं प्रस्तुतं तथा साम्प्रदायिकं वैमनस्यं विहाय भारत-राष्ट्रस्य हिताय तत्स्वातन्त्र्यप्राप्तये च सर्वेषां भारत-वासिनां सौमनस्यायापि निवेदितं किन्तु सकलोऽपि प्रयासो निरर्थकः संवृत्तः । प्रतिक्रियावादिनीनां शक्तीनां तथा निरन्तरं विरुद्धप्रचारस्य कारणादुभयोः सम्प्रदाययोः सम्बन्धा उत्तरोत्तरं विकृतिं प्राप्तवन्तः किञ्च साम्प्रदायिकताया वह्निः प्रस्फुटितः, यस्य कारणाद् बिहार-शरीफ-मण्डले भीषणः साम्प्रदायिक उपद्रवः प्रारब्धः ।

दुर्भाग्यपूर्णायास्तस्या घटनायाः समाचारेण खिन्नः श्रीराजेन्द्रप्रसादः स्वसहयोगिभिः साकं तत्रोपयातः, शान्तिसमितीनां सङ्घटनाञ्चाकार्षीत् परन्तून्मादः स नाशाम्यत । कालान्तरेण बिहार-प्रदेशे स व्याप्तः । आतङ्क-पूर्णया स्थित्या परिचाययितुं श्रीकृष्णसिन्हामहोदयस्तडित्सन्देशं श्रीराजेन्द्र-प्रसादाय प्राहिणोत् । ततस्तत्रागत्योपद्रवप्रशमनोपायांश्चिन्तयन् स श्री-गान्धिमहाभागानपि समसूचयत् । श्रीगान्धिनस्तदर्थं वक्तव्यमेकं प्राकाशयन् जनान् धैर्याय साम्मनस्याय साम्प्रदायिकसद्भावनार्थं च प्राबोधयन् । श्रीराजेन्द्रप्रसादश्च स्वसहयोगिनो नीत्वा तत्तदुपद्रवग्रस्तस्थलेषु भ्रान्त्वा 'अहिंसा-मैत्री-शान्ति' सन्देशान् दत्त्वा दत्त्वा चातीव श्रममकरोत् ।

'आजाद-मुस्लिम-सम्मेलन'स्यैकस्मिन्नधिवेशने भाषभाणेन श्रीराजेन्द्र-प्रसादेन स्पष्टमेवोद्घोषितम्—

अनुचित-सरणौ ये सम्प्रदाया व्रजन्तः,
किमपि यदि विनिन्द्यं कर्म कुर्वन्ति पापम् ।
न भवति भुवि तेषां तैः प्रतिष्ठा परं ते,
निखिल-मनुज-दृष्टौ निन्दनीया भवन्ति ॥४॥

क्रूरत्वं च पशुत्वं च समाश्रित्याविवेकतः ।
अधर्मदृक्-सम्प्रदायो न कश्चिच्छक्तिमान् भवेत् ॥५॥ इत्यादि ।

वर्धायां पुनरागमनानन्तरं **'सिन्धिया स्टीम नेविगेशन'** निर्माण्याः सञ्चालकानां बालचन्द-हीराचन्द-शान्तिकुमार-नरोत्तम-मोरारजी-प्रभृती-नामाग्रहेण श्रीमहात्मागान्धिनां परामर्शेण च श्रीराजेन्द्रप्रसादो विशाखा-

पत्तनस्थस्य पोतनिर्माण-यन्त्रालयस्याधारशिलास्थापनायागच्छत्। तत्र स्वीये भाषणे विशिष्य— स्वदेशप्रवृत्त-स्वतन्त्रता-सङ्घर्षस्य निरन्तरतायै विदेशि-शोषणाद् विदेशि-शासनाच्च विमुक्तये, कर्मकरेभ्यो न्यायसङ्गतभागदानाय राष्ट्रियोद्योगानामभिवृद्धये संस्थानां सङ्घटनाय दुष्परिस्थितीनामाभिमुख्याय सत्याहिंसयोः सर्वभावेन स्वीकृतये स्वस्या मातृभूमेः स्थितेर्व्यवस्थापनाय च सन्दिष्टम्। तस्मिन्नवसरे तत्रत्याभिर्नैकाभिः संस्थाभिः श्रीराजेन्द्रप्रसादोऽभिनन्दनैः सम्मानपत्रार्पणैस्तथा द्रव्यप्रदानैश्च सम्मानितः। तत्र प्राप्तः सकलोऽपि द्रव्यराशिः सार्वजनिकेषु कार्येषु व्ययाय स प्रादात्।

तदनन्तरं त्वरितमेव श्रीराजेन्द्रप्रसादः शान्ति-स्थापनार्थं ढाकानगरं प्रस्थितवान् यत्र भीषणः साम्प्रदायिकोपद्रवः प्रस्फुटित आसीत्। निकटस्थेषु ग्रामेष्वपि व्याप्नुवन् बहूनां मानवानां मृत्योः कारणतां च प्राप्नोत्। मार्गे कटकनगरेऽवरुद्धय तत्रत्ये स्वराज्याश्रमे जनानां प्रश्नानुत्तरयता श्रीराजेन्द्र-प्रसादेन काङ्ग्रेसद्वारा विहितस्य सत्याग्रहस्य समुचितता पर्याप्तता प्रभाव-शालिता च साधिता। एकस्यां सार्वजनिकसभायां तेन भारतस्य राष्ट्रि-यान्दोलनायानुशासन-बलिदानयोरावश्यकत्वमपि समर्थितम्।

श्रीराजेन्द्रप्रसादः कृपलानी-प्रभृतिभिः सह ढाकानगरीं यदा प्राप्त-स्तदा मनाग् शान्तिरासीत् परं द्वयोरपि सम्प्रदाययोर्जनानां हत्याया वञ्चनस्य वह्निज्वालनस्य चामानुषिकैः कृत्यैरुत्तेजितानां जनानां स्थितिः शोचनीयाऽवर्तत। तत्र काङ्ग्रेसकार्यकर्तुः श्रीशिरीषचन्द्रचटर्जीमहोदयस्य गृहे स्वावासं विधाय स मुस्लिमानामाकारणया शासकेन साकं सद्भावना-स्थापनार्थं विमृष्टवान्। द्वित्राणि दिनानि निकटवर्तिषु ग्रामेष्वापि भ्रमणं विधाय स्थितिमवालोकयत्। राज्यसर्वकारेणैकस्याः समितेर्माध्यमेनोपद्रवाणां पर्यालोचनाय सर्वकारस्य प्रातिनिध्येन श्रीयोगेन्द्रनारायणमजूमदारमहोदयो यो हि राजेन्द्रप्रसादस्य प्राचीनो गभीरः सुहृदासीत् सोऽपि तत्रागत्य हुगलीनद्यां स्थिते पोते कृतावासोऽभूत्। यदा श्रीराजेन्द्रप्रसादस्तेनमिलितुं तत्रागच्छत् तदा ढाकानगर्यां भूयोऽपि भयावह उपद्रवो भयङ्कर्या नृशंसतया सह प्रारब्धः। अनेके निरपराधा मनुष्या मारिताः। ईदृश्यामसामान्यायां स्थितौ निरीक्षण-कार्यस्यासम्भवतामनुभूय श्रीमजूमदारः श्रीराजेन्द्रेण सह कलकत्तायां परावृत्तः। श्रीराजेन्द्रप्रसादस्ततः पटनायामायातः अस्वास्थ्यकारणान्मास-द्वयं यावत् स किमपि कर्तुं नाशक्नोत्।

साम्प्रदायिकताया विषव्याप्त्याऽऽन्तरिकः कलहो वृद्धिं गतः। भारतीय - राष्ट्रियाधियाचनानां समुचितोत्तरदानस्थाने ब्रिटिशशासनेन स्वीयानि प्रतिवचनानि मधुरया भाषयाऽऽवर्तितानि वैधानिको गतिरोधश्च

सुतरां कठिनोऽभवत्। राजनीतिज्ञा नेतारो भारते साम्प्रदायिकानामैक्याय परस्परं समाधानाय शान्तये च सम्मेलनैर्भ्रमणैर्वक्तव्यप्रकाशनैरात्मनिवेदनैरतितरां प्रायतन्त । श्रीजवाहरलालनेहरूर्वर्धायामखिलभारतीयकाङ्ग्रेस-समितेः १५-१६ जनवरी १९४२ ई० दिवसयोः सम्पन्नेऽधिवेशने प्रस्ताव-मेकमुपास्थापयद्, यस्मिन् कथितमासीत्—'केवलं मुक्तं स्वतन्त्रं भारतमेव राष्ट्रियाधारेण देशस्य सुरक्षाभारं वोढुं शक्ष्यति तथा युद्धस्य स्थित्योद्भूयमानानां समस्यानां समाधाने सहायं भविष्यति।'

श्रीराजेन्द्रप्रसादोऽपि वक्तव्येनान्येन "भारतस्याहिंसानीतेः समर्थनं ब्रिटिश-शासनात् स्वातन्त्र्यप्रापणं सशस्त्रसहायता-विरोधञ्चाघोषयत् ।

विशिष्य स्वीयान् विचारान् स्पष्टयन् स प्रत्यपादयत् यद्—आरम्भ-स्तावद् भवतु लघुः परं प्रस्तावोऽयमस्मिन् युद्धे सशस्त्रसाहाय्यस्य द्वारमुद्-घाटयति। अस्माकं दृढो विश्वासोऽस्ति शस्त्रैः कदापि विश्वस्य युद्धानां समा-धानं नाद्यावधि जातं नवाऽग्रेऽपि सम्भाव्यते। किञ्च यावद् ब्रिटिशशासनं भारताय स्वातन्त्र्यघोषणां न करोति तावदस्मा सशस्त्र-साहाय्यंदानं नोचितं भविष्यति। तत् स्वातन्त्र्य घोषणां कुर्यात् तथा शासनस्य दायित्वमस्माकं हस्ते देयात्। साम्प्रतमेषा स्थितिर्नास्त्यतोऽस्माभिः। कार्यकारिणीसमित्या-स्त्यागपत्रदानं नोचितं ज्ञातम् । यदा ब्रिटिशसर्वकारः काङ्ग्रेसद्वारा सशस्त्र-सहायताया द्वारमुद्घाटयिष्यति तदैवास्मभ्यं स्वाभिमतमार्गचयनस्यावसर आगमिष्यतीति।"

किन्तु 'साम्प्रदायिक-सद्भावना-प्रयासाः' प्रायः साफल्यं नावृण्वन् । यतो हि—

स्वीयं स्वातन्त्र्यलक्ष्यं द्रढयितुमनिशं तत्परत्वं दधानं,
श्रेयःकार्याणि कर्तुं प्रतिपदमभवद् नेतृवृन्दं सुसज्जम्।
गौराङ्गाः स्वार्थनिष्ठाः परमसमुचितैर्वर्त्मभिर्भारतीयान्,
विद्वेष्यान्योन्यमैक्यं शकलयितुमहो ! कूटकर्माण्यकार्षुः ॥६॥

*
* *

'भारतं मुञ्चत' इत्यान्दोलनम्

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैऽलवाः।
युद्धचन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः।
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु ।।
(अथर्व० १२।,१।४१)

विश्वं युद्धबिभीषिकाऽऽवृतमभूत् सर्वत्र चिन्ता तता,
व्याप्तो भीषण-सङ्कटश्च बहवो देशाः परास्ता अपि।
आतङ्कार्तिनिवारणाय जनता-साहाय्यमाप्तुं रता,
अप्याङ्ग्ला नहि भारताय विधिवत् स्वातन्त्र्यदाने मताः ।।१।।

तस्यां स्थितौ समुचितं प्रसमीक्ष्य कालं,
दुर्नीति - कर्तनकृतेऽसहयोगभावात् ।
आन्दोलनं झटिति भारतमुक्तिकामाः,
प्राचालयन् ब्रिटिशशासनवारणाय ।।२।।

घटनानां घटमाला तीव्रया गत्या प्रचलन्ती विभिन्ना घटना घटानीत-सलिलमिव निपात्याग्रेऽवर्धत। रूस-देशं हिटलरस्याक्रमणेन तथा मित्र-राष्ट्राणां प्रतिस्पर्धासु जापानस्य विलक्षणेन साफल्येनान्ताराष्ट्रियाः परिस्थितयोऽतीवानिष्टसूचिका अजायन्त। ब्रिटेनस्य **'प्रिन्स आफ वेल्स'**. नामकमेकं सर्वथा नवीनं तथैकमन्यत् प्राचीनं रक्षाभ्रमणकारि **'रिपल्स'**-नामकमित्थं जलयानद्वयं 'जापान'स्याण्वस्त्रवर्षकैर्निमज्जितम्। सिंगापुरस्य सुदृढेन नौसैनिक-समूहेन ब्रिटिश-भारतीय-सैनिकैः सहात्म-समर्पणं विहितम्। एवंविधानामनेकेषां सङ्कटानामुत्तरोत्तरप्रवृत्त्या न केवलं ब्रिटिशहितेष्वेवा-घाता अभवन् प्रत्युत भारतस्यापि द्वारि युद्धसङ्कटस्य स्थितिरुप-स्थिताऽऽसीत्। घोरया चिन्तया व्याप्तेन ब्रिटिशशासनेन भारतीयजनतायाः समर्थनं स्वस्य हिते प्राप्तव्यं मत्वा भारतस्य वैधानिक्या समस्याया विषये द्वितीय एकः प्रस्ताव उपस्थापितः— १९४२ ई. वर्षस्य मार्चमासीय एकादशे दिने चर्चिलेन घोषितं यत्—मन्त्रिमण्डलेनाक्रान्तृभ्यः स्वदेशस्य रक्षार्थं 'भारतीयजीवनस्य सर्वासां शक्तीना' मैक्याय, "भारतसम्बद्धाया नीतेर्विषये सर्वसम्मत्यैको निर्णयः कृतोऽस्ति तथा **'सरस्टैफोर्ड क्रिप्स'**—महोदयो मन्त्रि-मण्डलस्य सदस्यः सर्वेषां दलानां वर्गाणां च प्रतिनिधिभिः साक्षाद् वार्तालापाय भारतमागमिष्यतीति।"

१९४२ ई. मार्चस्य २३ तमे दिवसे सर स्ट्रेफोर्डमहोदयो दिल्लीमागतः। तेन साकं ब्रिटिशमन्त्रिमण्डलस्य प्रस्तावा आसन्, येषु तद्घोषणाया अपि स्वरूपमभूत्। प्रस्तावानुसारं ब्रिटिशशासनमेकं नवीनं भारतीय-सङ्घं निर्मातुमैच्छत्। तस्मै सैव मर्यादा दातव्याऽभूद् यान्येषामुपनिवेशानामवर्तत। परमेतत् सर्वं युद्धसमाप्त्यनन्तरमेव चिकीर्षितमासीत्। स भारतीय-नेतृभिः सह साक्षाद् विचारमकरोत् तदा श्रीराजेन्द्रप्रसादोऽपि दिल्ल्यामेवावसत्। प्रान्ते काङ्ग्रेससमितेरुपवेशने तत्कथनस्य प्रस्तावानां च विषये विचार-विमर्शोऽभूत् तदनुसारं 'क्रिप्स-प्रस्तावो' भारतस्य बैधानिकं गतिरोधमवष्टम्भयितुमसफलोऽमन्यत। भारतस्य प्रत्येकं दलेन समूहेन चाप्यस्वीकृतः। अस्वीकृतेः कारणानां प्रकाशने श्रीमहात्मगान्धिना, जवाहरलालनेहरुणा चातीव मार्मिकैः शब्दैरालोचनं प्रकाशितम्। काङ्ग्रेसाध्यक्षेन मौलाना आजादेनापि—'एकस्मै स्वतन्त्रराष्ट्रशासनाय भारतीयजनतायाः सर्व-सम्मतायामधियाचनायै बलं दत्तं या हि भारतस्य हिताय तथाऽन्येभ्यो बृहत्तरोद्देश्येभ्यः कार्यं कुर्यात्, येषां कृते लक्षशो जनाः कष्टानि सहन्ते म्रियन्ते च।'

"सर स्ट्रेफोर्डेनापि कथितं यद्—अल्पसंख्यका मुख्यतया यवनाः काङ्ग्रेसस्य विचारेण सम्मता न भविष्यन्ति तथाऽस्मिन् महति परिमाणे महान्ति ग्रन्थिलानि परिवर्तनानि कर्त्तव्यानि भविष्यन्ति यानि युद्ध-प्रवृत्तेर-वधौ सम्पादयितुं न सम्भवानि।" इत्थं भारतीय-मन्त्रिमण्डल-हस्ते वास्तविकाधिकाराणां तत्कालं समर्पणस्य प्रश्ने मिथो वार्ताभङ्गे सति श्रीक्रिप्सो भारतमुत्तेजनाया वैकल्यस्य स्थितौ विमुच्य लन्दनं प्रतिनिवृत्तः।

व्यापकासन्तोषस्य गभीराया व्यथायास्तथा निराशाया ईदृशीषु भया-वहासु घटिकासु प्रायस्तादृश्याऽप्रतिहतशक्त्या सहान्दोलनान्युद्भवन्ति, राजनीतिज्ञानां महता परिश्रमेण निर्मिता योजना विनाशयन्ति तथा शासकानां समग्रामपि दमनशक्तिं स्थगयन्ति। वस्तुतो घटनानां चक्रमतीव निष्ठुरतया देशं क्रान्तिं प्रति समाकर्षयति स्म। यस्या मनोवैज्ञानिक्याः पृष्ठभूमेरत्यन्तमावश्यकताऽनुभूयते स्म या च महात्मगान्धिनो भाषणैर्ले-खैश्च सज्जीक्रियते स्म तस्यां कियद्भ्यश्चिद् दिनेभ्यः प्रतीकात्मक-विरोध-स्यापेक्षया नवीना तीव्रताऽऽवेशस्तथा कस्या अपि निश्चितरूपेण चिकीर्षाया इङ्गितं दृग्गोचरीभवति स्म। श्रीराजेन्द्रप्रसादस्य विचारे च—

"आगन्तुकस्यास्य भयस्य शीघ्रं साम्मुख्यं विधातुं सर्वत उत्तम उपाय आसीत् प्रत्येकं भारतीयस्य हृदये स्वतन्त्रताया देशभक्तेश्च ज्वालायाः प्रज्वालनम्।"

अस्यां गभीरायां स्थितौ विचारायेलाहाबादनगरे काङ्ग्रेस-समिते-रुपवेशनमभूत्। सत्यपि परस्परं मतभेदे प्रस्ताव एकस्तस्मिन् स्वीकृतो यस्मिन् कथितमासीत्—"भारतं स्वशक्त्या स्वातन्त्र्यं प्राप्स्यति तथा तद्वदेव तां स्थिरत्वेन रक्षिष्यत्यपि। न केवलं भारतस्य हिते, प्रत्युत ब्रिटेनस्य सुरक्षायै तथा विश्वस्य शान्त्यै स्वातन्त्र्यायापीदमावश्यकमस्ति यद् ब्रिटेनो भारते वर्तमानं स्वीयमधिकारमपाकुर्यात्। केवलं स्वतन्त्रताया आधारेणैव भारतं ब्रिटेनेनाथवाऽन्यै राष्ट्रैः सह व्यवहर्तुं शक्नोति।" प्रस्तावेनास्य विचारस्य खण्डनमपि कृतं यत् "कस्या अपि विदेशि-शक्तेर्माध्यस्थ्येना-क्रमणेन वा भारताय स्वतन्त्रता लब्धुं शक्यतेऽथवा विदेश्याक्रमणं भवेत् तदा तस्याभिमुख्यं कर्तव्यमिति।"

युद्धप्रवृत्तिरनिशं भुवि वर्धमाना,
स्वीयां स्थितिं विशदयन्त्यथ भारतेऽपि।
सर्वत्र सैनिक-समिद्गतसाधनानां,
सज्जा-स्थिति-प्रगति-कर्मसु सङ्गताऽभूत्॥३॥

तदानीं साम्राज्यवादाय देशव्यापिनः सङ्घटनस्यावश्यकता नेतृभिरत्यन्तमन्वभूयत। किन्त्वियं नासीदाङ्ग्लानां विरुद्धा योजनाऽपि तु यः कोऽपि भारते प्रभुत्वं स्थापयितुं वाञ्छेत् तस्मिन्, ब्रिटिशोऽस्तु जापानो वा, तस्याभिमुख्याय पूर्वसज्जताऽऽसीत्। काङ्ग्रेस-नेतारो जानन्ति स्म यदस्यां स्थितावान्दोलनमपरिहार्यमस्ति। बिहारवासिष्वातङ्कस्य बाहुल्यमासीद् यतो लघुनागपुरस्य निकटवर्तिनि स्थले ग्रामभूभागे च सर्वकारेण कृषि-भुवस्तथा केषाञ्चिद् भवनानामधिग्रहणं बलाद् विधाय तत्र युद्धोपयोगिनी व्यवस्थाऽक्रियत। अनया पीडया खिन्ना ग्रामवासिनो राष्ट्र-नेतॄन् प्रैरयन् स्वीयानि दुःखानि चाकथयन्। श्रीराजेन्द्रप्रसादस्तदर्थमुच्चाधिकारिणो निवेद्य तेभ्यः प्रतिमूल्यं दापयितुं प्रायतत। विविधेषु ग्रामेषु स्वयं गत्वा स्थितिं विलोक्य सान्त्वना-प्रदानपूर्वकं कर्तव्यं प्रति सावधानतायै न्यवेदयत्।

काङ्ग्रेसस्य नेतृत्वे विहितेषूपवेशनेषु विधीयमानान्दोलनस्य नीतीनां निर्धारण-चर्चा अचलन्। श्रीराजेन्द्रप्रसादः श्रीगान्धिनामहिंसानीत्या सम्मतः सविनयावज्ञार्थं कार्यक्रमनिश्चयाय जनान् समबोधयत्। क्वचित् प्रान्तीयासु विचारगोष्ठीषु क्वचिच्च राष्ट्रियासु विचारणासमितिषु समु-पस्थाय स्वीयान् विचारान् प्रस्तूय सत्याग्रहाय व्यज्ञापयत्। एकत आन्दोलन-कर्तारः कार्यक्रमान् व्यवस्थापयितुं तत्परा आसन् परतश्च शासनमपि राज-नीतिकबन्दिनां निग्रहणाय कारागृहेषु स्थापनाय च व्यवस्थां विधत्ते स्म। अगस्तमासस्य पञ्चमे दिवसे 'भारतं मुञ्चत' इत्येवं विषयकः प्रस्तावो मोह-

मय्यां कार्यकारिणीसमितौ स्वीकृतः । तत्रैवैतिहासिकेऽधिवेशनेऽखिलभारतीयकाङ्ग्रेससमित्याऽपि तस्य प्रस्तावस्य पुष्टिरभवत् । स्पष्टीकृतं तत्रैव यद् 'भारताय मित्रराष्ट्रेभ्यश्च परमावश्यकमिदं विद्यते यद् ब्रिटिशराज्यं समाप्तं भवेत् ।' समित्या भारतस्य मुक्ते. स्वतन्त्रतायाश्चाहस्तान्तरणीयाधिकारं न्यायपूर्णं प्रमाणयितुं तथा श्रीगान्धिनो नेतृत्वेऽहिंसकं जन-सङ्घर्षं चालयितुमपि स्वीकृतम् । तत्र भाषमाणैः श्रीगान्धिभिरुक्तं-'स्वतन्त्रता भवतां मन्त्रो भवेत् तथा भवद्भिस्तस्या जपः करणीय' इति ।

ततः परं श्रीगान्धिन आन्दोलनात् पूर्वं भारतस्य महाधिशासकाय पत्रं लिखितुं तथा तदुत्तरं यावत् प्रतीक्षितुमप्यसूचयन् परं सेच्छा पूर्तिं नागात् । नवमेऽगस्तदिने प्रातस्तरामेव श्रीगान्धिनस्तथा कार्यकारिण्या अन्ये सदस्या निगृहीताः । शीघ्रमेव श्रीराजेन्द्रप्रसादेनाकाशवाण्याः समाचारेषु सूचनेयं श्रुता । तस्यापि निग्रहणे विलम्बो नाभूत् । यदा स 'सर्चलाइट' पत्रे मोहमय्याः समाचारान् पठति स्म तदा पटनाजनपदस्य न्यायाधीशः श्री-डब्ल्यू० जी० आर्थको जनपदचिकित्साधिकारिणा सहागत्य स्वास्थ्यस्थितिं परिज्ञाय 'सदाकताश्रमात्' सुमनःस्रग्भिरभिनन्दितः 'भारतं मुञ्चत' श्री-गान्धिनो जयोऽस्तु, श्रीराजेन्द्रो जयतु'-इति नादानां मध्ये बांकीपुर-कारायां तमनयत् । अन्येऽपि बिहारस्य मान्या नेतारः क्रमेण बन्दीकृताः । समस्तेऽपि देशे स्थितिरियमेवावर्तत । इत्थम्—

दृष्ट्वा तां विषमां स्थितिं परिवृताश्छात्रास्तथाऽन्ये जनाः,
सामूह्येन नियन्त्रितांश्चलसमारोहान् समायूयुजन् ।
स्वातन्त्र्य-प्रतिरोधि शासकदलं निर्भर्त्सयन्तः सभा,
आयोज्य द्रुतमेव भारतभुवं त्यक्तुं तदाऽघोषयन् ॥४॥

प्रदर्शनैः कर्म-विराम-वृत्या, प्रचारपत्रैर्विविधैर्विरोधैः ।
श्रीगान्धिभिर्नेतृवरैश्च दत्तैर्वक्तव्य-सन्देश-विचार-वृत्तैः ॥५॥

जनान् समस्तानवबोधयन्तः, कर-प्रदानानि निवारयन्तः ।
पदानि शीघ्रं च परित्यजन्तः, स्वदेशभक्ता निरता अभूवन् ॥६॥

श्रीगान्धिनामन्येषां नेतृणाञ्च निग्रहानन्तरं सर्वेष्वपि वर्गेषु कार्यकर्तृषु चाभूतपूर्वा स्फूर्तिर्व्याप्तिमगात् । अवज्ञायाः प्रकारानाधृत्य प्रवृत्तमान्दोलनं जनसाधारणस्यान्दोलनरूपं धृत्वा विदेशिशासनायैका महत्याकारणाऽवर्तत । बिहारकाङ्ग्रेससमित्याऽपि कार्यक्रमा निरधार्यन्त । देशभक्तेर्भावनायाः स्वात्मनो दुर्दम्येनादेशेन च स्वतन्त्रताया महत्यां क्रान्तावत्यन्तं वीरतावृत्त्या भागं गृह्णाना भारतीया विशिष्य छात्राः सङ्घर्षेऽपूर्वं सहयोगमदुस्तथा केचन प्राणानप्यत्यजन्। व्यापकस्य रोषस्य प्रचण्डा विस्फोटा

अजायन्त । धूम्रयानमार्गा उत्पाटिताः । दूरभाष-तडित्सन्देशसाधनानि खण्डितानि यातायातपथा अपि बहुधा विघ्निताः । जनतामातङ्कयितुं शासनाज्ञयाऽऽरक्षिणोऽपि सर्वत्रातिव्याप्त्या निग्रहणानि, निर्दयं ताडनानि, वह्निज्वालनानि बलात् सामूहिकान् दण्डान् पशुतापूर्णा नृशंसताश्च प्रावर्तयन् । आन्दोलनमिदं १९४२ ई० वर्षीयाक्टूबरमासे शिथिलमक्रियत ।

श्रीराजेन्द्रप्रसादो बांकीपुर-कारावास एवास्वास्थ्यकारणात् दिनान्यगमयत् । तस्य निग्रहानन्तरं पटनायाः समाचार-पत्राणां प्रकाशनं निरुद्धम् । बिहारशासनेन 'पटना-टाइम्स' नाम्नैकं दैनिकं पत्रं प्रवर्तितम् । तदाधारेण श्रीराजेन्द्रप्रसादः समाचारमिममवागच्छद् यन्महात्मगान्धिनः शासनस्य दुष्पीडननीतेर्विरोधे स्वस्य त्रिसप्ततिवार्षिके वयसि १० फरवरी १९४३ ई० तः २ मार्च १९४३ ई० यावन् महान्तमुपवासं करिष्यन्तीति ; समग्रोऽपि देशस्तेन गभीरायां चिन्तायां मग्न आसीत् । श्रीराजेन्द्रप्रसादोऽप्यतीवोद्विग्नोऽभूत् परं तस्यावधिः सानन्दं समाप्तः । एवमेव बङ्ग-प्रान्तीयेन दुष्कालेनापि सोऽत्यन्तं खिन्नस्तथा प्रतिदिनं समक्षमायान्त्यां भयङ्करतायां किमपि कर्तुमसहायतया स आत्मन्येवात्मनि ग्लानिमप्यन्वभवत् ।

१९४३ ई० वर्षस्याक्टूबरमास्येकस्याः शासकीयसमित्याः परामर्शेण श्रीमथुराप्रसादः कारातो मुक्तः । एकस्य नवीनस्यादेशानुसारं सा समितिः कारायां गत्वा दृष्टि-निग्रहं प्राप्तानां बन्दिनां विषये पुनर्विचारं कृतवत्यासीत् । बांकीपुरस्थायां कारायां श्रीराजेन्द्रप्रसादमपि सा ततो विमुक्तये पृष्टवती परं स स्पष्टं दृढतया चाब्रवीत्-"तावन्नैव, यावदन्ये सर्वे जना मुक्ता न भवन्ति ।"

कारावासे श्रीराजेन्द्रप्रसादेन **'इण्डिया डिवाइडेड'** नामकं पुस्तकं रचितं तच्च 'हिन्दकिताब्स लिमिटेड' तः प्रकाशितम् । तत्र चर्खायन्त्रचालने पठने लेखने चाखिलस्तस्यदिनं व्यत्येति स्म । तेष्वेव दिवसेषु केचन राष्ट्रियाः कार्यकर्तारः केचनात्मीयाः स्नेहिनः, सुहृदः सहोदरस्य पुत्री, श्रीमहादेवभाई देसाईः श्रीगान्धिनां पत्नी कस्तूरबा तथा मौलाना आजादस्य पत्नी दिवङ्गताः ।

रुन्धन्ति गतयो लोके सर्वेषां तु कदाचन ।
रुणत्ति नैव कालस्य गतिः किन्तु दुरत्यया ॥७॥

१९४५ ई० वत्सरे जूनमासस्य चतुर्दशे दिने दिल्लीत आकाशवाण्या भाषमाणेन भारतस्य महाधिशासकेन घोषितं यत् 'काङ्ग्रेसस्य समितेः सदस्यानां मोचनस्यादेशाः प्रवर्तिताः सन्ति । तदनुसारं द्वितीये दिवसे श्री-

राजेन्द्रप्रसादोऽपि मोचितः। सर्वेऽपि तेनातीव प्रासीदन्। महाधिशासकेन राजनीतिकस्थितेः शान्तये शिमलायां ब्रिटिशशासनेन केषुचिन्नवीनेषु प्रस्तावेषु चर्चितुं द्वाविंशतिसङ्ख्यका नेतारः सम्मिलितुमामन्त्रिताः। बैवेलयोजनायां विचाराय मोहमय्यां काङ्ग्रेस-कार्यकारिण्या विचार-विमर्शः प्रचलति स्म तदैव श्रीगान्धिभ्यस्तथा काङ्ग्रेसाध्यक्षायापि शिमलायामागन्तुं महाधिशासकस्य पत्रमुपागतम्। कालान्तरेण श्रीराजेन्द्रप्रसादोऽप्यामन्त्रितः। सर्वैस्तत्र गत्वा योजना-विषये विमृष्टम्। केचन निर्णया अपि कृताः परं श्रीजिन्ना तैः सहमतो नाभवदतोऽमध्यवर्तिव्यवस्थायाः सम्बद्धः कोऽपि सन्धिर्नाभवत् तथाऽसाफल्येन सह समाप्तिरभूत्।

ततः परं श्रीराजेन्द्रप्रसादः किञ्चित् कालं जीरादेई-ग्रामे विश्रम्य दुष्कालपीडितेभ्यो धनानि सङ्गृह्य साहाय्यं कुर्वन् जनानामुद्बोधनाय प्रचारयात्राञ्चाकार्षीत्।

रुचिर्यस्य यस्मिन् भवेत् तां प्रपुष्णञ्जनः सान्त्वनं याति नित्यं प्रसक्तः।
तथा लोकसेवाव्रती मानवानां, विधायैव सेवां सुखं याति सम्यक्॥८॥

卐

आजाद-हिन्द-सेना 'जयहिन्द' नादश्च

समहमेषां राष्ट्रं स्यामि समोजो वीर्यं१ बलम्।
वृश्चामि शत्रूणां बाहूननेन हविषाहम्॥
(अथर्व० ३।१९।२)

अन्तर्बहिर्भागमधिष्ठितानां, निष्ठा धृतिश्चिन्तन-कर्म-भावाः।
यावन्न साम्यं परितो भजन्ते, तावन्न सिद्धिर्भवतीति सत्यम्॥१॥
स्वातन्त्र्यलब्ध्यै भरतावनिस्थिता, वैदेश्यशास्तॄन् पुरतो ह्ययबाधयन्।
स्थिता विदेशेषु च बाह्यभागतस्तान् भारतीयाः परतोऽप्यबाधयन्॥२॥
'आजाद-हिन्द-सेनां' संयोज्य, प्रथितां सुभाषचन्द्रः।
'जय-हिन्द' घोषमुच्चैः, स्वदेश-मुक्तये घोषितवान्॥३॥

१९४१ ई० वत्सरे काङ्ग्रेस-नेतारो यदा कारासु निवेशिता आसँस्तदा ब्रिटिशशासनस्य दमनाधिक्येन सन्त्रस्तैर्भारतीयैः प्रारब्धं 'भारतं मुञ्चत'

इत्यान्दोलनं शैथिल्यमभजत्। तस्मिन्नेव समये श्रीसुभाषचन्द्रवसुः 'नेताजीः' स्वीयया स्वतन्त्रया विचारधारया प्रेरित आङ्लानां चक्षुःषु धूलिं प्रक्षिप्य जर्मनीं सम्प्राप्त आसीत्। ततः स जापानं गतवान्। १९४३ ई० वर्षस्य जुलाई-मासे स **'आजाद-हिन्द-सेनां'** पुनरजीवयत्। एकस्यां महत्यां सङ्ख्यायां भारतीयाः सैनिका-ये आङ्ग्लानां सहयोगिनो भूत्वा युद्धयन्तो जापानस्य युद्धबन्दिनोऽभवन्, **'नेताजी'** महाभागस्याकारणां श्रुत्वा 'आजाद-हिन्द-सेना'-यां सम्मिलिताः। तस्याः सञ्चालन-सूत्रं श्रीवसुना स्वहस्ते नीतम्। तस्य महाभागस्य व्यक्तित्व-त्याग-परिश्रमाणां फलस्वरूपं समस्तेऽपि दक्षिणपूर्व-वर्तिन्येशियाद्वीपे काचनापूर्वा नवा प्रेरणा स्फूर्तिश्च व्याप्तिमगात् तथा तत्र निवसद्भिरनेकैर्भारतीयैस्तनुमनोधनैर्भारतस्य स्वाधीनतायाः प्रयासे श्रीवसोः साहाय्यमाचरितम्।

१९४३ ई० वर्षस्याक्टूबरमासे श्रीवसुः 'अस्थायिन आजाद-हिन्द-सर्वकार'स्य स्थापनामकार्षीत्। सत्वरमेव नेताजी-निर्मिताय सर्वकारायाष्टौ राष्ट्राणि मान्यतामदुः। आजाद-हिन्द-शासनेन स्वकीययाऽऽकाशवाण्या भारतवासिनः स्वाधीनतायै युद्धं कर्तुं साहस-पूर्वकमग्रे वर्धितुं च प्रेरिताः। भारतस्य सीमभ्यो बहिर्भागाद् विदेशेभ्य उत्थिता **'जय हिन्द' 'दिल्लीं चलत'** इत्याघोषाः देशवासिनः सान्त्वनान्याशश्चावर्धयन्। तेषां कामनाऽऽसीद् यद् आजादहिन्दसैनिका दिल्लीं प्राप्नुयुस्तथा तत्र **'शोणदुर्गे'** त्रिरङ्गध्वज-मुत्तोलयेयुरिति।

'नेताजी'नां नेतृत्वे भारतं स्वाधीनं कर्तुमाजाद-हिन्दसेना भारतं लक्ष्यीकृत्याग्रे वर्धमाना प्रथमं महत् साफल्यं प्राप्ता। बहुषु स्थलेषु तया ब्रिटिशसेना पृष्ठपादा कृता। आजाद-हिन्द-सेना **'इम्फालं'** यावदुपगता तथा प्रायः पञ्चाशदुत्तरद्विशतवर्ग-मीलमितां भारतस्य भूमिमपि स्वाधीनीकृत्य तत्राजादहिन्दसर्वकारस्य शासनं स्थापितवती स्वातन्त्र्यस्य ध्वजमप्युद्धूत-वती। परं ब्रिटिशसेनानां महताऽऽक्रमणेन तथा वर्षर्तोः कारणात् १९४५ ई० वत्सरेऽगस्ते मासि पुनराजादहिन्द-सेना 'इम्फाल'तः परागन्तुं बाध्याऽभवत्। हिरोशिमा-नागासाकी-नगरयोरणवस्त्रप्रक्षेपणानन्तरं च तस्या आत्मसमर्पण-मप्यावश्यकमभूत्।

कर्मण्येवाधिकारो भवति सुनियतो मानवस्यात्र लोके,
साफल्यं वाऽफलत्वं भवति भगवतो हस्तसंस्थं सदैव।
तस्माद् यत्ने स्वकीये कथमपि शिथिलं नैव भाव्यं जनेन,
यत्ने सम्पादितेऽपि स्पृशति सफलता नैव चेन्नास्ति दोषः ॥४॥

युद्ध-समाप्त्यनन्तरमाजादहिन्द-सेनाया अधिकारिणो निगृह्य भारत-

मानीतास्तथा तेषु भारतीयसेनातः पलायनस्य सम्राजो विरुद्धञ्च युद्ध-प्रवर्तनस्यारोपेऽभियोगचालनस्य निर्णयो विहितः । सर्वप्रथमं त्रिष्वधिका-रिष्वभियोगः प्रवर्तितस्तेऽभूवन्-'**शाहनवाजढिल्लन-सहगला**'भिधानाः । संयोग एवासीदयं यत्तेष्वेको मुस्लिम एकः सिक्खस्तथैको हिन्दुरासीत् । दिल्ल्याः शोण-दुर्ग एव ते बन्दित्वेन रक्षिता । तत्रैवाभियोगोऽपि चालितः। आजाद-हिन्दसेनाया देशभक्तेर्वीरतायाश्च गाथाः समस्तेऽपि देशे प्रासरन् तरुणेभ्यस्तरुणीभ्यश्चादम्योत्साहस्य प्रेरणायाः स्रोतस्त्वञ्च ताः प्राप्नुवन् । अभियोग-प्रवृत्त्या देशे क्रोधभावनाः प्रवृद्धाः । सर्वत्र प्रबला सहानुभूतिर-जागरीत् ।

राष्ट्रिया चेतना राजनीतिकी जागर्तिर्विद्रोहभावनाश्च निरन्तर-मेधमाना अवर्तन्त । काङ्ग्रेसेन तेषां संरक्षणाय निश्चितम् । सर्वसाधारणया जनतया श्रीजवाहरलालनेहरुणा च 'जय हिन्द'-नादस्याभिवादनं स्वीकृतम् । देशस्य मूर्धन्या महाधिवक्तारो निःशुल्कं तेषां पक्षेऽधिवक्तृत्वाय सज्जा अभ-वन्, श्रीभूलाभाईदेसाई-श्रीतेजबहादुरसप्रू-श्रीजवाहरलालनेहरुप्रभृतयो वर्षाणामनन्तरं स्वीयानि महाधिवक्तृत्व-प्रावरणानि धृत्वाऽभियोगाधीक्ष-णायोपस्थिताः । नानाविधानकाट्यान् तर्कानुपस्थाप्य पक्षपोषणमकार्षुः परं न्यायाधीशैस्त्रयोऽपि दोषिणः प्रमाणिताः मृत्युदण्डश्च तेभ्यो घोषितः । सत्या-मपि तस्यां स्थितौ वातावरणस्य वैषम्यं विज्ञाय सर्वकारस्य तादृक् साहसो नाभवद् येन स मृत्युदण्डं दद्यात् । अन्ते ते त्रयोऽप्याजादहिन्दसेनायाः प्रमुखा-धिकारिणो मोचिताः । इत्थमेवान्येऽपि बन्दिनस्ततः परं न्यायालयैस्तथा भार-तस्य महाधिशासकेनोन्मोचिताः । तादृशेन नैतिकेन विजयेन भारतीयानां वक्षांसि गर्वेण समुन्नतान्यभूवन् हृदयेभ्यश्चाङ्ग्लानां दमननीतेर्भयमपास्तम् ।

आजाद-हिन्द-सेनाया उदाहरणानादर्शांश्च विलोक्य विदेशि-शास-कानां नेत्राण्युन्मीलितानि । तैर्विज्ञातं यत् स्वातन्त्र्यं काङ्क्षन्तो भारतीया इदानीं जागरिताः । सैनिका अपि स्वदेशस्य स्वाधीनतायै कृतसङ्कल्पाः सन्ति, साम्प्रतमेते स्वदेशहेतवे सैनिकानुशासननाम्ना यथेच्छमस्माकमाज्ञां न पाल-यिष्यन्ति । १९४४ ई० वत्सरस्य फरवरीमासे १८ दिनाङ्के मोहमय्यां नौसैनिकानामेकेनांशेन वैदेशिकाधिकारिणां विरुद्धं विद्रोहः कृतः । प्रायस्त्रि-शतसैनिकैः-'वेतन-भोजन-जातीयभेदभाव-चरित्रा'दीनां विषये सेनापतेरप-मानजनकानां शब्दानां प्रयोगसदृशान् प्रश्नानाधृत्य विशालानि प्रदर्शनानि क्षुन्निरोधाश्चाक्रियन्त । परस्परमस्त्रप्रहारा अभवन् । अन्ततः सरदारपटेलस्य माध्यस्थ्येन समाधानं जातम् । तया घटनयाऽपि गौराङ्गाः सावधाना भूत्वा भारतं स्वाधीनं कर्तुं बाध्या अजायन्त ।

गतिः स्वदेशेऽस्तु मतिः स्वदेशे, स्वदेश एवास्तु समस्तशक्तिः।
भक्तिः स्वदेशेऽस्तु रतिः स्वदेशे, नतिः स्वदेशाय सदा चकास्तु॥५॥

☐

मध्यवर्ति-शासन-स्थापना

इ॒न्द्र॒-वा॒यू उ॒भावि॒ह सु॒हवे॒ह हवामहे।
यथा॑ नः॒ सर्व॒ इज्जनः॒ सङ्गत्यां सु॒मना॒ अस॒द्दानकामश्च नो॒ भुव॑त्॥
(अथर्व० ३।२०।६)

स्वातन्त्र्यार्थं भुवि विदधतां देशभक्तौ रतानां,
निष्ठा त्यागः श्रम-बल-तपःसाधनाः पीडनानि।
सत्याऽऽहिंसाग्रह-कृतविधा मध्यवर्ति-प्रशास्ते—
देशेऽभूवन् परिणत-फलाः स्थापनायां सहायाः॥१॥

१९४५ ई० वत्सरस्य सितम्बरमासे राजनीतिक-परिस्थितेः परिज्ञानाय भारतीय-राष्ट्रिय-काङ्ग्रेसस्योपवेशनानि पुण्यपत्तने मोहमय्यां च संवृत्तानि। काङ्ग्रेसदलेन भारतीय-जनतायाः क्रान्तिपूर्णस्य सङ्कल्पस्य प्रदर्शनाय तथा भारतस्य स्वतन्त्रता-सङ्ग्रामस्य ततोऽप्यग्रे प्रवर्तनार्थं निर्वाचने समवेतुं निश्चितम्। आवश्यक-व्यवस्थार्थमेका 'निर्वाचन-समिति'-रपि संयोजिता यस्यामन्यैर्नेतृभिः सह श्रीराजेन्द्रप्रसादोऽप्यासीत्। निर्वाचन-साफल्याय ग्रामाद् ग्रामं भ्रमन्तो नेतारो जनान् प्रबोधयन्। काङ्ग्रेसेन तस्मिन् निर्वाचने मुस्लिमातिरिक्तेषु स्थानेषु विजयो लब्धः। मुस्लिमस्थानेषु प्रायो मुस्लिमलीग-सदस्या एव जिताः।

बिहार-प्रान्ते श्रीराजेन्द्रप्रसादस्य प्रयासेन तथाऽन्येषां सहयोगिनां श्रमेण काङ्ग्रेसदलेन द्व्यूनशतसङ्ख्यकानि स्थानानि जितानि। तदनुसारमेव मन्त्रिमण्डलनिर्माणाय काङ्ग्रेससदस्या आमन्त्रिताः। श्रीकृष्णसिंहस्य मन्त्रित्वे मन्त्रिमण्डलं निर्मितं यस्मिन् नव सङ्ख्यकाः श्रीअनुग्रहनारायण-सैयदमहमूद-जगलाल— चौधरी-रामचरित्रसिंह-बदरीनाथवर्म-कृष्णवल्लभ-सहाय-विनोदानन्दझा-अब्दुल कयूमअन्सारी-प्रभृतयो मन्त्रिण आसन्।

श्रीराजेन्द्रप्रसादः श्रीगान्धिनां विचारानुसारं पूर्ववदेव राष्ट्रियमहत्त्वस्य सामाजिकेष्वार्थिकेषु कार्येषु मनोयोगपूर्वकं कार्याण्यकरोत्। श्रीगान्धिभिः

'सावरमत्याश्रमे' तथा **'सेवाग्रामे'** गोशालयोः स्थापनमकार्षुः। वर्धानगर्या निकटे राधाकृष्णबजाजेनाप्येका गोशाला स्थापिताऽऽसीत्। श्रीराजेन्द्रप्रसादः प्रायस्तासु गोशालासु गच्छति स्म। रोचते स्म तस्मै गवां सेवा। बजाजदम्पत्योरनुरोधात् स १९४६ ई० वर्षे गोरक्षासम्मेलनस्याध्यक्ष्यमप्यकरोत्। तदानीं वर्धायां यद् दृष्टं तेनोत्साहितः सन् दरभङ्गानगरस्य गोशालाकार्यकर्तृणां सहयोगेन पटनायामप्येकं गोरक्षासम्मेलनमायोजयत् सर्वेषामाग्रहेण साभापत्यमपि तेनैव निर्व्यूढम्। तत्रानेके गोभक्ता राष्ट्रियनेतारो गो-विशेषज्ञा अपि समवेताः। श्रीराजेन्द्रप्रसादेन कथितमासीद्—अहं गवां संरक्षणं पालनं पोषणां च धार्मिकदृष्टया नैवापि त्वस्माकं विशिष्ट-ग्रामीण-व्यवस्थायै परमावश्यकं मत्वाऽस्मिन् कर्मणि प्रवृत्तोऽस्मि। कृषिप्रधानस्य देशस्यार्थिक-व्यवस्थाये गोर्महत्त्वं प्रतिपाद्य चैकस्य 'गोशाला-सङ्घ'स्य संयोजनमप्यकरोत्। सदाकताश्रमेऽप्येका सदादर्शभूता गोशाला संस्थापिता।

जननी जन्मभूमिर्गौरिति मातृत्रयी मता।
तस्यामपि परा माता गौरेवास्ति न संशयः॥२॥

भारते विदेशषु च सवेगं परिवर्तमानाभिः परिस्थितिभिर्भारतस्य वैधानिकं गतिरोधमपाकर्तुं तेन साहाय्यमाचरितम्। ब्रिटेनस्य समक्षं द्वितीय-विश्वयुद्धस्य सङ्कट-सङ्कुलितो दाय आसीत् तथा भारते स्वतन्त्रता-प्राप्तेराकाङ्क्षा पूर्वतोऽप्यधिकतरा दुर्दमनीया चावर्तत। स्थितेर्गाम्भीर्यं विज्ञाय इग्लैण्डस्य श्रमिकसर्वकारेण-यस्य प्रधानमन्त्री **'एटली'** महोदय आसीत्—तथा भारताय राज्यसचिवेन **'लार्ड पेथिक लारेन्स'**-महाभागेन ब्रिटिश-मन्त्रिमण्डलस्य निर्णयो घोषितो यत् "सत्वरमेवैकं मन्त्रिमण्डलदलं भारतं गत्वा तस्य भाविनो-विधानस्य विषये भारतीय-जनजीवनस्य नेतृभिः सह संलापं करिष्यति, यस्यान्तिममुद्देश्यं भारतीयानां हस्ते महाधिशासक-प्रदर्शित-प्रकारैः शासनाधिकारप्रदानं भविष्यति।" घोषणानुसारं मन्त्रि-मण्डलस्य त्रयः सदस्या भारतमुपागताः। शिमलानगर्यां ते राजनीतिकदलैः साकं विचार-संलापमकार्षुः। काङ्ग्रेसस्य मुस्लिमलीगस्य च चतुर्भिश्चतुर्भिः प्रतिनिधिभिस्ते मिलिताः। परं ताभिर्वार्ताभिर्मध्यवर्ति-सर्वकार-स्थापनायास्तथा विधाननिर्मितेस्तन्त्रविषये कोऽपि सन्धिर्न सम्पन्नः। किञ्च शिमलायास्त्रिदिवसीयं सम्मेलनं यदा मईमासस्य द्वादशतारिकायां भग्नं, तदा मन्त्रिमण्डलसदस्यैः स्वीया योजना प्रकाशिता। परामर्शषट्कमपि तैस्तस्यां दत्तमासीत्। नवविधाननिर्मितये एतस्याः समितेः सङ्घटनायापि तैः परामर्शो दत्तो यस्मिन् बहवो विचारा आसन्।

भारतीयजनतायाः केनापि वर्गेण तेषां सा योजना पूर्णरूपेण सन्तोष-जनिका नामन्यत परं या धारा मुस्लिमानां हितेऽवर्तन्त तासां मुस्लिमलीगः स्वीकरणमकार्षीत्। काङ्ग्रेसेन 'स्वतन्त्र-सम्मिलित-प्रजातान्त्रिक'-भारतस्य विधानरचनायै विधानपरिषदः स्थापनाया दीर्घावधिकः प्रस्तावः स्वीकृतः किञ्च जूनमासस्य षोडशे दिनाङ्के घोषिताया घोषणाया अनुसारं सर्वकारस्य स्थापनायाः मन्त्रिमण्डलयोः प्रस्तावः स्वीकृतः। तदनुसारमेव मण्डलसदस्यैस्तथा महाधिशासकेन 'सप्तसदस्यवत' एकस्य कार्य-निवाहक-सर्वकारस्य संयोजनाय घोषितम् इङ्लैण्डं च ते प्रस्थिताः। काङ्ग्रेसस्य कार्यकारिण्या सदस्यरूपेण तथा देशस्य प्रमुखनेतृरूपेण श्रीराजेन्द्रप्रसाद उपर्युक्तायां सम्बन्धिवार्तायां काङ्ग्रेसस्य नीतिनिर्धारणेऽतीव महत्त्वपूर्णं कार्यमकरोत्।

ये दुःस्वभावा हठिनो निरङ्कुशाः, स्वार्थे विलीनाश्च भवन्ति सर्वतः।
ते क्वापिकस्यापिन साधु भाषितं, शृण्वन्ति युक्तं नहि मन्वते तथा ।।३।।

सत्यप्यसम्मते कार्ये, हितमन्वीक्ष्य लौकिकम्।
यावच्छक्यं समाधातुं, चेष्टन्ते भुवि सज्जनाः ।।४।।

१९४६ ई० वत्सरस्य जुलाईमासे विधानसभाया यच्छन्दाकलनमभूत् तस्मिन् काङ्ग्रेस-सदस्या अत्यधिकं बहुमतेन निर्वाचिताः। जिन्नास्तस्मै 'पशुबहुमत'संज्ञामदात्। मुस्लिमलीगस्य परिषद् जुलाईमासस्योनविंश्यां तारिकायां पूर्वं स्वीकृतान् प्रस्तावानस्वीकृत्य पूर्वतनान्निर्णयात् पृष्ठपादाऽभूत्। तया पाकिस्तानस्य प्राप्तये प्रत्यक्षपद्धत्या कार्यकरणाय निर्णीतम्। १६ अगस्तदिने सम्प्रदायिक उन्मादो ज्वरसीम प्राप्तः। साक्षात् कार्यकरणनीत्या कलकत्तायां भीषणो रक्तपातोऽभवत्।

काङ्ग्रेसेन वर्धाया एकस्मिन्नुपवेशने मध्यवर्तिसर्वकार—सम्बद्धो जून-मासीयः प्रस्तावः स्वीकृतः। महाधिशासकेनापि मुस्लिम-लीगं विनैव मध्यवर्तिसर्वकार-निर्माणाय निश्चितम्। तेन काङ्ग्रेसाध्यक्षः श्रीजवाहरलालनेहरूः १२ अगस्तदिने 'तत्कालं मध्यवर्ति-सर्वकार-स्थापनायै प्रस्तावमुपस्थापयितु-मामन्त्रितः।' श्रीनेहरूर्भूयोऽपि यथासम्भवं प्रतिनिधिसर्वकार-निर्मितये श्रीजिन्ना-महोदयस्य सहयोगार्थं प्रायतत परं स यत्नो न फलितः। महाधि-शासकस्य साक्षात्कारानन्तरं तेन परामर्शाय दिल्ल्यां संसत्समितेरेकमुपवे-शनमामन्त्रितम् सरदार पटेलो मौलानाआजादस्तथा श्रीराजेन्द्रप्रसाद-स्तस्याः समितेः सदस्या आसन्। प्रस्तावितस्य मन्त्रिमण्डलस्य नाम्नां यदा सूची सज्जाऽभवत् तदा श्रीराजेन्द्रप्रसादः पिलानी-नगरीं गत-वान्। स तत्रागस्तमासान्तं यावद् विरामं कर्तुमैच्छत् परं २७ अगस्त-दिने

काङ्ग्रेस-समितेरुपवेशने विचार-विमर्शाय भूयोऽप्याकारित आगच्छत् ।

१९४६ ई० वर्षीये सितम्बरमासस्य द्वितीये दिवसे मध्यवर्ति-सर्वकारेण कार्यभारः स्वीकृतः । द्वादशसु मन्त्रिषु— श्री**जवाहरलाल-सरदारपटेल-राजेन्द्रप्रसाद-शरच्चन्द्रवसु-सी० राजगोपालाचारी**-आ**सफअली-जान मथाई-जगजीवनराम-शफाअ्रतअ्रहमद खां-बलदेवसिंह-सी० एच० भाभा-अली-जहीर**-महानुभावा अभूवन् । राजेन्द्रप्रसादाय कृषि-खाद्य-विभागो मिलितः ।

महाशासकेन सह जिन्ना महोदयस्य सन्धिवार्तया मुस्लिमलीगस्य पञ्च सदस्या अपि सर्वकारे सम्मिलिताः परं ते सहयोगिनो भूत्वा कार्यं नाकार्षुः ।

भारते भूयस्यः समस्या अवर्तन्त, साम्प्रदायिक्यां स्थितौ खेदकारिणी विगतिरागच्छति स्म । कलकत्ता नगर्यामभूतपूर्वोपद्रवानन्तरं यत्र तत्र घाताः प्रत्याघाता भवन्ति स्म, शोकपूर्णेऽत्याचारे नृणां नारीणां बालकानां यूनां वृद्धानां केषामपि विचारो न विहितः । बिहार-प्रदेशे तस्योग्रा प्रतिक्रिया-ऽभवत् । तत्रापि साम्प्रदायिका उपद्रवा उद्भूताः । यवनास्तत्र हानिं प्राप्ताः । तादृशीं स्थितिं विज्ञाय श्रीनेहरुः श्रीराजेन्द्रप्रसादस्तथाऽन्ये नेतारः पटनाया-मायातास्तत्र च पत्रकार-परिषदि तैरुद्घोषितं— 'यदि चतुर्विंशतिघण्टासू-पद्रवो न शंस्यति तदा श्रीमहात्मगान्धिन आमरणमनशनं विधास्यन्तीति ।' अत्यन्तमुत्साहेन श्रीनेहरुः श्रीराजेन्द्रप्रसादश्चोपद्रवग्रस्त-क्षेत्राणां भ्रमणं कृत्वाऽशान्तेपूर्णायाः स्थितेर्नियन्त्रणाय यावच्छक्यं प्रायस्यताम् । पटनाया एकस्यां बृहत्यां सभायां श्रीराजेन्द्रप्रसादोऽभाषत— "मानवताया उत्प्रेरण-मास्त यद्-लुण्ठन-वह्निज्वालन-हत्यानामयमुन्मादः सत्वरं शाम्येत् भवतु वा सत्यामावश्यकतायामेतदर्थं बलिदानमपि ।"

कृषि-खाद्य-मन्त्रित्वेन श्रीराजेन्द्रप्रसादः कार्याणि सम्पादयन् समक्ष-मुपेताः समस्याः समाधातुं साफल्येन प्रायतिष्ठ । द्वितीयविश्वयुद्धकारणाद-र्थव्यवस्थाया अस्थिरत्वं वर्षाणां न्यूनाधिक्येनोत्पादने वैषम्यं, च नितरां वृद्धिमती एवास्ताम् । गभीरस्यान्नसङ्कटस्य विषमायां स्थितौ श्रीराजेन्द्र-प्रसादेन भारते कृषकाणां कृषिसाधनानाञ्च सौविध्यं वर्धयितुं तथा-ऽऽत्मनिर्भरताऽऽयात-निर्यात-नीति-सुरक्षितान्नभाण्डागार-व्यवस्थापनादिप्र-क्रियास्तन्निष्ठया वृत्त्या परिचालयितुं भूयस्तरां प्रयस्तम् ।

कृष्यनुसन्धानं महत्त्वपूर्णं कर्तुं तत्सम्बन्धिन्याः संस्थाया उन्नयनं कृतम् । पशुपालन-समस्यां समाधातुं स पशूनां जातेः संस्करणाय समुचित-भोज्यप्रदानाय च समबोधयत् । ग्रामीणेषु नागरिकेषु च क्षेत्रेषु वनस्पतिभ्यः

खाद्यानां निर्माणाय निश्चिता योजनाः प्रवर्तिताः। इत्थं षोडशमासावधि कृषि-खाद्य-मन्त्रिपदं कौशलेन भूषितम्। १९४१ ई० वर्षे स केवलमात्मनः सहयोगिनां प्रसन्नतार्थमनिच्छयाऽपि काङ्ग्रेसाध्यक्षतां स्वीकृतवान् खाद्य-मन्त्रिपदञ्चात्यजत्। तेन कथितमप्यासीत्—'भारतस्य कठिनां खाद्यसमस्या-महमज्ञासिषमेव तथा तया सह योद्धुमात्मानं सज्जयितुमेव तत्परोऽभूवं तावदेव काङ्ग्रेसस्याध्यक्षतायाः संविधान-सभायाश्च सभापतित्वस्य भारो-द्वहनाय विवशतया खाद्यमन्त्रिपदं परित्याज्यमभूत्।' इति।

वितृष्णः स्वार्थेषु स्वयमधिगत-ज्ञान-निवहः,
प्रवीणः कार्येषु व्यवहृतिषु नित्यं च निपुणः।
मनस्वी वर्चस्वी भवति भुवि यस्तस्य विदुषो,
निसर्गं सौजन्यं जनयति चिरं कीर्तिसुरभिम्॥

□

संविधान-सभाया अध्यक्षत्वम्

यद् वदा॑मि॒ मधु॑म॒त् तद् व॑दामि॒ यदीक्षे तद् व॑नन्ति या।
त्विषी॑मानस्मि जू॒ति॒मान॒वा॒न्यान् ह॒न्मि॒ दोधतः॥
(अथर्व० १२।१।५८)

विधिशास्त्र-विपश्चितो भवेन्निजदेशस्य विधाननिर्मितौ।
परमः सहयोग इत्यलं परिचिन्त्योक्तपदे व्यराजयन्॥१॥

संविधान-सभायाश्च, सोऽध्यक्षत्वं विभूषयन्।
श्रीराजेन्द्रप्रसादोऽभूत्, सर्वविज्ञाभिनन्दितः॥२॥

ब्रिटिश-शासनेन १६ मई १९४६ ई० दिने विहितायां घोषणायां संविधान-सभाया रूपरेखा प्रस्तुता। घोषणानुसारं भारतं त्रिषु चतुर्षु वा भागेषु विभज्यैव संविधान-सभा निर्मेयाऽभूत्। घोषणायां तस्याः प्रक्रियाऽपि निर्दिष्टाऽऽसीत्। तदनुरूपमेवैकस्याध्यक्षस्य तथाऽन्येषां पदाधिकारिणां चयनं किञ्चाल्पसङ्ख्यकेभ्यो जनजातीयेभ्यश्च मन्त्रणा-समितेर्घटनमित्यादयो नैके विषया विविधा व्यवस्थाश्च विधेया आसन्। गौराङ्गैर्विभाजननीत्या दर्शिता अन्येऽपि मार्गाः संविधानसभा-संयोजन-कर्मणि विघ्नबहुला एवाभवन्। तथापि संविधानसभायाः कार्यं ९ दिसम्बर

१९४६ ई० दिनात् प्रारब्धम्।

देशस्य प्रत्येकं प्रदेशाद् ये प्रतिनिधय उपागतास्तैः संविधानसभा सङ्घटिता। तस्यामाधुनिकभारतस्य प्रकाण्डा विद्वांसो दार्शनिकास्तत्त्ववेत्तारो विधिप्रशासकाः सूक्ष्मदर्शिनो विधिविदो दृढप्रतिज्ञा राजनयिका देशभक्ताः क्रान्तिकारिणोऽप्यभूवन्। भारतीयेतिहासस्य कस्मिन्नपि युगे नेदृशी सभा सङ्घटिताऽऽसीत्। ईदृश्यां स्थितौ तस्यै संविधानसभायै तादृशस्य मार्गदर्शक-कर्णधारस्य चयनमपेक्षितमासीद् यस्तरङ्गाणां प्रचण्डलहरीणां च मध्ये श्रीगान्धिनः सहितानां राष्ट्रियनेतॄणां सङ्कल्पान् रक्षन् राष्ट्रस्य नौकां ससुखं पारयेत्। नासीदस्मिन् संशयो यत्तस्यां सभायामनेके प्रवीणा विधिवेत्तारस्तथा स्वच्छाः प्रतप्ता राजनीतिज्ञा आसन् परं तेषु सर्वेष्वेको विधिज्ञ ईदृश आसीद् यं प्रति सर्वेषां दृष्टिराकृष्टा। स आसीद् **श्रीराजेन्द्र-प्रसादः**'। ११ दिसम्बर १९४६ ई० दिने श्रीराजेन्द्रप्रसादः सर्वसम्मत्या संविधान-सभाया अध्यक्षो निर्वाचितः।

विषम-परिस्थितीनां साम्प्रदायिक-समस्यानां मतभेदानां पारस्परिक-मनोमालिन्यानां च वातावरणे संविधानसभायाः कार्याणां परिपूर्तेः सामर्थ्यं प्रबुद्धता च श्रीराजेन्द्रप्रसादे कीदृशी कियती चावर्ततेत्यस्य तथ्यस्य सङ्केतान् संविधान-सभाया मान्याः सदस्या इत्थं न्यरूपयन्—

डॉ० एस० राधाकृष्णन्-महानुभावोऽब्रवीत्—

"इयं संविधान-संसद् ब्रिटेनस्य राजनीतिकार्थिक-सामरिकप्रभुत्वाप-वारणाय तथा स्वतन्त्रभारतस्य स्थापनायै विधान-निर्माणाय सङ्घटिताऽस्ति। सौभाग्यादस्याः स्थायी सभापतिर्बिहारवासी वर्तते। अस्थायी सभापतिरपि (डॉ० सच्चिदानन्द सिन्हा) बिहारस्यैवासीत्। बिहारवास्तव्यानां भावना सज्जनताया अजेयतया परिपूर्णाऽस्ति। सज्जनता सर्वानपि सारल्येन वशी-करोति। डॉ० राजेन्द्रप्रसादरूपेणास्मास्वीदृशं व्यक्तित्वमस्ति यद् हि सज्जन-ताया अस्या मूर्तं रूपं विद्यते। उत्तमताया एते आत्मानः सन्ति एतेषु महद् धैर्यं साहसश्च विराजेते। एतैरापद आत्मसात् कृताः। एते कष्टसहिष्णवो विद्यन्ते। भारतस्य काङ्ग्रेसस्य च सेवकाः सन्ति किञ्चैतेषु तस्या भावनाया अवतारा वर्तन्ते यस्यै देशोऽयं गर्वमावहति।"

श्रीगोपालस्वाम्याय्यङ्गरः स्वीयान् विचारानेवं प्राकटयत्—

'श्रीराजेन्द्रप्रसादस्य (संविधान-सभाया अध्यक्षपदाय) निर्वाचनं तस्यासीम्नो विश्वासस्य प्रतीकमस्ति य एतस्मिन् विधानपरिषद एव किम् अपि तु समस्तदेशस्यास्ति। सभापतिरूपेण निर्वाचनं कृत्वा वयं

वस्तुतस्तेषां तावन्तं सम्मानं **न** कुर्मो यावन्तं तेऽस्माकमामन्त्रणं स्वीकृत्यास्माकं सम्मानं कुर्वन्तो विद्यन्ते। अतो वस्तुतोऽस्माभिरस्माकमभिनन्दनं करणीयं वर्तते यत् ते विधान-परिषदः स्थायि-सभापतेरासनं स्व्यकुर्वन्।"

डॉ० श्रीराजेद्रप्रसादमहानुभावानां समग्रं जीवनं देशसेवार्थमात्मसमर्पणस्य **जीवनमभूत्**। अनुपमत्यागेन तपस्यया चैषां जीवनं पवित्रं सम्पन्नमस्ति। स्वस्यास्तीव्रबुद्धेरगाधस्य ज्ञानस्य कारणादेवैते देशवासिनामादरं सम्मानं च विन्दन्ति। **स्वाभाविकं सौजन्यं, समस्यानां परिज्ञानस्य पद्धतिः**— या वादविवादयोरावेशं प्रति प्रवहतो जनान् शान्तये बाधयति—तथा **मधुराणि वचनानि**— यानीदं दायित्त्वं सफलयितुं सहायानि भविष्यन्ति— तान्येतैः स्वीकृतानि सन्ति।"

एतेषामध्यक्ष-निर्वाचनानन्तरमिदं गदितुं शक्यते यत् "संविधान-सभया स्वस्य भाग्यस्य निर्णायकः श्रीगणेशः कृतोऽस्तीति।"

भारत-कोकिला-सरोजिनीनायडूमहाभागा चैवं व्यावृणोत्—

"कदाचित् केऽपि मामकथयन् 'यदेकस्यां सूक्तौ श्रीराजेन्द्रप्रसादस्य विषये महाकाव्यमेकं लिखतु भवती', तदा मयोत्तरितमासीद् यद् 'यदि मधुनः पात्रे निमज्जिता स्वर्णलेखिनी मत्सविधे भवेत् तदाहं तथाकर्तुं प्रभवामि, यतो हि सर्वेऽपि शब्दास्तेषां गुणानां वर्णनायाथवा समुचितरीत्या तेषां वैशिष्ट्य-वर्णनायापूर्णा भविष्यन्ति। अहं तेषां कल्पनां खड्गधारिणो रूपेण नैव करोम्युत सुमनोधारिणो रूपेण विदधामि यद् मनुष्याणां हृदयेषु विजयं प्राप्नोति। यतो हि तेषु स्वाभाविकी मधुरता विद्यते या तेषां शक्तेर्भागोऽस्ति। तेषु सहजा बुद्धिमत्ता वर्तते या तेषामनुभवानामङ्गमास्ते। तेषु दृष्टेनिर्मलता रचनात्मिका कल्पना रचनात्मिका चास्था विद्यन्ते यास्तान् स्वयं भगवतो बुद्धस्य चरणयोरत्यन्तं समीपं प्रापयन्ति। अद्य ते भारतस्य भाग्य-प्रतीकाः सन्ति। ते तद् घोषणापत्रं व्यवस्थापयितुमस्मान् सहयोक्ष्यन्ति यदस्माकं जनन्यै—तस्यै जनन्यै यस्याः पदयोरद्यापि बन्धनशृङ्खले निगडिते स्तः— स्वतन्त्रता-प्रेम-शान्तीनां ज्योतिर्धारिण्याः स्वरूपे, तस्याः समुचितं स्थानं दापयिष्यति।"

प्रारम्भादेव पुंसो भवति यदि मतिर्देशसेवादिकार्ये,
सेवाग्रेऽप्यस्य नित्यं व्रजति सहचरीवैव साकं समन्तात्।
बाल्यादेवात्र तद्वच्छ्रम-शम-तपसामर्जनेऽभूत् सयत्नः,
श्रीराजेन्द्रप्रसादस्तत इह महितो विज्ञवर्यैः सदस्यैः ॥३॥

अध्यक्षासनं विभूषयता श्रीराजेन्द्रप्रसादेन स्वीय उद्घाटन-भाषणे संसदः स्वशासनस्य स्वनिर्णयस्य चाधिकारेण बल-पूर्वकं कथितम्—

"अहं जाने यत् संविधान-संसदा कैश्चत् सीमभिः सह जन्म नीतमस्ति, यान्यस्या जन्मना सहैवास्यामारोपितानि सन्ति। अस्माभिः स्वेषु कार्येषु कस्मिन्नपि निर्णये वा तानि सीमानि न विस्मर्तव्यानि तेषामनादर उपेक्षा वापि न विधेयाः। परमिदमप्यहं वेद्मि यदियं संसदेकं स्वशासितं स्वनिर्णयात्मकं स्वतन्त्रं सङ्घटनमस्ति यस्य कार्ये काऽप्यन्या बाह्या शक्ति-र्हस्तक्षेपं कर्तुं न शक्नोति तथा यस्य निर्णयान् न कोऽपि बाह्यो जनः परिवर्तयितुं विकर्तुं वा समर्थोऽस्ति। निःसंशयमस्या विधानसभाया अयम-धिकारो विद्यते यज्जन्मन एव यानि सीमान्यस्यामारोपितानि सन्ति तेभ्य इयं मुक्तिं प्राप्नुयात् तानि खण्डखण्डशः कुर्यात् तथा देव्यः सज्जनाश्च भवत आशासे यद् भवन्तो य एकस्य स्वतन्त्रस्य तथा मुक्तस्य भारतस्य संविधानं निर्मातुमत्रैकीभूताः सन्ति, तेभ्यः सीमभ्यो मुक्तिं प्राप्य संसारस्य समक्ष-मेकमादर्शं सविधानं स्थापयिष्यन्ति। तत्संविधानमस्मिन् विशाले देशे निवसतां सर्वेषामपि दलानां जनान् सम्प्रदायान् धर्मांश्च सन्तोषयिष्यति तथा प्रत्येकं जनाय कार्यस्य विचारस्य विश्वासस्याराधनायाश्च स्वातन्त्र्यं प्रदास्यति। तत् प्रत्येकं मानवायोच्चतमं शिखरं यावदुत्थातुं सौविध्यस्या-धिकारं दास्यति तथा प्रत्येकं जनाय सर्वविधस्य स्वातन्त्र्यस्याधिकारं प्रदास्यति। अहमाशासे विश्वसिमि चेयं संविधानपरिषत् समयं प्राप्य शक्तिं प्राप्स्यति यथेदृशीभिः संविधानपरिषद्भिः प्राप्ताऽस्ति।"

अनेन सहैव मुस्लिमसदस्यानामसहयोगं विज्ञाय ते सहयोगप्रदानाया-भ्यर्थिताः। तेभ्यः संविधानसभाया द्वाराण्युद्घाटितान्यासम्। निर्भीकतया च श्रीराजेन्द्रप्रसादेन कथितं—'संविधानसंसद् हिन्दूनां समूहः' किंवा 'सवर्ण-हिन्दूनां सभा विद्यत' इति कथनं नितान्तं भ्रमपूर्णमस्ति।' एवं सत्यपि मुस्लिम-लीगसदस्यानां विघटननीतिः सुस्थिरैवासीत्। भारतस्य महाधिशासक-श्रीबैवेलमहोदयस्य कार्यकाल-समाप्त्यनन्तरं २४ मार्च १९४७ ई० दिने यदा लार्डमाउण्ट-बेटनमहानुभावेनागत्य पदं स्वीकृतं तदा भारतं स्वतन्त्रं विधातुं तेनैकाधिसूचना प्रसारिता। ३ जूनदिवसे प्रकाशितायां योजनायां भारतविभाजनस्य परामर्शो दत्त आसीत्। सर्वथाऽनिच्छायां सत्यामपि राष्ट्रनेतृभिः परिस्थितिपारवश्यात् स्वीकृतिर्दत्ता। तदनुसारं १९४७ ई० वर्षे जुलाईमासे ब्रिटिश-संसदि '**भारतस्वातन्त्र्य-प्रस्ताव**' उपस्थापितः स्वी-कृतश्च। इत्थं १९४७ ई० वत्सरस्य पञ्चदशे दिने '**भारतं**' '**पाकिस्तान**'-मिति द्वाभ्यां नामभ्यां स्वतन्त्रराष्ट्रयोर्जन्माभूत् तथाऽनयोर्नवीनराष्ट्रयोः सीमनिर्धारणं विहितम्।

१९४७ ई० वर्षस्यागस्तमासे चतुर्दश-पञ्चदश-दिवसयोर्मध्यरात्रौ भारतं स्वतन्त्रमभूत्। शतीनां स्वप्नः पूर्णः। अस्माकं देशाय तद्दिनमतीव

महत्त्वपूर्णमभवत्। तस्मिन्नेव दिने भरतीय-विधानपरिषदः सत्ताहस्तान्तरणाधिवेशनं संविधान-सभाभवने नवदेहल्यां रात्रावेकादशवादनकालेऽध्यक्षस्य श्रीराजेन्द्रप्रसादस्य सभापतित्वे प्रारभत। अध्यक्षेण घोषितं यदद्यतनस्य कार्यक्रमस्य प्रथमो विषयो **'वन्दे मातरम्'** इत्यस्य गानमस्ति। श्रीमत्या-सुचेताकृपलान्या 'वन्दे मातरम्' गानस्य प्रथमं पदं गीतम्। तदवसरेऽध्यक्षेण श्रीमता राजेन्द्रप्रसादेन कथितम्—'अस्माकमितिहासस्य महत्त्वपूर्णेऽवसरे, यदा वयं वर्षाणां सङ्घसंङ्घर्ष-बलिदानानन्तरमस्य देशस्य शासनधुरां स्वहस्ते गृहीतुमुद्यताः स्मः स परमपिता परमात्मा स्मर्तव्योऽस्ति यो हि मानवान् निर्माति। वयं तेभ्योऽगणितेभ्यो ज्ञाताज्ञातपुरुषेभ्यः स्त्रीभ्यश्च श्रद्धाञ्जलीनर्पयामो यैरस्य दिवसस्य प्राप्तये स्वीयानां प्राणाः समर्पिताः। हसन्तो हसन्तो गुटिकानां सन्धाना जाताः, बन्धनानि प्राप्ताः, कारासु कृष्ण-पानीयस्य द्वीपे च सम्मिल्य सम्मिल्यात्मनो जीवनस्योत्सर्गमकुर्वन्। यैर्निःसङ्कोचं मातृपितृ-स्त्री-सन्तति-भ्रातृ-भगिन्यः स्वदेशश्च परित्यक्ताः। अद्य तेषां त्यागस्य तपसश्चैव फलं विद्यते, यद् वयं दिनमिदं पश्यामः। तत्समये श्रीमहात्मगान्धिभ्योऽपि श्रद्धा-भक्त्योरुपहारः समर्पितो ये पथि-प्रदर्शका आशाया उत्साहस्य ज्योतीरूपाः सन्तोऽस्माकं सहाया अभूवन्। सर्वे नेतारः श्रमिकाः कर्मकरा देशवासिनो विदेशेषु स्थिताश्च हिताकांक्षिणः सर्वेऽपि कृतज्ञाताज्ञापनेन संस्मृताः।'

इत्थमेव विश्वस्य सर्वे देशा विश्वासदानेन सम्भाविताः। विश्व-शान्ति-विश्वमैत्री-सहिष्णुता-धर्म-संस्कृति-जाति-सद्भावना-प्रभृति - कार्येषु भारतीया योगदानायाभ्यर्थिताः। तदानीं विभाजनस्य कारणाद् वियुक्तानां मुस्लिमसदस्यानामपि सखेदं स्मरणं कृतं तेभ्यः शुभकामनाश्च प्रहिताः।

एवमेव श्रीजवाहरलालनेहरुणाऽपि स्वीया विचाराः प्रकटिताः। लार्डमाउण्टबेटनमहाभागेन सर्वोच्च-राज्यपालस्य शपथ-ग्रहणं कृतं तेन च ब्रिटेनस्य सम्राजः सन्देशः पठित्वा श्रावितः। श्रीराजेन्द्रप्रसादमहानुभावो विभिन्नेभ्यो देशेभ्यः समागतान् सन्देशानपठत्।

भारतभुवः प्रत्यणु प्रसन्नं सुखितं सानन्दञ्चावर्तत। पञ्चदशागस्त-दिनं स्वातन्त्र्यदिनं प्रायो द्विशतवर्णानां दासताया विनिवृत्तिदिनमभूत्। प्रति-गृहं प्रतिवीथि जना आन्दोत्सवानायोज्य सुखदां परिणतिं व्यञ्जयन्तः कृत-ज्ञतां दर्शयन्तः श्रद्धाञ्जलीनपर्यन्तश्चिरस्मरणीयतामावहन्तोऽवालोक्यन्त। तदानीम्—

वर्णत्रय्या प्रदीप्तं मृगरिपुखचितं शान्तिचक्राङ्कितञ्च,
स्वातन्त्र्यस्य प्रतीकं दिशि विदिशि सरद् धूतमूर्ध्वं प्रकामम्।

संवीक्ष्य प्राणिवर्गं भरतभुवि भवं भूरिशः शस्तमोदं,
प्रत्यङ्गं राष्ट्रभूमेः प्रतिपदमुदितं प्रीतिपूर्वं व्यराजत् ॥४॥

सर्वेऽपि भारतीयास्तदाऽकामयन्त—

राष्ट्रे स्वे परदेशवासिवणिजां गौराङ्गकानां स्थितिं,
नित्यं स्वार्थपरायणां च विषमां मत्वा स्वकीयैर्जनैः।
नाना कष्टततीर्विषह्य सततं स्वाराज्यमाप्रापितं,
स्वातन्त्र्यप्रतिसूचि तद् दिनमिदं मोदाय जायेत नः ॥५॥

तद्दिनं स्वातन्त्र्यायार्पितशिरसां हुतात्मनां स्मृतिदिनमप्यमन्यत—

यैश्च स्वीयं समस्तं जनधनजसुखं द्रागपाकृत्य सत्ये,
मार्गे राष्ट्रस्य रक्षाहितकृति चरणं स्थापितं वीतभीत्या।
शास्तॄणां चण्डदण्डप्रतिहतिरपि यैः स्वीकृता हर्षपूर्वं,
तेषामेषा विशेषा स्मृतितिथिरमला तुष्टये स्यान्न केषाम् ॥६॥

यतो हि भारतस्य वृद्धैर्युवभिर्बालैः स्त्रीभिः पुरुषैश्च—

कारामाराध्य राधाप्रियजननभुवं मुक्तिसङ्ग्रामकामै—
र्वीरैस्तत्पोषणाय प्रतिसदनमथो प्रापितं तस्य वृत्तम्।
श्रुत्वा कर्त्तव्यमार्गे सपदि युवजनैः सम्प्रवृत्तैः प्रकामं,
सिक्तं स्वातन्त्र्यमूलं निजरुधिरजलैः राष्ट्रभक्तिप्रमत्तैः ॥७॥

स्वाराज्ये जन्मसिद्धाऽधिकृतिरिरिति पथि प्रीतिपूर्वं गृणत्सु,
देशोद्धाराय मत्तेष्वनिशमरिकृता देशभक्तेषु कामम्।
निर्दैन्यं यष्टिमुष्ट्यङ्घ्रिकरगुटिकातीव्रवेत्र-प्रहारा,
ह्यद्याप्यस्मच्छ्रुतीनां तटनिकटगताः सन्ततं ते ध्वनन्ति ॥८॥

हन्तास्माकं जनन्या वपुरतिविमलं खण्डखण्डं विधाय,
दुर्दान्ताः कूटनीत्या किमपि विकृतिमत् कर्म संसाध्य चाङ्ग्लाः।
कुक्षौ सर्पं निवेश्य प्रमदमनुभवन्त्यद्य किं ब्रूमहेऽत्र,
स्वातन्त्र्यं नास्ति पूर्णं तदनु ! कथमिदं कष्टमावेदयामः ? ॥९॥

पुरातनान्नूतनयुगे प्रविष्टा आत्माऽस्य राष्ट्रस्य च सुप्रबुद्धः।
भाग्यानुरूपां निजदेशमूर्तिं निर्मातुमेषोऽवसरोऽद्य लब्धः ॥१०॥

इत्थं विभिन्नासु विचारधारासु निमज्जन्त उन्मज्जन्तो भारतीया आसन् किन्तु दुर्भाग्यवशात् सुखमिदं नाधिकं समयं यावत् प्राचलत्। हर्षोल्लासयोर्वेलाया द्वितीयदिनादेव साम्प्रदायिकानामुपद्रवाणां बिभीषिका

अवर्धन्त। सर्वत्र शोको व्याप्तः। एको महानुभावो, यः कुत्रापि स्वतन्त्रताया हर्षोल्लासे सम्मिलितो नाभूत् परं यस्यानुपस्थितिः सर्वानप्यव्यथयत् स आसीत्—**'महात्मा गान्धी'**। श्रान्तः क्लान्तः स राष्ट्रपिता तद्दिनेऽपि बहुलं सन्तापं हृदये निदधानो बङ्गप्रदेशस्य ग्रामेषु पद्भ्यां चलन् साम्प्रदायिक्या बिभीषिकया सन्तापितानां परिवाराणामवशेषेभ्यः सान्त्वनाः सहानुभूतीश्च वितरति स्म। आजीवनं प्रेम्णोऽहिंसायाश्च पाठान् योऽपाठयत् तथा शान्तिमयैरुपायैर्देशस्यैक्यं रक्षितुं स्वातन्त्र्यं च प्रापयितुं समघर्षयत् परमद्य यदा स्वतन्त्रतायाः साकारत्वकालः समुपेतस्तदा देशे शान्तेः प्रेम्णोऽहिंसायाः स्थाने घृणाया हिंसाया आतङ्कस्य च साम्राज्यं व्याप्तमभूत्। परेभ्यो भवतु नाम विजयस्य क्षणः, परन्तु महात्मगान्धिभ्यस्तु ततोऽधिकं दुःखप्रदं नासीद् वातावरणम्। तेषां नेत्रयोः पुरत एव तदीयानामादर्शाणां हननमभूत्। यस्याः साम्प्रदायिकताया घृणारूपरक्षसो विरुद्धं महात्मगान्धिनः समग्रं जीवनमयुद्धयन् तस्य हस्तैरेव स्वाधीनतायाः कतिचिन्मासानन्तरं—३० जनवरी १९४८ ई० दिने— तेषां दैहिकजीवनस्याप्यन्तोऽभवत। हन्त!

दीनोद्धार-परायणः श्रमवतां मित्रं स्वदेशोन्नते—
रेकः सर्वविसारि-दीप्तिलसितः प्रज्ञा-प्रदीपो महान्।
सत्याहिंसनयोरुपासनरतः शान्तिप्रियः कर्मठः,
श्रीमन्मोहनदासगान्धिरगमत् स्वर्गं महात्मा स्वराट् ॥११॥

पञ्चदशागस्तदिने भारतं स्वाधीनमभवत् परं स्वाधीनता-सङ्घर्षस्य महती गाथा समाप्ता नाभूत्। अनेकेष्वर्थेषु स्वतन्त्रताऽपूर्णैवासीत्। देशस्य विभाजनेन विस्थापितानामावाससमस्या भारतीयराज्यानां समस्या नवोद्योगानां व्यवस्थासमस्या साम्प्रदायिकोपद्रवाणां च समस्या भूयस्तरां पुरःस्थिता आसन्। तत्र हि सरदारपटेलस्य दूरदर्शितया नीतिनैपुण्येन व्यवहारकौशलेन च सर्वाणि देशिराज्यानि भारतसङ्घे मेलितानि तथा तेषां प्रशासनिकस्वरूपस्य लोकतन्त्रीकरणं कृतम्। अन्या अपि समस्याः क्रमशो नेतॄणां कौशलेन यथाकथञ्चन समाहिताः।

अस्मै विशालाय देशायैकस्य संविधानस्य निर्माणं,-यस्मिन् प्रायश्चत्वारिंशत्कोटिसङ्ख्यका मानवा वसन्ति स्म, असङ्ख्या विभिन्नता आसन्, साम्प्रदायिका मतभेदा अवर्तन्त तथा भारतीय-राज्यानां समस्याः पुरःस्थिता अभवन्,—वस्तुतोऽसाधारणं कार्यमभूत्। परमिदं कार्यं श्रीमतो राजेन्द्रप्रसादस्य सुयोग्येन प्रेरणाप्रदेन नेतृत्वेन तथा प्रमुखनेतृवराणां राजनीतिज्ञानां च हार्दिकेन सहयोगेन—यैः सर्वैर्देशस्य वास्तविकाय हिताय तत्परतया विभिन्नासु समितिषु नैरन्तर्येणाश्रान्ततया कार्यं कृतं, त्रिषु वत्सरेषु पूर्णं विहितम्।

१९४९ ई० वर्षस्य नवम्बरमासे षड्विंशत्यां तारिकायां विधान-परिषदि सर्वसत्तात्मकस्य भारतीय-गणराज्यस्य संविधानं स्वीकृतम्। विधान-परिषदोऽवसानसत्रे श्रीमान् राजेन्द्रप्रसादोऽभाषत—"अयमेकोऽपूर्वो विजयो विद्यते यो राष्ट्रपितृभिर्महात्मगान्धिभिः प्रदर्शितेन पाठितेन च प्रकारेण प्राप्तोऽभूत्, किञ्च या स्वतन्त्रताऽस्माभिः प्राप्ताऽस्ति तस्याः स्थिरत्वं तस्याः संरक्षणं तथा तस्या वास्तविकरूपेण फलदायित्व-सम्पादनमस्मासु निर्भरति।" अस्मिन्नेवावसरे संविधानस्य विशिष्टानां गुणानां वर्णनमपि स महानुभावोऽकार्षीत्।

चिरं विमृश्यात्म-मनो-नियोगाद्, विधीयमानं सकलं हि कर्म।
भवत्यनल्पं सुखकारि नित्यं, हितं मनोहारि जनोपकारि॥

* *
*

पूर्णा-कला

गणतन्त्रं तत्संविधानञ्च

स हि स्वसृत् पृषदश्वो युवा गणो या ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविताथा वृषा गणः॥

(ऋग्वेद० १।८७।४)

आ वेदकालादिह भारतावनावासीत् प्रवृत्तं गणतन्त्रमद्भुतम्।
तथैव सत्याग्रहसाधनाश्रयाद् विभासितं तद्गणतन्त्र-गौरवम्॥१॥

गणानां गणपतीनां गौरवं गणतन्त्र-परम्पराया अस्तित्वं च भारते पुरातनात् कालात् प्रवर्तितमभूत्। वैदिकैर्मन्त्रैरभिष्टूयमानो गणः किल — १-**स्वसृत्**=स्वयं सरणशीलः, स्वयं सदसती परीक्ष्यान्यतरद् भजमानो न तु मूढ इव परप्रत्ययनेयबुद्धिः, २-**पृषदश्वः**=महाप्राणः, ३-**युवा**=उत्साहसम्पन्नः, ४-**ईशानः**=शासनकुशलः, ५-**स्तविषीभिरावृतः**=स्तुतिभिश्चावृतः, ६-**सत्यः**=कायवाङ्मनसैः सत्यसेवनपरः, ७-**ऋणयावा**=ऋणानां निराकर्ता, ८-**अनेद्यः**=अनिन्द्यः, ९-**अस्या धियः**=स्वस्याः सदसद्विवेकादिनिपुणाया बुद्धेः **प्राविताथा**=रक्षकः प्रसारकश्च, १०-**वृषा**=प्रजाकामानां वर्षणे तत्परस्तथा ११-गणः=सत्सु प्रथमगणनीय इत्येतैर्गुणैर्भूषित आसीत्।

तादृशे गणतन्त्रे शासकोचितैर्गुणैर्भूषितो जनो राज्यसञ्चालनायाऽपि निर्वाच्यते स्म। तत्र धर्मार्थविषये सुसूक्ष्माया बुद्धेः संरक्षणाय 'निःशङ्कतां प्रियाप्रियमूलकविचारत्यागं, प्राणिमात्रे समभावं, कामादि-विकार-परित्यागपूर्वकं त्यक्तधर्माणां निग्रहं, भूमिवासिनः सर्वेऽपि जीवा ईश्वर-स्वरूपा इति मत्वा तान् प्रति सेवाभावनां नीतियुक्तं धर्मानुसरणं, स्वैराचारस्यानाचरणं, सर्वदैवाहं करिष्यामीति प्रतिज्ञाय मनसा वाचा कर्मणा तेषां पालनं सर्वथाऽऽवश्यकं मन्यते स्म। तादृशं गणतन्त्रमेव **'न दण्ड्यो न च दाण्डिक'** इत्युद्घोषं कर्तुं समर्थमभवत्। क्रमेण ह्रासं गच्छति गणतन्त्र-गौरवे दासता-पाशे निबद्धुं प्रवृत्ता अस्माकं भारतीयाः। 'विवेकभ्रष्टानां भवति विनिपातः शतमुख' इत्युक्त्यनुसारं भूयो भूयो युद्ध्यन्तोऽपि देशवासिनः स्वातन्त्र्यप्राप्तावसाफल्यमेवाविन्दन्। स्वदेशीया विदेशीयाश्च शासका

आगत्यागत्य व्यथयन्तो लुटचन्तः स्वार्थं साधयन्तो व्यापारमाध्यमेन प्रविश्य राज्यं स्थापयन्तोऽत्रैव हन्त चिरमतिष्ठन्। किन्तु

भस्मना संवृतोऽप्यग्निस्तेजो हीनो ,न जायते।
अनावृतस्तु भूयोऽपि जायते दहने क्षमः ॥२॥

तथैव भारतीयानां स्थितिरासीन्न शोभना।
ऊर्जिता सा पुना राष्ट्रे राष्ट्रभक्तैः समीरिता ॥३॥

गौरवं गणतन्त्रस्य ज्ञात्वा योद्धुं प्रवर्तिताः।
वर्षाणां च प्रयासेन सफला अभवंस्तदा ॥४॥

अहिंसा-सत्ययोर्नीत्या शस्त्राण्यत्र सुसंयताः।
आङ्ग्लान् पराकृत्य देशे गणतन्त्रमतिष्ठिपन् ॥५॥

तदिह हि गणतन्त्रं प्राणिनां सौख्यमन्त्रं,
सकलजनगणानां दुःखहानैक-यन्त्रम्।
अधन-सधन-वर्गभेदतो यत्र चारा—
न्निज-निजमतियुक्ता आद्रियन्ते विचाराः ॥६॥

एदनुसारं— भारतीयं संविधानं देशे प्रतिनिधिकस्य लोकतन्त्रस्य स्थापनया सहैकविंशतिवर्षायुषोऽधिकेभ्यः सर्वेभ्यो वयस्कनागरिकेभ्यो मतदानाधिकारमदात्। तेन कोटिशो जना ये शतोभ्यो मूका अभूवंस्तेभ्यो वाणी प्रापिता। स्वतन्त्रभारतस्य संविधानानुरूपं समस्ते देशे छन्दाकलन-व्यवस्थावशाज्जनतासु राजनीतिकी चेतना परिपक्वता चावर्धताम्। संविधानानुसारं संसदीया शासनप्रणाली सर्वोत्तमाऽमन्यत तथा धर्म-निरपेक्षायाः सङ्घात्मक-व्यवस्थायाः सूत्रपातेन जन-जीवने स्वातन्त्र्य-भावनाया अपूर्वः सञ्चारोऽभवत्। संविधानं सङ्घशासन-राज्यशासन-योर्मध्ये शक्तीनां वितरणं तथैकस्याः स्वतन्त्राया न्यायपालिकायाः सृष्टिमकरोत्। सङ्घकार्यपालिकाया अध्यक्षो राष्ट्रपतिर्भवति। एकेन विशेषेण निर्वाचकगणेन परोक्षनिर्वाचनपद्धत्यैकलसङ्क्रमणीयमतद्वारा सानुपातप्रतिनिधित्वरीत्या पञ्चभ्यो वत्सरेभ्यस्तस्य निर्वाचनं क्रियते। राष्ट्रपतये तत्कर्तव्यानां निर्वाहणे साहाय्याय परामर्शाय चैका मन्त्रि-परिषद् भवति यस्याः प्रधानं प्रधानमन्त्री भवति। इयं मन्त्रिपरिषदेव कार्यपालिकाऽस्ति। लोकसभां प्रति सामूहिकमुत्तरदायित्वं धारयन्ती मन्त्रिपरिषद् बहुमतस्य विश्वासं प्राप्नुवाना लोकसभायां स्वीपे पदे तिष्ठति बहुमताभावे च सा विघटते।

भारतस्यैक उपराष्ट्रपतिरपि भवति यश्च संसद उच्चसदनस्य राज्यसभायाः सभापतिर्भवति राष्ट्रपतेरभावे स तदीयं कार्यभारं निर्वहति। सङ्घस्य विधानमण्डलं संसत् कथ्यते। तस्याः सदनद्वयं—राज्यसभा लोकसभा च भवति। सदनयोः सदस्यव्यवस्था मनोनयन-व्यवस्थाः कार्यकालव्यवस्थाश्च सन्ति। लोकसभायाः सामान्योऽवधिः पञ्चवर्षात्मकः परं राष्ट्रपतिस्तस्याः पूर्वमपि विघटनं कर्तुं प्रभवति। अस्या अध्यक्षोपाध्यक्षौ लोकसभैव निर्वाचयति। अध्यक्ष उपवेशनेषु साभापत्यं करोति तथा सदने शान्तिमनुशासनं सभायाः सदस्यानां विशेषाधिकारान् रक्षति। भारतसङ्घस्य राज्यानामौपचारिकः प्रधानो राज्यपालः कथ्यते। राष्ट्रपतिस्तं नियुनक्ति स च राज्यस्य मन्त्रिपरिषदः परामर्शेण चलति किन्तु सांविधानिके गतिरोधे सति तदीया भूमिका निर्णायिका भवति कतिचित्सु च विषयेषु तस्य स्वविवेकेन कार्यसम्पादनं तथा राष्ट्रपतये स्वतन्त्ररूपेण प्रतिवेदनप्रेषणमप्यावश्यकं भवति।

राज्यविधानमण्डलस्य निम्नं सदनं 'विधानसभा' ऽस्ति। सार्वभौमेन वयस्कमताधिकारेग तदीयाः सदस्या निर्वाच्यन्ते। भारतीयसंविधाने कार्याङ्ग-विधानाङ्गयोरिव सङ्घाय राज्येभ्यश्चैकैव न्यायालयशृंखला सङ्घस्य राज्यानाञ्च विधानानि प्रशास्ति। उच्चतमो न्यायालयो भारतीय-न्याय-व्यवस्थायाः शिखरे वर्तते यो भारतस्य मुख्यन्यायाधीशेन तथा कैश्चिदन्यैर्न्यायाधीशैः सम्मिल्य भवति। उच्चतमन्यायालयस्य क्षेत्राधिकारो ऽत्यन्तं व्यापको विद्यते। सोऽभिलेख-न्यायालयो वर्तते यः स्वापमानाय दण्ड-दान-शक्त्या सह न्यायालयस्य सर्वाः शक्तीर्धारयति। तस्य क्षेत्राधिकारे प्रारम्भिकानि निवेदनात्मकानि तथा परामर्शात्मकानि सर्वविधानि प्रकरणा-न्यायान्ति। प्रत्येकं राज्यायैकस्योच्चन्यायालयस्य व्यवस्था विद्यते मुख्य-न्यायाधीशेन कैश्चिदन्यैर्न्यायाधीशैश्च सम्भूय यस्य निर्माणं भवति। राज्येषू-च्चन्यायालया एव न्यायिकानि प्रशासकानि च कार्याणि सम्पादयन्ति। न्यायपालिकानां निष्पक्षतायै स्वतन्त्रतायै चाप्यनावश्यका रक्षोपायाः संविधानेन विहिताः सन्ति। इदमेव कारणमस्ति यत् स्वाधीने भारते न्याया-लयानां कार्यपद्धतिरतीव गौरवपूर्णा विद्यते किञ्च साधारणेषु जनमनस्सु जनतायाः सांविधानिकाधिकाराणां स्वाधीनतायाः प्रहरिरूपेण च तत्प्रति श्रद्धा ऽखण्डिता सम्मानश्च सुस्थिरौ स्तः। यतो हि--

देशस्यास्य स्वस्तये शान्तये च, रक्षादक्षं सर्वतन्त्रस्वतन्त्रम्।
शुद्धं स्वच्छं सर्वलोकोपकारि, सर्वैर्मान्यं राजते संविधानम्॥

□

भारतीयगणतन्त्रस्याद्या राष्ट्रपतयः

ये ग्रामा यदरण्यं याः सभा अधिभूम्याम्।
ये संग्रामाः समितयस्तेषु चारु वदेम ते॥

(अथर्व० १२।१।५६)

स्वातन्त्र्यस्य सुदीर्घकालिक - महासङ्घर्षयुद्धाग्रणीः,
सत्यत्यागविभान्वितो विनयवान् दान्तः सुशान्तः सुधीः।
धैर्यौदार्य-सहिष्णुता-मधुरता-दाक्षिण्य-निःस्वार्थता-
श्रद्धा-शुद्धि-विवेकितादि-गुणभृद् राष्ट्राधिपो राजते ॥१॥

१९५० ई० वर्षस्य जनवरीमासे षड्विंशतितमे दिवसे भारतभूमेर्गणतन्त्रत्व-प्राप्तेर्घोषणाऽजायत। तस्मिन् दिने भारतीय-संविधानसभया स्वीकृतस्य सार्वभौम-सम्प्रभुतासम्पन्नस्य गणतन्त्रस्य स्थापनमभूत्। श्रीराजेन्द्रप्रसादः सर्वप्रथमं राष्ट्रपतिपदेऽभिषिक्तः। इदं पदं मध्यवर्ति-राष्ट्रपतिरिति नाम्ना ख्यातम्। एतस्मिन्नवसरे श्रीमान् राजेन्द्रप्रसाद इत्थमभाषत —

"अस्माकं गणराज्यस्येदमुद्देश्यं—अस्य नागरिकेभ्यो न्यायस्वतन्त्रता-समता-प्राप्तिस्तथाऽस्मिन् विशालस्य देशस्य सीमसु निवसत्सु जनेषु भ्रातृ-भावाभिवर्धनं—ये विभिन्नान् धर्मान् मन्वते, नैका भाषा भाषन्ते तथा विभिन्ना रीति-प्रथाः पालयन्ति। वयं सर्वैर्देशैः सह मैत्रीं वाञ्छामः। अस्माकं भाविषु कार्यक्रमेषु रोगाणां दैन्यस्याज्ञानस्य चोन्मूलनं सम्मिलितमस्ति। वयं तान् सर्वानपि विस्थापितान् जनान् पुनर्वासयितुं तथा स्थैर्यं प्रदातुं चिन्तिताः स्मः, यैः काठिन्यानि सोढानि हानयश्च प्राप्ताः साम्प्रतमपि ये काठिन्ये वर्तन्ते। ये कीदृशेनाप्यधिकारेण वञ्चिताः सन्ति तेभ्यो विशिष्टं साहाय्यं दातव्यम्, लक्ष्यस्यास्य प्राप्तयेऽस्तीदमावश्यकं यद् वयं तां स्वतन्त्रतां रक्षेम याऽद्यास्मभ्यं प्राप्ताऽस्ति। परं राजनीतिक-स्वतन्त्रताऽनुरूपमेवार्थिकी सामाजिकी च स्वतन्त्रताऽपि समयस्यापेक्षाऽस्ति। वर्तमानमस्मदतीतापेक्षया-ऽधिकां निष्ठां बलिदानञ्च वाञ्छति। अहमाशासे प्रार्थये चास्मभ्यं योऽवसरः प्राप्तोऽस्ति वयं तस्योपयोगे समर्था भविष्यामः। अस्माभिः स्वीयाः सर्वा अपि भौतिक्यः शारीरिक्यश्च शक्तयः स्वस्या जनतायाः सेवायां नियोजनीयाः। अहमिदमप्याशासे यदस्य शुभस्यानन्दमयस्य दिवसस्यागमने हर्षं

मन्वाना जनता स्वस्य महदुत्तरदायित्वमनुभविष्यति तथाऽऽत्मानं भूयोऽपि तस्य लक्ष्यस्य पूर्तयेऽर्पयिष्यति यदर्थं राष्ट्रपिताऽजीवत् कार्यमकरोद् दिवमगच्छच्च ।"

भारतीयेतिहासस्य गौरवपूर्णयुगारम्भस्याभिनन्दनं कुर्वद्भिः पत्रैः पत्रिकाभिश्च महामहिम्नः श्रीराजेन्द्रप्रसादस्य बहुविधानां गुणानां मुखरया वाण्या वर्णनं विहितम् । वर्धापनानि प्रकाशितानि । देशस्य जनतायाः स्थितेः समुन्नयनाय तथा जगति शान्तेरुद्देश्यस्य प्रगतये महात्मगान्धिन आदर्शान् प्रति सदा सत्यभावेन संस्थितस्य श्रीराजेन्द्रप्रसादमहाभागस्य निर्विरोधं राष्ट्रपति-पदे निर्वाचनं नाम भारतस्य निवासिभिर्दीयमानः सर्वतो महान् सम्मान आसीत् । राष्ट्रियकार्याणामास्थावते गान्धिवादिने सुदृढाय निःस्वार्थव्रताय कार्यकर्त्रे काङ्ग्रेस-परम्परायाः सुदृढसङ्घटनस्य प्रतिनिधित्व-विधात्रे भारतं यन्महतो महत् पदं कस्मा अपि दातुं शक्नोति स्म तदर्थं तस्य चयनं स्पष्टं सर्वप्रियञ्चावर्तत ।

असीम धैर्यमसामान्यां क्षमां तथाऽलौकिकीं सहनशीलतां धारयतः श्रीराजेन्द्रप्रसादस्य स्वभावो 'मध्यममार्गानुयायी सन्नपि सिद्धान्तानामनुपालने तु कठोरोऽभूत् । सद्गुणानां सुन्दरः समन्वयस्तस्मिन् सदा व्यराजत ।' वस्तुत इदं सौभाग्यपूर्णमासीद् यद् राजनीतिकमुक्तेः समनन्तरमेव भारतं स्वस्य प्रथमनागरिकरूपेण श्रीराजेन्द्रप्रसादसदृशं महत्त्वपूर्णं जनं प्राप्तुं समर्थमभवत् । एवमेव यथानुभूतं यथादृष्टं यथाश्रुतं च श्रीराजेन्द्रप्रसादं राष्ट्रपति-पदे विराजमानं भारतभाग्यविधातारं श्रुत्वा समग्राऽपि भारतीया जनताऽत्यन्तमात्मनो भागधेयानि प्राश्लाघयत् ।

राष्ट्रपति-पदे विराजमानाः श्रीमन्तो राजेन्द्रप्रसादमहानुभावा आत्मानं जनसाधारणादसाधारणं कदापि नामन्यन्त । निराडम्बरं जीवनं जीवयतां तेषामशन- वसन-व्यवहारा अत्यन्तं परिपूता व्यर्थाडम्बर-विरहिताः सदाचार-सत्संस्कार-सम्पन्ना अवर्तन्त । सामान्यतो मनुष्यमात्रेण सह स्वाभाविक-स्नेहवशात् तैरुच्चैरुच्चपदस्य सुखोपभोगानामुपयोगो जनसाधारणस्य वास्तविक्यां सेवायां विहितः । यदा कदाऽपि यः कोऽपि तैर्मिलितुमभ्यलषत् ते सर्वदा समुचित-शिष्टाचारेण तदर्थं स्वभवनस्य द्वारमुद्घाटितमेवास्थापयन् ।

समन्वयः सात्त्विकता च संयमो, विनम्रभावो धृतिरुद्यमश्च ।
दृढत्वमौदार्यमसक्तिरुज्ज्वला, निसर्गतो राष्ट्रपतौ व्यराजन् ॥२॥

२६ जनवरी १९५० ई० दिने देश एकं पूर्ण-प्रभुतासम्पन्नं गणराज्यमभूत् किन्तु भारतभूमौ तदानीमपि काश्चन विदेशि-वसतयः शिष्टा

आसन् या देशस्य शरीरे विस्फोटकच्छिद्रतां प्राप्नुवन्ति स्म । तासु न केवलं वैदेशिकानां शासनस्याभिशापोऽवर्ततापि तु ता भारतविरोधि-कर्मणां तथा तस्करव्यापाराणां निवासभूमयोऽपि भवन्ति स्म। ता वसतयः फ्रान्सस्य पुर्तगालस्य चाभवन्। तत्र सर्वासु वसन्तो जना भारतीया अभवन् तेषां भूमिर्भारत-भूमिरभूत् तथा ते सर्वे स्वाधीने भारते मिलितुं विकला आसन्। स्वाधीनत्वाय भारते विलयाय च क्रियमाणेष्वान्दोलनेषु दमननीतेः प्रयोगा अपि वृद्धिं गच्छन्ति स्म. प्रान्ते फ्रांसस्तु १९५४ ई० पर्यन्तं स्व-वसतीनां हस्तान्तरणाय सज्जोऽभवत् परं पुर्तगाला दमनान्यत्याचारांश्च नान्वरुन्धन्। सत्याग्रहिणो निहत्य सन्ताड्य वा भारतस्य सीमासु नीत्वा पात्यन्ते स्म । अन्ततो भारतीया सेना गोआप्रदेशं प्रविष्टा, द्वितीय एव च दिने गोआ स्वाधीनः सञ्जातः, पलायिताः पुर्तगाला इत्थमेव। चतुर्वारं पाकिस्तानस्य तथैकवारं चीनस्याक्रमणानामप्याभिमुख्यं भारतेन विहितं जितञ्च। सर्वमेतन्महामहिम्नां श्रीराजेन्द्रप्रसादानां राष्ट्रपतिपदस्थितिकाल एव तेषां निर्देशनेन परामर्शेण च सम्पन्नमिति त एव भवन्ति श्रेयसामेतेषां भाजनानि।

मन्त्रिपरिषदि विन्यस्तभाराः प्रधानमन्त्रिणि पूर्णरूपेण विश्वस्ता राष्ट्रपतयो लोककल्याणाय विधीयमानासु प्रवृत्तिषु जनतायाः सहभागिनो भवन्ति। स्वाधीनभारतस्योदीयमानगणराज्यस्याधारशिलां सुस्थिरयद्भिः श्रीराजेन्द्रप्रसादै राष्ट्रपतिपदे स्थित्वा संवैधानिकपरम्पराभ्यो जन्म दत्तं तथा ताः पोषितास्तदेव भारतीयगणराज्यस्य स्थैर्याय सर्वतो महद् वरदानमासीत्। भारतीय-प्रजातन्त्रस्य पोषणं ते स्वीयमुत्तरदायित्वं मन्वते स्म। यस्मिन् कर्मणि ते प्रसक्ता अभवंस्तदतिरिच्यान्यानि सर्वाणि कार्याणि गौणान्यमन्यन्त। तेऽस्य पदस्य शपथं सर्वोपरि मानयन्तः संविधानं प्रति सर्वतोभावेन समर्पिता अवर्तन्त।

तेषामेतैरेव गुणैराकृष्टा भारतवासिनस्तान् १९५२ ई० वत्सरस्य प्रथमनिर्वाचनानन्तरं पुनः राष्ट्रपतिपदाय निरवाचयन्। तदा मईमासस्य पञ्चदशे दिवसे शपथ-ग्रहणसमारोहावसरेऽवोचन्— "एकस्य जनस्य रूपेण भवतां देशवासित्वात् तथा ततोऽप्यधिकं भारतस्य स्वतन्त्रतायाः सङ्घर्षे भवत्सु बहूनां जनानां सहयोगित्वकारणाद् भवतां विश्वासस्य महत्त्वपूर्ण-प्रमाणाच्चाहं भावाभिभूतोऽस्मि किन्तु कृतज्ञताया अस्या अप्यधिकमहं महतः पदस्यास्य बलवदुत्तरदायित्वस्य तथा भारस्यानुभवं करोमि।

स्वतन्त्रता-प्राप्तेरनन्तरमेव प्रजातान्त्रिकस्य गणराज्यस्य स्थापना शक्यते। अतो वयं स्वातन्त्र्यं स्थिरयेम, रक्षेम। इदं कर्तव्यं पालयतो मम

प्रथमः प्रयासो भविष्यति— 'देशस्य विभिन्नेषु भागेषु वसत्या जनतया सह समतायाः पक्ष-पातरहितत्वस्य च व्यवहारो द्वितीयं कर्तव्यञ्च यस्मिन् भवन्तोऽपि सहभागिनः सन्ति, सर्वैर्देशैः सह मैत्रीसम्पादनं सहयोगस्य मार्गान्वेषणं च।'

अस्य देशस्य सर्वान् मानवानहमनुरुणध्मि यत् ते मां स्वेष्वेवैकं जानीयुस्तथा मह्यं शक्तिं यावत् स्वेषां सेवाया अवसरं प्रोत्साहनञ्च दद्युः। अहं प्रार्थये यदीश्वरो मह्यं शक्तिं बुद्धिं च देयाद् येनाहं स्वकर्तव्यानामुत्तर-दायित्वनाञ्च निर्वाहे सेवायाः सत्यया भावनया स्वयमात्मानं समर्पयितुं शक्नुयाम्।"

ततः परं तस्मिन् पञ्चवार्षिके कार्यकाले श्रीमन्तो राजेन्द्रप्रसादमहानु-भावाः संविधानं शासनं भारतं च परस्परमन्योन्यस्य पूरकं मत्वा संविधानाच्छासनाच्च भारतीयजनतायै यो लाभः प्रापयितुं शक्यते तं कार्यान्वितं कुर्वन्ति स्म। एतस्य पृष्ठे तेषां रचनात्मको दृष्टिकोण आसीत्। ते संवैधानिकं राष्ट्रपतिपदं क्रियाशीलं व्यधुः। भारतसर्वकारेण सहैव राज्यसर्वकाराणां कार्यकलापैरपि स्वमवगमयितुं सचिवालयमादिशन्। सूचितमासीत् तैः— 'यतः प्रभृत्यहमत्रायातोऽस्मि ततोऽहं प्रयस्यामि यन्ममाग्रे यान्यपि पत्रण्यायान्ति तानि सर्वाणि पठेयं, किन्त्वहमनुभवामि यदेतत् सम्पादनं कठिनं कार्यमस्ति। अतोऽहमभिलषामि यन्मम सचिवालयो मह्यं मन्त्रालयस्य निर्णयान् महत्त्वपूर्णानां प्रस्तावानां सारांशान् विवादग्रस्तानां संक्षेपत उभावपि पक्षौ, मन्त्रिमण्डलस्य सहमतौ सत्यामपि पूर्वं विवदितान् विषयान् सर्वसाधारण्या जनताया दृष्टिकोणानाञ्च ज्ञातव्यानि प्रस्तूयेत। संसदः कार्येषु प्रस्ताविता विवदिता विमृष्टा परिवर्तिता निर्णीता निरस्ता वा विधेयका अपि मत्समक्षमुपस्थातव्या येषु यद्यहमावश्यकं मानयेयं तर्हि तद्विषये परामृष्टुं शक्नुयाम्। राज्यानां राज्यपालैश्चानुमतये प्रेषिता विधे-यका अपि सचिवालयस्य टिप्पण्या सहागच्छेयुः।' इत्येवं विधातुं निर्दिष्टः सचिवालयः सततं जागरूकः सन् कार्याणि व्यदधात्।

१९५७ ईसवीयहायने मईमासे तृतीयवारं पुनरपि महामहिम-शालिनां श्रीराजेन्द्रप्रसादानां राष्ट्रपतिपदाय निर्वाचनमक्रियत। आसीत् सा भारतीयजनगणस्यापूर्वा निष्ठा भक्तिरनुरक्तिश्च। वस्तुतोऽवर्ततायं तदीयायाः कर्मठतायाः परिणामः। ते भारतसर्वकारस्य संवैधानिक-राष्ट्रपतेः कृत्यं, भारतीयजनतायाः प्रतिनिधित्वं च सदैव ध्यायन्ति स्म। कस्मिन्नपि विषये सर्वेषाँ दलानां प्रतिक्रिययाऽपरिचिताः स्थातुं नैच्छन्। सार्वजनिक-कार्यकर्तृषु तथा तैर्विधीयमानेषु कार्येषु रुचिमधारयन्। प्रत्येकं प्रान्तस्य प्रत्येकं वर्गस्य

जनैः सह प्रत्यक्षं सम्पर्कमसाधयन्। वर्षे प्राय एकवारं समग्रस्य देशस्य भ्रमणेन प्रमुखाणां विषयाणां परिज्ञानं प्राप्नुवन्ति स्म, किञ्च तस्मात् स्वपरामर्शद्वारा राज्यसर्वकारान् भारतसर्वकारं च कार्यं कर्तुं प्रेरयन्ति स्म।

धन्या भारतभूरियं तदनु ते धन्या भुवो वासिनः,
स्वातन्त्र्योन्नयनाय बद्धकटिका धन्याश्च ते नायकाः।
मान्या धन्यतमाश्च राष्ट्रपतयो 'राजेन्द्र'-वर्याश्चिरं,
येषां दृष्टि-विमृष्टि-सृष्टिरनिशं देशं समृद्धं व्यधात् ॥३॥

卐

पूर्णामृता-कला

विश्व-कल्याण-यात्राः

मधु॑मन्मे नि॒क्रम॑णं मधु॑मन्मे प॒राय॑णम्।
वा॒चा व॑दामि॒ मधु॑मद् भूयासं॒ मधु॑ सन्दृशः ॥

(अथर्व० १।३४।३८)

दायित्वं यद् गृहीतं भुवि निवसतां भारतानां जनानां,
श्रेयः सम्पादनार्थं व्रतमिव सुदृढं पूर्तये तस्य यत्नात्।
स्वीये देशे विदेशेऽप्यविरतमनसा 'विश्वकल्याण या याः,
कृत्वा मैत्रीं प्रशस्तां व्यधुरवनितले श्रील-राजेन्द्रवर्याः ॥१॥

महामहिम-श्रीराजेन्द्रप्रसादमहाभागा राष्ट्रपति-पदस्य शपथ-ग्रहणानन्तरं प्रथमेऽभिभाषणे भूयस्यो वार्ताः प्रामुख्येनाकथयन्। तासु प्रथमाऽऽसीद्—

"अस्माकं दीर्घे घटनापूर्णे भारतस्येतिहासे प्रथमोऽयमवसरोऽस्ति यदा— उत्तरस्यां कश्मीरतो दक्षिणस्यां कन्याकुमारीं यावत्, पश्चिमायां काठियावाड़-कच्छतः पूर्वस्यां कोकीनाडाऽवधि, उत्तर-पूर्वयोश्च कामरूपारुणाचल-पर्यन्तमेको विशालो देश एकस्य संविधानस्य तथैकस्य सङ्घराज्यस्य छत्राधीनः संवृत्तः। तेन सम्पूर्णस्य देशस्य कोटि-कोटि-सङ्ख्यकानां नरनारीणां श्रेयसो दायित्वमात्मन उपरि गृहीतम् ।इति।"

वस्तुत इदं समग्रस्य राष्ट्रस्याधिपतिपदे निषण्णानां राष्ट्रपति-महाभागानामेवासीद् दायित्वम्। तन्मनसि धृत्वैव प्रतिवर्षं स्वदेशे विदेशे च यात्रा अकुर्वन्। यात्रासु तासु तेषामिदमेवोद्देश्यं प्रमुखतयाऽवर्तत यत् 'सर्वेषां देशानां मानवाः शान्त्या क्षान्त्या कान्त्या च वसन्तो मैत्रीं वर्धयन्तः परस्परं कल्याण-कर्मसु प्रवर्तेरन्निति।' महात्मनां श्रीगान्धिनां कथनमासीद् यद् 'वैकल्येन चीत्कुर्वत्यै संसृत्यै दानाय जागरितस्य तथा स्वतन्त्रस्य भारतस्य सविधे शान्तेः सद्भावस्यैकः सन्देशोऽस्ति।' किञ्च राममोहनादारभ्य श्रीगान्धिनो यावत् पुनर्जागरितस्य भारतस्य सर्वेऽपि नेतारो धर्मोपदेशकाश्च राष्ट्रियान्ताराष्ट्रियैकतायास्तथा विश्वबन्धुताया उत्साहिन ईश्वरदूता

अभवन्। तेभ्य एव प्रेरणां लब्ध्वा राष्ट्रपतयः श्रीराजेन्द्रप्रसाद-महाभागा अपिताननुसतुं स्वीयं कर्तव्यं निर्वोढुं दायित्वं पूरयितुञ्च सदैव तत्परा आसन्।

१९५० ई० वर्षे **नेपालयात्रां** विधाय ते भारत-नेपालयोः समानां स्थितिं दर्शयित्वा मिथो मैत्र्याऽभ्युत्थानमकामयन्त। १९५८ तमेशवीये वत्सरे **जापान**-यात्रया भारतस्य घनिष्ठं सांस्कृतिकं सम्बन्धं जापानेन सहास्थापयन्। तत्र तेषां भव्यं स्वागतमभूत्। जापनस्येतिहासे प्रथमवारं तत्रत्याः सम्राजो वायुयानावतरणस्थले तेषां स्वागतायोपागच्छन् **ओडवारे तोक्यो-नारा-ओसाका**-प्रभृति नगरेषु ते नानाविधानि सुप्रसिद्धानि स्थलान्युद्योगकेन्द्राणि चावालोकयन्। रियुकोकू-विश्वविद्यालयेन ते बौद्ध-विज्ञाने साहित्ये च सम्मानद-डॉक्टरोपाधिना सम्मानिताः। ओथनी-विश्व-विद्यालये भाषमाणैस्तैर्भारतीय-विचार-व्यवहारयोरौदार्यं तथा बौद्धधर्मा-भिमतं स्वातन्त्र्यं विश्लेषितम्। जनसभासु महात्मगान्धिनां दर्शनस्यौजस्विनीं व्याख्यां बौद्धदर्शनस्य व्याख्यां च श्रुत्वा जना अतीव प्रभाविता अभवन्। अहिंसा-सत्याग्रह-स्वतन्त्रता-निरस्त्रीकरण-प्रभृतयो विषयास्तेषां भाषणस्य केन्द्रभूता अवर्तन्त।

१९५८ ई० वर्षस्य दिसम्बरमासे डॉ राजेन्द्रप्रसादमहोदया **'इन्डोनेशिया'**-देशस्य यात्रामकुर्वन्। **जकार्ता**नगरे लक्षशो जनास्तानत्यु-त्साहेनाभ्यनन्दयन्। दिसम्बरस्य दशमे दिवसे तत्रत्यां संसदं सम्बोधयद्भिस्तैः संसदीय-प्रजातन्त्रस्य साफल्यायावश्यकीनां स्थितीनां चर्चास्तथा देशात स्वकर्तव्यानि प्रति मनस्सु 'सजीव-चेतना'या वृद्धये भाषितम्। बाण्डुंग-नगरे-यत्र पुरा १९५५ ई० वर्षे अफ्रो-एशियाई-समितिर्योजिताऽभूत्— राष्ट्रपतीनां श्रीराजेन्द्रप्रसादानां पूर्णया सहृदयतया परमेणोत्साहेन च यादृशं स्वागतं विहितं तेन प्रभावितास्त एकस्मिन् विशालस्य जनसमूहस्य समक्षमकथ-यन्—'गतेषु चत्वारिंशद् वर्षेषु स्वदेशे जनसमूहे भ्रमता मयेदृशो न क्वापि दृष्टो मत्स्वागतायापारेषु जनेषूत्साहः। **जावा-बाली-द्वीप**योरपि भ्रमणं कृत्वा जकार्तानगरस्य मर्डेका स्क्वेयर— स्थाने जनसभा सम्बोधिता। अन्ता-राष्ट्रियाणां समस्यानां सन्दर्भे भाषितवन्तस्ते 'सार्वभौम-निरस्त्रीकरणस्यादर्श' स्थापितवन्तः। उभयोरपि देशयोः समानां परिस्थितिं निर्दश्र्य परस्परं सौहार्दाय ते जनान् प्रैरयन्। तत्रैव बाडुंग विश्वविद्यालयेन ते मानदेन' डॉक्टर 'इत्युपाधिना विभूषिताः।

तस्मिन्नेव वत्सरे श्रीमन्तो राष्ट्रपतयो मलाया-देशस्य यात्रामपि समपादयन्। यदा ते **कुआलालम्पुरं** प्राप्तास्तदा तत्रत्येन सर्वोच्चशासकेन तेषां स्वागतं व्याहृतं तथा महत्यां सङ्ख्यायां जनाः— येषु तत्र निवसन्तो

भारतीया अप्यासन्—महतोत्साहेनाभिनन्दनमकार्षुः । तत्र भाषणेषु तेऽकामयन्त यद्—

मैत्री-सूत्रे सर्वदाऽऽवां निबद्धाः, स्थास्यावः किञ्चावयोर्योगदानम् ।
स्वातन्त्र्यायाथ प्रसत्त्यै जनानां, कृत्वाऽऽप्स्यावः पूर्णसौख्यं चिराय ।।२।।

१९५८ ई० वर्षस्य १५ मार्चदिवसे डॉ० राजेन्द्रप्रसादमहाभागाश्चतुर्दशदिवसानां सद्भावनायात्रायां **'कम्बोडिया-उत्तरवियतनाम-दक्षिण-वियतनाम-लाओस'** देशेषु प्रस्थिताः । तस्मिन्नेव दिने यदा ते **'नोम पेन'** नगरं प्राप्तास्तदा **महाराज्ञ्या** तथा **राजकुमार श्रीनरोत्तमसिंहानूकमहानुभावेन** तेषां स्वागतमाचरितम् । कम्बोडिया-देशस्य महाराज्ञ्याः प्रातिनिध्येन स्वागतं व्याहरता श्रीमता राजकुमारेण गदितम्— "अद्येदं कथनं नास्ति सरलं, यद् वयं भवत्सु कस्य विषयस्याधिक्येन श्लाघां कुर्मः ? स्वतन्त्रतया न्यायेन च प्रेरितस्य राजनीतिकस्य नेतुः, प्रसिद्धस्य विधिवेत्तुः, येन स्वीयाः समस्ता ओजस्विनो गुणा देशस्य सेवायै समर्पिता अथवा तस्य संवेदनशीलस्य लेखकस्य य एवं प्रतीयते यत् स्वचिन्तनेनात्मिकसौम्यतया च मानव-विचाराणां दूरस्थं क्षितिजं यावत् प्राप्तोऽस्ति ।" स महाभाग उभयोर्देशयोः प्राचीनानां सम्बन्धानामप्युल्लेखं कृतवान् किञ्च पञ्चशीले विहितायाः सहिष्णुतायाः प्रबुद्धतायाश्च भारतीयनीतेरपि प्रशंसां कुर्वन् विश्वासमिमं प्रकटितवान् यदियं नीतिर्विश्वेतिहासमत्यधिकं प्रभावयिष्यतीति ; राष्ट्रपतिभिः कम्बोडियादेशस्य सम्राजस्तथा तत्क्षेत्रवासिनीं जनतां प्रति हार्दिकाः धन्यवादा अपि ज्ञापिताः ।

ततः परं राष्ट्रपतयो दक्षिणवियतनाम-यात्रामकुर्वन् । सैगोननगरस्य **'तान-सोन-नूत'**नाम्नि विमानस्थले दक्षिणवियतनामदेशस्य राष्ट्रपति—**'एन्गो-दीन्ह-दिएम'** महाभागैरत्यन्तं प्रशंसात्मकैः शब्दैस्तेषां हार्दिकं स्वागतं व्याहृतं परस्परमुभयोर्देशयोश्चाधिकाधिकं सहयोगस्य मित्रतायाश्च वृद्धये चाशा प्रकटिता । तदुत्तरे राष्ट्रपतिभिः श्रीराजेन्द्रप्रसादैरपि तथैव प्रशस्य परमोदारैर्विचारैस्ते सभाजिताः ।

श्रीराजेन्द्रप्रसादमहानुभावाः सैगोननगरस्य पुरातत्त्वसङ्ग्रहालये राष्ट्रिय-विश्वविद्यालयेऽपि सम्प्राप्ता यत्र ते विश्वविद्यालयानां तथा सांस्कृतिकसंस्थानां प्रतिनिधीन् सम्बोधयन्तो विज्ञानस्य तान्त्रिकीं विलक्षणामुन्नतिं चर्चितवन्तः । विभिन्नानां देशानां विशेषतः शतीनां नियन्त्रण-निष्क्रियतयोरनन्तरम् एशियाऽफ्रिकास्थ-देशानां जनतास्वपूर्वस्य जागरणस्योल्लेखमप्यकुर्वन् । तेऽकथयन्—

संहारे सर्वनाशे विदधति मनुजा ये स्वशक्तेः प्रयोगान्,
मन्येऽहं नैव तेषां भवति समुचितः कोऽपि तत्रोपयोगः ।

तत्स्थाने चारु निर्मित्युचितकृति-मति प्रस्तुतिभ्योऽथ शान्त्यै,
सद्भावार्थं प्रयोगा जगति मनुजतामोदवृद्ध्यै च कार्याः ॥३॥ इति ॥

तदनन्तरं राष्ट्रपतय उत्तरवियतनामदेशस्य यात्रामकार्षुः । राष्ट्रपति-**श्री हो० ची० मिन्ह**-महाभागा **'गेलोन'**-विमानस्थले भारतस्य राष्ट्रपतीनां स्वागतमकुर्वन् । तेषां सम्माने समायोजिते प्रीतिभोजे भाषमाणास्तेऽवदन्—"राष्ट्रपतयः श्रीराजेन्द्रप्रसादमहाभागा एक ईदृशाः पुरुषाः सन्ति यैः सम्पूर्णेऽपि जीवने भारतीयजनताया राष्ट्रियमुक्तये सङ्घर्षः कृतः । त एकेऽत्यन्तमनुभवशालिनः प्राचीना योद्धारो विद्यन्ते ये संसारे शान्तिस्थापनाय तथा राष्ट्राणां मध्ये मित्रत्वाय सङ्घर्षरता अवर्तन्त । एतेषां सद्गुणा अस्माकमनुकरणायैकं महत्त्वपूर्णमुदाहरणं प्रस्तुवन्ति ।" राष्ट्रपतिश्रीराजेन्द्र-प्रसादा अपि तस्य समुचितमुत्तरमदुः । एवमेव वियतनामदेशस्य जनवादिगणतन्त्रस्य प्रधानमन्त्रिणः 'श्रीफाम वान डोंग' - महोदयैरपि राष्ट्रपतीनां सम्माने प्रीतिभोजनमायोजितम् । तदानीमुभावपि पञ्चशीलसिद्धान्तैर्विश्वशान्तये भारतस्य योगदानं चर्चितवन्तौ । एवमेवान्य-स्थलेष्वपि स्वागतानि तथा प्रीतिभोजायोजनान्यभूवन् राष्ट्रपतीनां हिन्द-चीन-यात्राया अन्तिमं स्थानं **'लाओस'**-नगरमासीत् । **'विएनतिएन'**-विमानावासे विदेशि-कूटनीतिज्ञाः श्रद्धालवो बौद्धास्तथा साधारणा जना अतीवोत्साहेनाभिनन्दनमकुर्वन् । **'लाओस-कौन्सिल'**-स्याध्यक्षास्तत्रत्या युवराजाः स्वीये स्वागतभाषणे भारतं भारतस्य राष्ट्रपतिं तथा भारतीय-सिद्धान्तानां प्रशंसनमकार्षुः । उभयोर्देशयोश्च सौहार्दाय विश्वशान्तये निरस्त्रीकरणाय च भारतस्य राष्ट्रपतयः सम्प्रेर्य समुचितेनोत्तरेण सर्वान् समभावयन् ।

श्रीलङ्कायाः सर्वकारस्य निमन्त्रणेन राष्ट्रपतयः श्रीराजेन्द्रप्रसाद-महाभागाः षड्दिवसीयां यात्रायां तत्रागच्छन् । १६ जून १९५९ ई० दिने कोलम्बोनगरे पदार्पणानन्तरं तत्र वृष्टौ सत्यामपि श्रीलङ्कायाः प्रधानराज्य-पालाः प्रधानमन्त्रिण उच्चाधिकारिणस्तत्रत्या जनता च महतोत्साहेन स्वागतमकुर्वन् । परस्परं तत्र मैत्रीभावान् द्रढयितुमकामयन्त । तत्रैव केषुचित् सार्वजनिकेषु कार्यक्रमेषु जनतायै शान्ति-सद्भावनयोः सन्देशं दत्त्वाऽस्माकं राष्ट्रपतयः सम्मानभोजेषूपातिष्ठन् । तेऽचीकमँश्च—

संसारेऽत्र सहिष्णुता सुजनता शान्तिश्च सद्भावना,
मैत्री जीवदयाऽनुराग करुणा सत्यं क्षमाऽहिंसनम् ।
एते ये सुगुणाः शुभा भगवता बुद्धेन सन्देशिता—
स्तेषां पालनमस्ति नोऽद्य परमं कर्तव्यमाद्यं भुवि ॥४॥

यदि वयमिह सर्वान् मित्रवन्मानयेम,
यदि च सकलजीवनात्मवल्लोकयेम ।
यदि च न हि विदध्मः क्वापि कस्याप्यनिष्टं,
कथमिह न तदा स्याच्छान्ति साम्राज्यमत्र ।।५ इति।।

श्रीलङ्कायाः विश्वविद्यालयश्च डॉ० राजेन्द्रप्रसादमहाभागान् 'डाक्टर आफ लेटर्स' इति सम्मानदेनोपाधिना सममानयत्।

अस्माकं मान्या राष्ट्रपतयः २० जूनतः जुलाई १९६० ई० दिनेषु सोवियतसङ्घस्य सद्भावनायात्रामकार्षुः। 'मास्को'नगरं प्राप्तवत्स्वेव तेषु तत्रत्यया जनतया राष्ट्रपति **श्रीलियोनिद ब्रेजनेव** महाभागैश्च तेषां भव्यं स्वागतं विहितम्। परस्पर राष्ट्रपतयः स्वीयान् विचारान् प्राचीकटन्। तत्रैतिहासिकानि स्थलानि चित्रदीर्घातः सांस्कृतिक्यः संस्थाः साम्प्रतिका उद्योगाः कृषिविकासकेन्द्राणि च विलोकितानि। द्वितीयविश्वयुद्धानन्तरं या विलक्षणा प्रगतिः सोवियतसङ्घेन सम्पादिता तामालोक्यास्माकं राष्ट्रपतयः परमां मुदमावहन्तस्तान् श्लाघितवन्तः। जनसाधारणस्याभ्युदयाय प्रयतमानयोरुभयोर्देशयोर्नेतृषु मिथः सद्भावना-माहात्म्यं मीमांसितवन्तस्ते सोवियतसङ्घसहयोगेन वर्धमानां भारतस्य प्रगतिं भिलाई-लोह-संयन्त्र-सूरतगढस्थ-कृषिविकासोद्योग-विशाल— यन्त्रनिर्माणशाला-तैलकूपादीनां संस्थापनार्थं प्रदत्तं प्रदीयमानं च सहयोगं संस्मारितवन्तः। एवमेव बाण्डुंग-देशानां राजदूतै-राष्ट्रपतिश्रीराजेन्द्रप्रसादानां सम्माने विशाले भोजसमारोहेऽपि राष्ट्रपतयस्तन्महत्त्वमावश्यकता उपयोगिताश्च प्रत्यपादयन्। प्रत्यावर्तन-यात्राया मध्येऽस्माकं राष्ट्रपतयः स्तालिनाबाद— ताशकन्द-समरकन्द-बोखारा-सदृशानि महत्त्वपूर्णानि स्थानान्यप्यवालोकयन् यानि ताजाकिस्तानोजबेकिस्तानयोर्मध्यवर्तीन्येशियाद्वीपस्य गणराज्यानि सन्ति। सोवियतसङ्घस्य जनतानां सर्वोच्चपदाधिकारिणाञ्चातीव सौहार्दपूर्णानि स्वागतानि संस्मृत्य भावाभिभूतास्तथा तद्देशस्य सांस्कृतिकीं पुरातात्त्विकीं लौकिकीमभ्युन्नतिं च दृष्ट्वा दृष्ट्वा नितरामानन्दमनुभवन्तो धन्यं वदन्तः प्रत्यावर्तन्ताकामयन्त च—

'हिन्दी-रूसी-सहज-सहजाः' सन्ततं श्रान्तिशीलाः,
सर्वेषां ये हितममितमाकांक्षयन्तीश्च शान्ताः।
तूर्णं कृत्वा प्रगतिमुदिता भारतस्याद्वितीयाः,
संवर्धन्तां जगति च सुखं तन्वतां नः सखायः।।६।।

* * *

भारतस्य नवनिर्मितौ योगदानम्

शतहस्त समाहर सहस्रहस्त सं किर।
कृतस्य कार्यस्य चेह स्फातिं समावह॥

अथर्व० ३।२४।५

राष्ट्रं राजतु भारतं भुवि सदा राष्ट्रं नमामो वयं,
राष्ट्रेणास्ति समस्तदेशजनता राष्ट्राय सर्वस्वदा।
राष्ट्रात् प्राप्य बलं भवन्ति सुदृढा राष्ट्रस्यरक्षाविधौ,
राष्ट्रे राष्ट्रपतिः शुभो विजयतां हे राष्ट्र ! नो वर्धय ॥१॥

सन् १९५० ई० वत्सरात् १९६२ ई० वत्सरस्य १२ मई दिनं यावद् भारतस्य गौरवानुरूपं राष्ट्रपतिपदं विराजमानाः श्रीराजेन्द्रप्रसादमहाभागाः सतर्कतया राष्ट्रस्य रथमग्रे वर्धयन् एतस्मिन्नासन्नद्वादशवर्षाणामन्तराले तेषां जीवनदृष्टिर्जनकानुकारिणी जलकमलानुकारिणी वाऽवर्तत। यदा ते राष्ट्रपतेः कार्यकालमपारयँस्तदा द्वितीयवारं निर्वाचनायोद्बोधिता अपि स्वयम्प्रयासान्नाकार्षुः। केवलं भारतीयजनतायाः प्रेम्णः समादरायैव भूयोऽपि पदं स्वीकृतम्। राष्ट्रपति-भवने निवसन्तस्ते प्रत्यहं द्वादशहोरावधि कर्माण्यकुर्वन्।

स्वानुशासनं निरभिमानित्वं साधारणजीवनयापनञ्चेत्यादयस्तेषां प्रधाना गुणा राष्ट्रपति भवनेऽपि यथावद् धवलिता अतिष्ठन्। तैः कदापि मनसाप्येतन्नेप्सितमासीद् यदहं राष्ट्रपतिर्भवेयम्, अत एव राष्ट्रपतिपदं प्राप्यापि वीतरागा एवावर्तन्त। यदा ते राष्ट्रपतिपदान्निवर्तमाना अभूवंस्तदा १० मई १९६२ ई० दिने देहल्या नागरिकै रामलीला-प्राङ्गणेऽभिनन्दनपत्रमेकं समर्पितम्। तदुत्तरे भाषमाणास्तेऽवोचन्— 'अहं कृतज्ञता-पूर्वकं भवत्सम्मुखं शिरो नमयामि।' राष्ट्रपतिभवनात् सम्प्रत्यहं पटनायाः स्वीये स्वल्पीयस्याश्रमे प्रस्थास्यामि। यथासमयं सेवार्थमहमाकारितः सेवामकार्षं तथैव सदाकत-आश्रमे वसन्नपि कर्तव्यपालनं करिष्ये।'

मईमासस्य द्वादश्यामांग्लतिथाववकाशग्रहणकाले पं० श्रीजवाहरलालनेहरुणा स्वीये विदाय-भाषणे पञ्चचत्वारिंशद्वर्षाणां साहचर्यस्य सम्पादितस्य कर्मकलापस्य तथा विविधानां प्रसङ्गानां स्मरणेन सह राष्ट्रपतयोऽभिनन्दिताः।

१४ मई १९६२ ई० तः श्रीराजेन्द्रप्रसादमहाभागाः सदाकतआश्रमस्य पुरातन्यां स्वस्यां कुट्यां वस्तुं प्रस्थिताः। तत्रापि नैकवर्णाविते यावत्निः-

स्वार्थभावेन जनताः सेवमानाः देश-प्रेम्णो योग-साधनामकार्षुः। स्वास्थ्यस्य शैथिल्येन मन्दश्रमा अपि मन्दोत्साहास्ते कदापि नाभूवन् । यदापि जनाः संस्मरन्ति स्म वाञ्छन्ति स्म तदा ते विचारैरुपदेशैर्मार्गदर्शनैः सहयोगाय बद्ध-साहसा एवावलोक्यन्त । यतो हि—

देशभक्तिर्नैतिकं सरलं जीवनं चेति द्वयं महत्ता-प्राप्तेः कारणं मन्यते । जीवनस्य सर्वासां समस्यानां समाधानं धार्मिकता-नैतिकयोः परिप्रेक्ष्ये गवेषयद्भिस्तैः सर्वेषां धर्माणां समादरेण सह राजनीतावपि नैतिकतायाः पन्था नैव विमुक्तः । सत्यस्याहिंसायाः प्रेम्णश्च त्रिवेणी तेषां राजनीतिके जीवने पूर्णरूपेण पर्यलक्ष्यत । महात्मना गान्धिना सहैव तैरपि विदेशिनां प्रपञ्चजालमपाकर्तुं सत्यस्याश्रयः, शस्त्रशक्तेः संरक्षणायाहिंसाश्रयस्तथा भौतिकभयापहाराय प्रेम्ण आश्रयः स्वीकृतः ।

नीतेः पालनाद् व्यक्तेः समाजस्य राष्ट्रस्य च श्रेयः सम्पद्यते ! मर्यादितस्य जीवनस्य शिक्षा तैर्मर्यादापुरुषोत्तमस्य चरित्रादेव प्राप्ता। आरम्भस्यान्तगमनमिति कर्मठस्यैकं लक्षणमस्ति । कस्मिन्नपि कर्मणि पूर्वं प्रवृत्तिरेव न स्वीकरणीया, स्वीकृतायां च प्रवृत्तौ प्राणपणेन पूर्तिः करणीयेति कर्मठतायास्तत्त्वम् । श्रीमद्भी राष्ट्रपति-राजेन्द्रप्रसादमहोदयैरात्मनोऽस्य गुणस्य संसिद्धयै सदा प्रयतितम्। चम्पारनस्यान्दोलनदिवसेषु महात्मगान्धिन आदेशानुसारमहोरात्रमविगणय्य स्वास्थ्यं स्वकीयं, साक्ष्यं प्रकटयतां विचाराः सूचनास्तैरालिखिताः। विहारभूमौ १९३४ ई० वर्षे भूकम्पवशाद् दुःखितायाः जनतायाः साहाय्याय कोषस्थापनं तथा स्वयंसेवकैः सहाहर्निशं पीडितानां सेवासम्पादनं यादृग् विहितं तादृगन्यः कः कर्तुं प्रभवति स्म ? यदा तेषां स्वास्थ्यमतीव क्षीणमासीत् !

कर्माणि कुर्वाणोऽपि यस्तेषु न लिप्यते न वा तेभ्यः किमप्यादातुम-भीप्सते स '**कर्मयोगी**'ति निगद्यते। आसक्तिमपाकृत्य सिद्धयसिद्धी समाने विभाव्य कर्मण्येव प्रवृत्तस्य कर्मयोगिनो विमुक्तस्य च समानैव स्थितिर्मन्यते । राष्ट्रपतिपदे निषण्णाः श्रीमन्तो राजेन्द्रप्रसादमहानुभावा अपि तथाविधा एवाभवन्। सन् १९६२ ई० वत्सरे यदा ते राष्ट्रपतिभवनं विसृज्य सदा-कताश्रमं गन्तुं प्रवृत्तास्तदा तैः स्पष्टमुक्तं यत्— "मम राष्ट्रपतिभवनं वसतो विशिष्टहर्षानुभवो नासीन्न चेदानीमेतद् विसृजतः कष्टानुभवोऽस्तीति ।"

यदापि यत्रापि यदपि राष्ट्रहितकरं कर्म सम्पादयितव्यमभूत् तत्र सत्यामाकारणायामनुभूयमानायामावश्यकतायां सर्वतोभावेन साहाय्यप्रदानं नाम तेषां कुलव्रतमासीत् । विसृज्य सर्वाणि कार्याणि विस्मृत्य च सर्वाण्यसौ-विध्यानि ते तत्र गताः, पूर्णरूपेण प्राणपणेनापि प्रसक्तस्य कर्मणः साफल्याय

प्रयतितं च। अत एवोच्यते—

निःस्वार्था देशभक्तिऋर्षिवदतुलिता ज्ञानलाभेऽनुरक्तिः,
सत्ये निष्ठा समेषां बल-निधि-यशसां वर्धनाय प्रयासः।
शुद्धा वृत्तिर्न लोभो न गुरुतरपदप्राप्तये लोलुपत्वं,
येष्वेते मानवीयाः शुभगुणनिचयाः सन्ति ते धन्यधन्याः॥२॥

भारतस्य दास्ययुगे वैदेश्यशासकानां दुर्नीतिः खण्डनाय तथा स्वातन्त्र्य-प्राप्त्यनन्तरं खण्डितस्य देशस्य मण्डनाय प्रयस्यत्सु नेतृप्रवरेषु श्रीराजेन्द्र-प्रसादस्य योगदानं बाह्यदृष्ट्याऽऽभ्यन्तरदृष्ट्या च महत्त्वपूर्णमवर्तत। तनु-मनोधनैः स्वात्मानं देशाय समर्प्य कैशोरकालात् प्रभृति निर्लोभया वृत्त्या यानि यानि कार्याणि तैः कृतानि तेषां बाह्यानि प्रतीकानि देशस्य बहुषु भागेषु प्रवर्तमानाः संस्था इतिवृत्तग्रन्थाश्च प्रकटयन्त्येव। आभ्यन्तराणि योगदानानि तदानीं दासतोच्छेदाय सत्याग्रहायात्मोत्सर्गाय च प्रेरणाप्रदानि भूत्वैव स्वातन्त्र्यावाप्तौ सहायकानि सम्पन्नानि। स्वतन्त्रताप्राप्तेः परं स्वयं राष्ट्रपतिसदृशे सर्वश्रेष्ठे गौरवशालिनि पदे विराजमानैस्तदुत्तरं देहविसर्जना-वधि यथा वर्तितं यथा कृतं यथोपदिष्टं यथा च निर्व्यूढं तत् सर्वेभ्यो भाविभ्यो राष्ट्रपतिभ्यो राष्ट्रनेतृभ्यो राष्ट्रसेवकेभ्यश्चाचारसंहितेव पैतृकसम्पदिवानु-वंशिक-गुणाभिसङ्क्रमणमिव शासकं पोषकं विकासकं च विद्यत इति कोऽत्र संशयीत ?

अद्य श्वः परेषु सहस्रं सहस्रवत्सरेषु यदस्ति यच्च भविष्यति भविष्यति तस्यां नवनिर्मितौ श्रीमतां राजेन्द्रप्रसादमहाभागानां योगदानस्य मूल आधार-श्चिरं तिष्ठति स्थास्यत्येवेति।

भारतस्य नवनिर्मितौ यथा, योगदानमतुलं कृतं सदा।
तस्य नास्ति समता क्वचित् परा, तद्धि तस्य भवतीह वाचकम्॥३॥

* * *

महाप्रयाणं स्मृति-सौरभञ्च

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

(श्रीसूक्तम्)

सङ्गच्छन् संवदन् यः सकलजनगणं साधु-मन्त्रैः समानैः,
सञ्जानानः समानीं समितिमरचयत् प्रोच्य मन्त्रान् समानान्।
सर्वेषां नो मनांसि स्वकृत-सुचरितैः सत्यसङ्कल्पसिद्धयै,
सम्प्रेर्यान्ते स मान्यः स्त्रिदशपुरमगाद् 'राष्ट्रपः' सत्यसन्धः॥१॥

मानवतावादिना दृष्टिकोणेन तथा मानवमात्रेण साहजिकं प्रेम धारयतां श्रीराजेन्द्रप्रसादमहानुभावानां कर्मशीलता सर्वस्यां स्थितौ प्रवहन्त्येवासीत्। ऊनाशीतिवर्षदेशीये वयसि वर्तमाना अपि ते यावच्छक्यं सार्वजनिकं कार्यं सम्पादयितुं तत्परा एवावसन्। स्वास्थ्यस्य प्रातिकूल्ये सत्यपि कर्तव्यदिशो मुखं नावलयन्। देहावसानस्य दिवसेऽपि तेषामेकः सार्वजनिकः कार्यक्रमः पटनाविश्वविद्यालये दीक्षान्त-भाषण-प्रदानस्यासीद् यं ते सहसा स्वास्थ्यविकृतेः कारणात् सम्पादयितुं नाशक्नुवन्। परं तस्मै कार्यक्रमाय तैर्भाषणं लिखितं यस्य वाचनं बिहारविधानसभायास्तदानीन्तना अध्यक्षाः श्रीलक्ष्मीनारायसुधांशुमहानुभावा अकार्षुः।

१९६३ ई० वर्षे फरवरीमासस्याष्टाविंशतितमे दिनाङ्के निर्ममा निर्मोहा निःसङ्कल्पा निःसङ्गाः सर्वेश्वरे समर्पितसर्वस्वाः कर्मयोगिनस्ते रात्रौ दशवादनसमये सहसा कर्मभूमिमिमां विसृज्य देवभूमिं च भूषयितुमिव नश्वरं देहं विहाय सुरपुरं प्रयाताः। हन्त !

व्याप्तः सर्वत्र शोकः सकलमपि जगद् दुःखसिन्धौ निमग्नं,
क्रूरं दैवं ह्यनिन्दन् परिहतहृदया भारतीया विषण्णाः।
श्रीराजेन्द्रप्रसादे सुर-नगरमहो प्रस्थिते कान्दिशीका,
हा हा सर्वस्वमेव व्यपगतमधुना स्मो वयं नष्टभाग्याः॥२॥
योऽस्माकं प्राणरूपः प्रतिपदमुदितं मार्गमादिश्य राष्ट्रे,
सत्त्वस्थो राष्ट्रियत्वं स्थिरयितुमकरोदद्भुतं योगदानम्।
आसीद् यः कर्मयोगी जलकमलसमो निर्मलो निर्विकारः,
श्रीराजेन्द्रप्रसादः सुरपुरपथिकः सोऽद्य हा हन्त ! जातः॥३॥

नश्वरं पाञ्चभौतिकं शरीरं न भवति चिरन्तनस्थायि। जातस्य हि ध्रुवो मृत्युः। केवलं स्मृतय एवावशिष्यन्ते। राष्ट्रपतीनां श्रीमतां राजेन्द्रप्रसाद-

महाभागानां स्मृतिसौरभं सर्वातिशायि विद्यते। तत्सौरभेणास्माकं सर्वाण्यङ्गानि सुरभितानि भवन्ति भविष्यन्ति च। भारतीयस्वतन्त्रताया इतिहासे तेषां जीवनादर्शाः स्वर्णाक्षरैरङ्किताः सन्ति। वस्तुतस्त आसन्नादर्शाणामप्यादर्शाः। यतो हि—

मानव-जीवनं वस्तुतो द्वयोर्वृत्त्योः सङ्घर्षो विद्यते। कदाचित् साध्व्या वृत्त्या विजयः प्राप्यते कदाचिच्चासाध्वी वृत्तिरपि विजयाय कल्पते। परं यदाऽसमीचीना वृत्तिर्बलवती भवति तदा सा नीतिमनीतिं विधिं निषेधं वा किमप्यविगणय्य स्वार्थमेवोल्लासयति तथा सत्यपराङ्मुखतामेवोद्दीपयति। विपरीतं चास्य समीचीनाया वृत्तेर्बलवत्त्यां सत्यां सत्यमेवैकं जीवनस्य लक्ष्ये सर्वस्वं भूत्वा मनोवाक्कायानां निखिलानां कर्मणां प्रत्येकमङ्गं सत्यायैव स्पृहयति स्पर्धयति तदाकारतां चापि वृणोति।

डॉ० राजेन्द्रप्रसादानामपि समग्रं जीवनं समीचीनवृत्तेरेकमुत्तमं दर्पणं विद्यते यस्मिन् सर्वासां क्रियाणां वास्तविकं स्वरूपं परिलक्ष्यते। निश्छलं निर्मलं जीवनं 'यथान्तस्तथा बहिः' स्पष्टं समर्पित-व्यक्तित्व-समन्वितं जीवद्भिस्तैः प्रतिपदमादर्शाउपस्थपिताः।

किञ्चानेकाभ्यो दृष्टिभ्यः श्रीराजेन्द्रप्रसादमहानुभावानां जीवनं व्यक्तित्वं च भारताय दर्पणायितमभूत्। राष्ट्रस्य निखिलं जीवनं प्राचीनतायाश्चित्रं तस्याशा अभिलाषाश्च सकलपि तदीये जीवनेऽपूर्वरूपेण प्रतिबिम्बितमभवत्। ते संवैधानिकं प्रशासनिकं च सङ्घटनं सुदृढं कर्तुं भूयो भूयोऽस्माकं ध्यानं तत् प्रत्याकर्षयन्ति स्म। यस्मिन् दिनेऽस्माकं देशो वैदेश्यसत्तायाः पाशाद् विमुक्तस्तद्दिनमस्माकमितिहासे चिरं स्मरणीयं स्थास्यति। १९५० तमेशवीये वर्षे यदा ते भारतस्य प्रथमराष्ट्रपतेः पदमभूषयंस्तदा तद्दिने सर्वेषामप्युत्सवानां केन्द्रबिन्दुत्वं त एव प्राप्ता आसन्। अतिव्यस्तेष्वपि कार्यक्रमेषु ते मनस्यवे मनसि किञ्चिदुद्विग्ना इवावर्तन्त। तैरेकस्मिन् पत्रे लिखितमासीद्— अहमित्थमन्वभवं यत् 'स्वाधीनतासङ्ग्रामे लक्षशो भारतीया बलिदानं कृतवन्तः परं तेषां सर्वेषां बलिदानानां फलमहमेकल एवोपभुनज्मि।' एतेन विचारेणाभिभूतास्ते बहुधा दार्शनिकदृष्ट्यैव सर्वान् कार्यक्रमान् पश्यन्ति स्म।

श्रीमन्तो राजेन्द्रप्रसादमहाभागा जीवने प्राप्तं माधुर्यं कदापि मादकं भवितुं नानुमन्यन्ते स्म तथोपलब्धां कटुतां विषमिव नानुभवन्ति स्म। इयमेवात्मगता निर्लिप्तताऽनुकूल-प्रतिकूल-स्थितीनां समायोजने सहायिकाऽऽसीत्। तेषां गभीरेण व्यक्तित्वेन सङ्घट्टचानुकूलताः प्रतिकूलताश्च स्वस्वरूपे विलीयमानास्तेष्वेव विलोकिताः। अत एव तेभ्योऽर्पितो'ऽजातशत्रु'-

रित्युपाधिर्वस्तुत औचित्यस्य सार्थकतायाश्च पराकाष्ठाऽऽसीत्। सहिष्णु-तायाः कर्तव्यपरायणतायाश्च निकषे ते सर्वदा स्वच्छाः शुद्धा एवावाभासन्त।

अस्माकं प्राचीनायां संस्कृतौ श्रीराजेन्द्रप्रसादमहानुभावानां गभीरो विश्वास आसीत्, परं तदतीतं यद् भविष्यन्निर्मितौ शक्तं नाभवत् तेभ्य-स्तदमान्यमासीद्। रामायण-महाभारतसदृशे महाकाव्ये भारतीयसंस्कृते-राधारौ स्तः, ययोरस्माकं प्राचीनो निधिः सुरक्षितः। अस्माकं सांस्कृतिको निधिर्भारतस्य गिरिगह्वरेषु मन्दिरेष्वप्यारक्षितो विद्यते। अजन्तेलोरयोर्गुहासु तथा भारतस्य मन्दिरे वर्तमानासु मूर्तिषु प्राचीनसंस्कृतेर्दर्शनान्यद्यापि कर्तुं शक्यन्ते। एतद्विषये तेषां सूक्ष्मा दृष्टिर्गभीरं चिन्तनं च बहुषु पत्रेषु तैः प्रस्तुतम्।

वस्तुतः श्रीराजेद्रप्रसादमहाभागाः सूक्ष्मद्रष्टार आसन्, ते बाह्याडम्बरे न विश्वसन्ति स्म, परं तेषामयं दृढो विश्वासोऽभवद् यत् कस्यापि वस्तु-विशेषस्य साङ्गपरिज्ञानाय तस्यात्मनो ज्ञानं परमावश्यकं भवति। यथा शरीरे प्राणानमात्मनो वा निवासो यावद् भवति तावच्छरीरे स्फूर्तिस्तिष्ठति, प्रतिरोम जीवनं वसति। तथैव देशस्यात्मा यावद् देशे वसति तावत्तत्रत्येषु कणेषु जीवनस्य वायोश्च प्रत्येकं प्रवाहे स्फूर्तिः प्रेरणाऽपि क्रीडतीति। एतदनुसारं तेभारतस्यात्मन एव दर्शनं विधायानन्द मनु भवन्ति स्म। ते राष्ट्र- हितस्योन्नतं ध्येयं पुरतो निधाय सर्वदैवाकामयन्त—

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥ (अथर्व०)

राष्ट्रायाभिवर्धनमेव लक्ष्ये निधाय त उत्पन्नास्तल्लक्ष्योपलब्धये समग्रं जीवनं योजितं प्रान्ते च राष्ट्रायैव प्राणानुत्सृज्य दिवङ्गताः।

तेषां स्मृति-सौरभं न केवलं भारतभूविभागमपि तु निखिलमपि विश्वं सुरभीकरोति करिष्यतीत्योम्।

विद्वांसः पुण्यभाजः सुसरलहृदयाः सर्वकर्मावदाताः,
सत्यात्मानः समन्तात् समुदितकरुणाश्चारुचर्या विनम्राः।
राष्ट्राध्यक्षाः स्वराष्ट्रोन्नयनकृतिचणा राष्ट्रभक्ता विधिज्ञाः,
'श्रीराजेन्द्रप्रसादा' जगति समदृशः कर्मनिष्ठा जयन्तु॥४॥

❋

ग्रन्थकृत्-परिचयः

राजस्थानस्य राज्येषु 'प्रतापगढ़'—नामकम् ।
राज्यमासीत् 'मन्दसौर'-निकटस्थं पुरातनम् ॥१॥

तत्र श्रीभगवानजोति विबुधो ज्योतिर्विदामग्रणी—
रासीद् गुर्जरगौड-विप्रतिलको राज्ञा सुसम्मानितः ।
तस्याभूदथ 'नाथुलाल' इति सन्नामा सुतः पण्डितो,
विद्वन्मण्डल-मण्डनो गणकराड् भवतः शिवाराधकः ॥२॥

'कृष्णलाल-रमाकान्त'-नामानौ तत्सुतौ शुभौ ।
अभूतां शास्त्रनिष्णातौ ज्योतिःशास्त्रविचक्षणौ ॥३॥

श्रीकृष्णलालस्तु तयोर्विरक्तो, विहाय संसारगतं प्रपञ्चम् ।
संन्यस्तवान् विज्ञवरोऽथ देवीकृपाप्रसादाप्तवरः सुसिद्धः ॥४॥

पुत्रैः पञ्चभिरञ्चितो भुवि रमाकान्ताभिधो विद्वरः,
साहित्यादि-सुशास्त्रवित् कविवरः पञ्चाङ्गकर्ता पटुः ।
तत्पुत्रः प्रथमः कविर्विनयवान् श्रीरुद्रदेवाभिधो,
नानाग्रन्थविधानवर्धितमतिर्दैवीं गिरं सेवते ॥५॥

सीताऽम्बा यस्य, तातो गणक-गणवरः 'श्रीरमाकान्तशर्मा',
विप्रः शाण्डिल्यगोत्रो 'दशपुर'-भुविजो देववाग्भक्तियुक्तः ।
दाक्षायण्याः पदाब्जश्रितवरशरणो देहलीस्थः स चैनां,
श्रीमद्'राजेन्द्र-चन्द्रोदय'-कृतिमतनोद् 'रुद्रदेवत्रिपाठी' ॥६॥

सूक्ति-प्रभा-भासुरिताऽतिभव्या, चारित्र्य-पीयूष-युता बुधानाम् ।
'राजेन्द्र-चन्द्रोदय-चर्चितेयं, चम्पूश्चिरं चित्तु चमत्करोतु ॥७॥

श्रीकृष्णानन्द-तीर्थस्य पदकञ्जालि-गुञ्जितुः ।
रुद्रदेवस्य कृतिनः कृतिरस्तु सतां मुदे ॥८॥

● ● ●

श्लोकानुक्रमणी